आर्यावर्त-हृदयम्

साम्प्रतं मारकुइस् अव् जेट्लाण्डनाम्ना प्रथितानां रत्नाकरवर्तकी-
निखिलविद्यानां वङ्गदेशस्य भूतपूर्वशासकानां रोनाल्डशे-
महोदयानां "दि हार्ट् अव् आर्यावर्त" ग्रन्थस्य
संस्कृतभाषाकृतानुवादात्मकम् ।


ब्रजलालकलेज-दौलतपुरहिन्दु-एकाडेमि-महाविद्यालययोः संस्कृता-
ध्यापकवरेण एम्-ए-काव्यतीर्थोपनाम्ना
श्रीमता वि[illegible] भट्टाचार्येण
सम्पादितम्

प्रकाशकः—
श्रीवि[illegible] भट्टाचार्यः
१२।१ बागबाजार ष्ट्रीट्,
कलिकाता ।

प्रकाशाब्दः १९५८

२५९ संख्यक-आपार-चितपुर-रोडस्थित "श्रीलाल प्रिंटिं वर्कस्" समाख्ये
वैद्युतिक-मुद्रायन्त्रे ई-मलुपाधिक-श्रीजितेन्द्रनाथेन मुद्रितम्






Leland.

ग्रन्थकार-प्रशस्तिः

जट्लाण्डाख्ये महात्मा यदि च विधिवशाज्
जात एव प्रतीच्ये
भाषाणां कृष्टि-पुष्टौ यतत इह सदा
प्राच्यभावानुसन्धी ।

प्राच्यस्तं स्वं जनं चेद् गणयति नितरां
नास्ति दोषस्तथापि
बाधा भौगोलिकी किं जनयति सततं
भेदमस्यां पृथिव्याम् ॥


BAGHBAZAR READING LIBRARY
CALCUTTA

उत्सर्गः

प्राच्यप्रतीच्यजगतीस्थितजातिमध्ये
ये नाम सा[illegible]दरसं स्वदितुं यतन्ते।
रोनाल्डशे-कृ[illegible]तेम[illegible]थ निलिम्पवाचा
तेषां करे सविनयं विनिवेशयामि॥

अनुवादकः

DEDICATION.

"To all those who are working
for a better understanding
between the races of
the East and those
of the West."

मुखावतारः

अलं गीर्वाणवाणीसाधकविद्वन्मण्डलीमध्ये "दि हार्ट् अव् आर्यावर्त" ग्रन्थस्य प्रणेतुः परिचयप्रदानेन। येन विश्वविदिते विपश्चिद्गणा ्षिते सम्भ्रान्ते वंशे जातेन, विविधशास्त्रपारावारी ोन, पाण्डित्य ्गमण्डितेन, अशेषचित्ताकर्षककल्पनापरि ्रितमनोहर-ग्रन्थरचयित्रा, शिक्षाया दर्शनशास्त्रस्य कलाविद्यायाः कृष्टेश्चाप्रति-मा सौहृदाना ्ष्टपोषकेण च, भूतभविष्यद्वर्तमानभविष्यद्-वंशीयानां कृतज्ञता ्ीस्मृतिलाभस्य योग्येनाऽऽन्तर्जातिकसं ्ते-रुन्नतिसाधनेन प्राच्यप्रतीच्ययोर्ज्ञानो ्कर्षविषये सहायता व्यकारि।

आर्यभाषा ्रागि-नानादेशीयभाषा ्शीलनतत्पर-सहृदय-राज-कीयसम्मानवि ्षितजनगणप्रभवे वङ्गविश्रुते मित्रवंशे जातेन, योग्य-पि ्योग्यतनयेन, कलिकातान्तगतराजकीयप्रधानविचारालयस्य सर्व-जनवि ्तेन, नीति ्शास्त्रमीमांसकेन, व्यवहाराजीवेन, उदारचरित्रेण श्री ्कलुधीरचन्द्रमित्र एम् ए बार् एट् ल महोदयेन पृथिव्यां सर्वत्र संस्कृतभाषा ्रागिणां विपश्चितां व्यवहाराय मद ्दतस्यास्य ग्रन्थस्य मुद्रणप्रकाशनादिविषये व्ययभारस्य ग्रहणेन ्विपाय कृतज्ञता-पा ्ाशे ऽहं सञ्जातः।

गभीरां कृतज्ञतां ्पयामि नानाशास्त्रविशार ्पण्डितप्रवरा ां म ्महो ्पाध्याय—श्री ्कटुर्णाचरणसा ्ख्यवेदान्ततीर्थ—का ्िकात-विश्वविद्यालयीय- ्तपूर्वाध्यापकप्रफेसरपदभाग् महाम ्पाध्याय-हरर् ्श्रीयुकभाग ्वत ्ाख्यास्य ्सा ्ख्यतीर्थोपनाम-श्रीयुक-

उपेन्द्रमोहनभट्टाचार्य-महोदयानां सविधे। ग्रन्थस्यास्य ग्रन्थस्य सम्पादनविषये अमूल्योपदेशप्रदानेन तथा कुत्रचिच्छन्द-विन्यासपारिपाट्यप्रदर्शनेन च महोपकारं मे साधितवन्तः।

लर्ड्_जेट्_लायडस्य पुस्तकेनानेन विश्वमानवमण्डलीसकाशे प्राच्यसभ्यतायाः समुज्ज्वलं चित्ताकर्षकं चित्रं प्रकाशितम्। विद्याधिष्ठात्री वाग्देवी तत्रभवतो लर्ड्_जेट्_लायडस्य शिरसि तस्याः शुभाशीर्वादसूचकानि दिव्यकुसुमानि वर्षतात्।

श्रीविष्णुपदभट्टाचार्यस्य

विषयानुक्रमणिका

पृष्ठम्

षोडशोल्लासः

सप्तदशोल्लासः

अष्टादशोल्लासः

ऊनविंशोल्लासः


विंशोल्लासः

आपाततश्[illegible]ऽस्माभिरनु[illegible]तानां केषाञ्चन प्रमादानां

शुद्धिपत्रम्

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
१	१५	चित्तानामन्तरा	[illegible]रा
३	२	विंशशततम	विंशति[illegible]ततम
५	२५	विंशशततम	[illegible]विंशति[illegible]तम
६	१६	विंशशततम	विंशतिशततम
८	३	ब्राह्मणाब्राह्मणेतरेषां	ब्राह्मणाब्रा[illegible]णेतरायां
६	२	विंशशततम	विंशतिशततम
१२	११	विंशशततम	विंशतिशततम
१४	६	तमातुमशक्तः	तामातुमशक्तः
४५	८	अरभिभाषया	अभिभाषया
१७७	५	निर्भर्त्सयित्वा	निर्भर्त्स्य
२०८	१०	सगुणो वा निर्गुणो	सगुणं वा निर्गुणं
२१४	१०	जालरूपो द्वैतवादः	जालरूपोऽद्वैतवादः
२१६	६	नियमनुसृत्य	नियमम[illegible]सृत्य

* सम्भवन्तोऽन्येऽपि प्रमादाः सहृदयैः शोधनीयाः *



उपो[illegible]तः

एतद्विषयकाणां त्रयाणां ग्रन्थानां चरमग्रन्थघटकानीमानि पत्राणि विरचितानि मया निवेदयितुं पाठकमहोदयेभ्यः सुव्यक्ततमानां कार्यबहुलानाम् आ[illegible]निकमानवजातीतिवृत्तगताख्यानजातानामेकतमस्मा[illegible]—ग्रेट्‌ब्रटेन्-[illegible] प[illegible]यान्तर्गतविशालसाम्राज्यस्य निर्माणं सम्प्रदायतो जन्मना च प्राच्यम्, प्रतीच्यञ्चातिमात्रं शिक्षावर्धनाभ्याम् इत्यस्मादुद्भिन्नायाः समस्यायाः स्वरूपम्। सत्यं तथैवेदानीन्तनं भारतम्। तत्राऽऽदिमो ग्रन्थः अयति यो भूयसा बाह्यविषयानेव स खलु मया व्यपचि सम्यगालिखि[illegible] रङ्गं यत्राभिनीयते बृटीशभारतेतिवृत्तरूप-रूपकमिति स्पष्टीकृतमेव मया तदुपोद्घाते। द्वितीयस्तावद् ग्रन्थः प्रावर्त्तत यः प्रथमग्रन्थस्यापसंहारात्मकपरि[illegible]दसंयोगेन ; स हि तावत् परिकल्पितो भारतीयचित्तस्य पौरस्त्यभावं कथञ्चिद्बोधयितुं पाश्चात्याधीतिनम्, परिचय[illegible]पादनार्थं हि तस्य तेन मनोराज्येन यस्मिन् स विचरिष्यति। तत् तथैव, यत् डक्टर् मेकनिकल्—महोदयेन [illegible]कम्—जातिद्वयस्य चित्ताना[illegible] अन्तरा लम्बते काचित् तिरस्करिणी भेदनाय याऽपेक्षते काञ्चन धीशक्तिं यतश्चाऽऽयाति क्षीणाऽव्यक्ता च भारतस्य वाणी—इति। ग्रेट्‌ब्रटेन्‌स[illegible]गता समस्या चेत् पूर्ववत् [illegible]ासनविषये एवास्थास्यत् तदा सा शासन[illegible]नां बृटीशानां [illegible]साध्यतरा एवाभविष्यत्। विहाय स्वीय-मौलिक[illegible] अयतीयं समस्येदानीं समधिकजा[illegible],

यतः सार्धशतसंवत्सरान् ययोर्जात्योः संसर्गोऽन्योन्यभावविनिमयश्चार्वाचीनभारतनिर्मितेः कारणत्वं गाहेते, तयोरेव जात्योरिदानीन्तनमनोवृत्तिभ्यामेव सा प्रभाविता। अतो नवीनभारतस्य मनोवृत्तिरेवाऽऽधुनिकसमस्याविषये मौलिकभावेनोपयुज्यते। यतिष्येऽहं चात्र निरूपणायास्य दुरवगाहस्य दुर्गमातिसूक्ष्मस्य तत्त्वस्य। अत एव ग्रन्थस्यास्य तथैव कृताख्या।

हिमवद्-विन्ध्य-पर्वतमध्यगः पूर्वापरसागरमवगाढो भूमिभाग आर्यावर्त्तो नाम इति दृश्यते मानवीये धर्मशास्त्रे। कृष्णसारस्तु चरति मृगो यत्र स्वभावतः। स ज्ञेयो यज्ञियो देशः (संश्रयाय द्विजन्मनाम्)॥ परस्तादार्या विलङ्घ्य विन्ध्यं वितेरुस्तेषां शिष्टिं विपुलेषु दक्षिणभारतभूखण्डेषु परं द्विजन्मनां शिक्षादीक्षयोः प्रेङ्खोलनमासीदार्यावर्त्त एव, प्रतिस्वनितं ययोः साम्प्रतमनारतं श्रोत्रपथातिथित्वमायाति नवीनभारतीयानां तेषामेवाधस्तनपुरुषाणाम्। अत आर्यावर्त्त-हृदयमवलम्ब्य भाषमाणोऽहं न तथा चिन्तयामि सुतरां किंचिद् भौगोलिकं केन्द्रं यथा गणयामि हिमवद्विन्ध्यपर्वतान्तर्गतपूतभूखण्डे निवासायानुशिष्टानां प्रज्ञानामार्याणां विंशशताब्दीयानां वंश्यानां हिन्दुत्वविषयेऽभिमानानुरागानुभावान्। प्राचुर्येण मनस्विहिन्दुसमाश्रितजात्यभिमानप्रचार एव नवीनभारतस्य स्वभावप्रकटनरीतिः, सा चातीतगौरवज्ञानस्य द्रुततरोन्मेषाज्जाता स्वयं च जनयति निरतिशयसचेतनतां हीनताक्षेपेषु प्राच्यप्रतीच्यसङ्घर्षे।

प्रायेण हिन्दुशिक्षितपदवाच्यानां मध्ये नास्ति कोऽपि योऽल्पाधिकभावेन नानुप्राणितो [illegible] मनोवृत्त्या, यश्च न पश्चात् क्षिपति साक्षेपप्रायां दृष्टिं [illegible]यं प्रति, यदा हि स्ववर्गः युरोपीयभावभावनाचरणैरात्मानं प्रभावयितुं स्वीकृतवान्, [illegible] दर्शितयोपनीतोऽहमिति सिद्धान्ते। सेएट् निहल् सिं

महाद्[illegible] कश्चन प्रेक्षावान् भारतीयो लेखक एकादश-संवत्सरान्ते एकविंशत्यधिकोनविंशशततमे खृष्टीये वर्षे प्रत्यागतो भारतं नीतवांश्च तत्र वर्षद्वयं भ्रमणेन। ये केचित् तस्य संसर्ग-मागतास्तेषां लोकस्थितिविषये आध्यात्मिकमानसिकभावभावना-सम्बन्धे काचित् महती परिवृत्तिः सङ्घटिता परिलक्षितेति तेन व्यघोषि। क्रमप्रचीयमानामतृप्तिमनुभवति जनसाधारणः स्वेषां कृतकेल[illegible]डीयत्वे इति दृढमुद्घोषयत्यसौ। काचिच्चिरवर्धमाना जातीय[illegible] बलान्नियोजयति भारतं प्रत्यागमनाय तदीयसाम्प्रदायिकशिष्टिनिर्भरेषु, त्यक्तुं सानुग्रहदत्तज्ञानमात्रस्य प्रतीच्छकत्वम्, प्रवर्धने च स्वनयविहितात्मोत्कर्षेण जगतीज्ञानभाण्डारस्य। यावदसौ क्षिप्रोद्दीप्तजात्यभिमानः परिचालयति जनान् स्वशिष्टे-र्भूतये गौरवाय च, पुष्णाति जातिस्वधर्माविरोधेन जातीयोन्नयनम्, शिक्षयति च प्रतीच्यदत्तं द्रव्यं ग्रहीतुं साधु विचारणया न त्वसमीक्ष्येति, तावत् स्वस्थताया लक्षणमेतानीत्यत्र नास्ति कापि विप्रतिपत्तिः। वर्त्तन्ते बहवो भारतीयाः स्वदेशस्यानागतं कालं विशेषेण भारतीयाकृत्या स्रष्टुं दिदृक्षवोऽपि ये पुरातनभारतस्य सर्वं सर्वकालस्थितियोग्यमितिबुद्ध्या न तथाऽन्धीकृताः, न वा येषां प्रतीच्यदेशजानां विशिष्टशिष्टेर्गन्धमात्रमपि वर्जनीयम्। सन्ति बहवोऽपरे राजनीत्यवर्जं सर्वेष्वेव विषयेषु ये मध्यपथश्रयणमेव विज्ञोचितमिति विवेचयन्ति। विगतकतिपयवर्षीय-राज्यव्यवस्था-विषयकालोचना[illegible]लकवाद्[illegible]द यदि तथाविधानामेवाभविष्यत् प्राधान्यम् तदा नूनमस्मिन् भारतम् आसाद्य दृढसौहृदयुतसह-कारितां प्रेट्ब्रिटेनस्य सुश्रृङ्खलं द्रुतञ्चाऽऽरोक्ष्यत् स्वराज्यप्राप्तिसोपान-परम्पराम्। परं नैतद्भूतम्। राजनीति[illegible] [illegible]विद्वेष-महातरङ्गारूढैश्चरममार्गिभिः सपरिकरं निष्काशिताः सर्वे मध्यमार्गिणः। अतः शोच्या खल्वियं वर्त्तमानदशा।

व्यक्तीनामिव जातानामपि विद्यन्ते विशेषकस्वभावाः। बृटनजातीयाः सर्वथापि सम्मतिक्रमेण शीतलप्रकृतयः। यथा तथा वा भवतु, भारतीयस्तु नैव शीतलप्रकृतिः। अस्मिन् विषये स विपरीतभावापन्न इंलण्डीयस्य। स हि भावप्रवणो मनसा चपलः सचेतनो भावेषु न परमनुभूतद्रव्येषु। अयं हि तपनतप्तधातुमण्डलस्य प्रसूतिरत एव युरोपस्योत्तरभागस्य तेजोहीनस्वप्रकृतेरत्यतिभावप्रवणायाः प्रसूतेर्नानेन सह तुल्यता।

एवंविधाभ्यन्तरीया-प्रकृतिवशगानां प्रतीच्यप्रतिकूलप्रतिक्रियाऽवश्यकारणावेप्लवजननी, तत्परिणामेन च बहूनां भारतीयानां मनसि तेषां नैशस्यातीतविषयेऽनिर्धारिता जाता कल्पना; युक्तिविरुद्धाऽवज्ञा च प्रतीच्यानां सभ्यतायां शिष्ट्यां चिन्तायां वर्त्तनरीत्याम्, सर्वोपरि च मन्ये तेषां गार्वितमनोवृत्तिषु। ग्रेटबृटेन् एव भारतीयान् जनान् [illegible] इति विश्वासः क्रममात्रमपेक्षते बताह [illegible]ऽवस्थातः स्वोत्पत्तौ भूयसेदं सुव्यक्तं भारतीयैः। नातिचिरात् पूर्वमेको भारतीयवार्त्तापत्रसम्पादकः के-एम्-पानिकर्-इत्यभिहितः, अक्सफोर्ड-विश्वविद्यालयस्य कश्चन एम्-ए कियद्भिश्चिद्वृप्रमाणैर्भिर्वाक्यैर्दाक्षाजातिविद्वेषसृष्टिर्यथा क्रियते तत्क्रमम् [illegible] पानिबद्धवान्। इयञ्च तस्य वाचोयुक्तिः—"भारते जातीयजीवितस्योपरि प्रतीच्यैः पातिता चिरविस्तारशालिनी काचिच्छाया। प्राग्विंशतेर्वर्षेभ्यः समाजस्य चिन्तायाश्च नेतृत्वमभीप्सवः शिक्षिताः साडम्बरं विजहुस्तेषां भारतीयवैशिष्ट्यम्। वेशे व्यवहारे चिन्तापद्धतौ प्रकाशने साहित्यकलाव्यापारेषु वस्तुगत्या जातीयजीवितस्य प्रायेण [illegible] प्रतीच्यतापादनचेष्टैव तदा प्रावर्त्तत। विस्मृताः खलु सम्यक् पुरातनशिष्टैः साम्प्रदायिकरीतयः।" सम्प्रति गतः स भावः, परम्परागतभावान् प्रति पुनरपि पतिता तस्य दृष्टिः, पुनरपि संस्थापयते स स्व[illegible]

वे-िकायां वहीन्। तथापि प्रतीच्यस्य सा छाया निविड-मद्यापि तिष्ठति। तथाच—"अज्ञातभावनाप्य ाकं चिन्ता प्रभाविता प्रतीच्येन। जुगुप्समाना अपि सर्वान्तःकरणेन न शक्नुमो वयमस्माद्दूरं गन्तुम्।" राजनीतिकजातीयताबोधो यः खलु सर्वथैव प्रतीच्यदेशागत इति वक्तुं शक्यते, तस्य प्रभावः साम्प्रतिकस्य भारतीयजीवितस्य प्रकृष्टं लिङ्गम्। सन्देहोऽविश्वासोऽवज्ञा च तस्य वाह्यलक्षणम्। सर्वेषामेव वैदेशिकानां विरोधितया कस्यचित् प्रबलसन्देहस्यान्तःप्रवाहो दृश्यते एशियामहादेशे अर्थशिल्प-विषयक ोषणभीतिमात्रमिति यत् तस्य हेतुतया व्याख्यातम् तन्न।

लब्धावलम्बया यया दु ्मवावरुन्धन्ते वङ्गानां जलमार्गाः तथा सहस्रपर्णी "वाटारहेसिन्थ" नाम्नां जलनीलीविशेषाणां सम्भूत्या यः खलु प्रदर्शितोऽभिनिवेशस्तथैव महताऽभिनिवेशेन दृढग्रहं गृह्णाति नवीनभारतीयमनोवृत्तिं सोऽयमवसादकः प्रतीच्यविद्वेषः। यथा शोचनीयावस्थया बृटीशैर्भारतीयानां सम्बन्धाः क्रमेण गाढ-माच्छाद्यन्तेऽपाकर्त्तुं तां केवलमपेक्षते चरणेना ा नच्छा तस्य भीषणप्ररोहस्य। परं नियतं नास्त्येव सा इच्छा, इच्छाश्च तामु-द्बोधयितुं न कोऽपि क्षम इति साम्प्रतं प्रतीयते। दूरे ताव त्तां तेषां सम्बन्धानां स ्भतिसम्पादनेच्छा परमस्त्येव केषुचित् प्रदेशेषु निदर्शनं दृढसङ्कल्पस्य ग्रेट्‌बृटेन्-भारतयोर्मध्ये परिदृश्य-मानस्य द्वेषस्य परिपोषणे, वर्त्तमानविप्रकर्षस्य च ुरुतापादने। यः षण्मासमात्रात् पूर्वं ालि ातायां कस्यचिदाङ्गलदेशीयस्य ्शंसघातनं विधाय निर्णीतापराधोऽभूत् तस्य वङ्गदेशोद्भूतस्य यूनो गोपीनाथसा ्यमि ्तस्य स्वदेशवा ्सल्यस्तावकप्रस्तावो येनाभि-प्रायेण ाओ ितन सालुगेन सि-आर्-दाश-महोदयेन चतुर्विंशत्य-धिकोनविंशशततम ्ब्दस्य जुन्मासि पूर्ववङ्गेषु कस्याञ्चित् राज-नीतिकगोष्ठ्यां समर्थितः सोऽभिप्रायोऽन्यथा भवेदिति विभावयितुं

प्रायेण नैव शक्यते। सर्वथाऽनपेक्षितं दुरन्तमिदमि ितं तदुपरि च पराचीनं जातीयदलस्य चरममार्गिपक्षभुक्तानां तादृशं विचेष्टनम्—इत्थम्भूते व्यतिकरे तादृशमनो- त्तिविषयेऽन्धीभावो निरर्थको यतः सा मनोवृत्तिश्चेन्नैव संयम्येत तदा परिणामे निर्मूलीभवेयुः सर्वास्ता आशा या उभयोर्जात्योर्मध्ये बहुभिः सादरं परिपोष्यन्ते भविष्यद्भारत- ाभ्यामेव जातिभ्यां विरचनप्रतिभया सफलयाऽन्योन्य-सहकारितया निर्मीयतामित्येवंरूपाः।

नवीनभारतस्य मनोवृत्तेर्व्याख्यानावसरे विहाय मध्यमार्गिणो यन्मयाश्रितानि भाषितानि लिखितानि च चरममार्गिणाम्, तत्र चरममार्गिणां समधिकमुखरताऽधिकतरस्पष्टवादिता च कारणम्। परं प्रदर्शितं मया प्रागेव यदहेतुक-प्रतीच्यानुकरणस्य प्रतिकूलतया जायमाना प्रतिक्रिया चरममार्गिष्वेव न निबद्धा; साधारण्येन सा दृश्यतां वा न वा, सर्वेषु शिक्षितेषु मध्यवित्तेषु हिन्दुष्वन्ततः सुबहुलव्याप्तावस्था न सन्देहः। अत्र तावद्विषये मध्यमार्गिभिर्यत् चिन्त्यते तदेव प्रायेण सर्वथैवोद्घुष्यते चरममार्गिभिः। भेदस्त्वेतयोः प्रकारगतो न पुनः परिमा णगतः। तथाकथितानां राजनीतौ मध्यमार्गिपक्षावलम्बिनां विगतकतिपयवर्षजातेषु विवादेषु विजयलाभे व्यर्थतायाः कारणमप्यत्रैवानुसन्धेयम्। प्रवर्त्तितायां ऊनविंशत्यधिकोनविंशशततमखृष्टाब्दीयभारतीयशासन-विधे- पश्चात्यां संशोधितराजव्यवस्थायां साकल्येन नवीनव्यवस्था-ऽ सरणस्य, राजनीतिकपक्षेषु च स्वेषां पक्षाणां प्राधान्यद्योतनस्या-प्रतिरूपं कञ्चिदवसरविशेषं लब्धवन्तो मध्यमार्गिणः, यतस्तदानीं चरममार्गिभिः परिहाय निर्वाचनं दत्तस्तेभ्यः प्रतिपक्षविरहि तोऽ-वकाशः। साडम्बरं समारभ्यापि ययुस्ते वैफल्यं प्राधान्येन स्वाचरितेषु कर्मसु तेषां हार्दिकाग्रहाभावात्। दूषयन्तोऽपि तेषां मर्यादातिक्रमणं सर्वकार्येषु, वहन्तोऽपि वैमत्यं तेषां नयेषु

न च नापुष्यन् मध्यमार्गिणश्चरममार्गि भाववन्धनविशेषम्। नूतनशासनव्यवस्थायाः साफल्याय—यद्धि नियतमेवाभविष्यदितोऽधिकतरमैत्रीभावस्य संस्थितौ,—सविक्रमं चेष्टितुं वर्त्तमाना अपि मन्त्रिणः [illegible] समर्थनमेवालभन्त व्यवस्थापकसभायाः ; व्य[illegible]थापकसभास्थितानां नाममात्रकथितानां मध्यमार्गिणां बहिःस्थितानां पूर्णविकाशप्राप्तानाञ्च चरममार्गिणां नयस्य परस्परभेदोद्घाटनमपि दुष्करमेव पक्षपातविर[illegible]तेन समीक्षकेण।

अतः खलु सामान्येन शिक्षितहिन्दूनां मनोवृत्तेः प्रकाशकानि चरममार्गिणां भाषितानि लिखितानि च समनुसृत्याऽऽधुनिकभारतस्य भावोऽनुधावनीयः। यियतिषे च व्याख्यातुं तमेव भावं पश्चाल्लि[illegible]नेषु पत्रेषु। कृतार्थीभूतश्चेन्मदीयो यत्नस्तदा स्फुटीकृता मया सहानुभूत्यर्हा एवाऽऽधुनिकशिक्षितभारतीयानामुच्चाशानां बहुलांशाः। दाक्ष्यजातिविद्वेषयुक्तेषु ग्रेट्ब्रिटेन्-विपक्षतया तीव्रविवादकुशलेषु सदोषविप्लवो[illegible]पादिततर्जितेषु चरममार्गिषु सहानुभूतिपोषणं दुष्करमेवेंलण्डीयेन। इंराजस्त्ववश्यमेव समाकृष्टो भविष्यति शिष्टं भारतीयं प्रति यो ह्यन्यजातिविद्वेषं स्वजात्यनुरागं न भावयते, यो वा स्वभावेन शिष्टाचारः, परभावग्राही, ज्ञानोत्कर्षवान्, महा[illegible]। एवमन्योन्यमतस्य क्रमशः पुष्यमाणविरोधात् जनिष्यते सुफलप्रसूपरस्पर[illegible]कारिताविषये समधिकतरा शक्तिर्यत्रैव केवले भारतस्य ग्रेट्ब्रिटेनस्य च भविष्यद्विषये [illegible] वर्त्तते यादृशी तयोः पूर्वसाहचर्यस्य समुद्देशस्य च सर्वथाऽनुरूपा भवेत्।

भारतीयसमस्याविषये—हिन्दूनां पूर्वगौरवोद्धारप्रवृत्तिमूलकस्य भावस्योपरि सर्वथा दत्तो मयाऽभिनिवेशः, यतो मम मतेन न केवलमयं भावो [illegible]व्यभावेनोपयोगी परं स साधारण्येन बोद्धुमर्हः। मयाऽन्यथा[illegible]पायानां बहूनां लघुता न मन्यते। वर्त्तमानाव[illegible]याः

जटिलतानिर्वाहेऽस्त्येव तेषां कार्यकारिता। यथा हि पञ्चनदेषु शिखजातीयानां मध्ये आकालि-समान्दोलनम्। यद्यपीदं स्थानीयम्, कार्यकारिताविषये तथापि नाल्पोद्वेगकारणम्। यथा वा ब्राह्मणा-ब्राह्मणेतरेषां मध्येऽन्योन्यविद्वेषः, यथा वा भारते वर्षे सप्तकोटि-संख्याकानां अस्पृश्यानां स्थितिः। शेषोक्तोपकरणविषये मम ग्रन्थानां प्रथमे ग्रन्थे विवृतिरस्ति। अस्मिन् ग्रन्थे एतद्विषये नाधिका कापि विवृतिर्यतः क्रियेत चेदस्य विषयस्य विवृति-र्विषयान्तराणां वा यानि राजनीतिकस्य च शासकवर्गस्य च विवेचनीयानि तदास्य ग्रन्थस्य मूललक्ष्यात् पाठकस्याभिनिवेशः परिभ्रश्येत्, तच्च लक्ष्यं पाश्चात्यशिक्षाशिक्षितानामिदानीन्तन-हिन्दूनां प्रतीच्यस्य शिष्टिमूलकदृष्टौ राजनीतिकदृष्टौ च भारतात्मनो यथा परतन्त्रता मन्यते तद्विरोधेन विद्रोहिता।

संस्कृतशब्दानामक्षरान्तरीकरणविषयेऽपि किञ्चनात्र वर्तते वक्तव्यम्। भारतीयचिन्ताश्रयिविषयप्रणयने कियताञ्चित् पारि-भाषिकसंस्कृतशब्दानां प्रयोगोऽपरिहार्यस्तावत्, निवेशनसमये च पुनस्तेषां स्वत एव जायतेऽक्षरान्तरीकरणविचारणा। मोक्षमूलरेण "दि-सेक्रेड्-बुक्स-अव्-दि-इष्ट्" इत्याख्यायां ग्रन्थमालायां या रीति-राश्रिता मयापि प्रायेण सैवावलम्बिता रीतिः। लिख्यते मयेदं साधारणपाठकानामेव कृते न पुनः पूर्वदेशीयभाषाज्ञानाम्, अतः शब्दानुवेधक्षरान्तरीकरणरीतिरपि मया कृता सावधिका; नाम्नामाङ्गलभाषायां कथञ्चिल्लब्धपरिचयानां शब्दानाञ्च कृतेऽवधूते एव मया वर्णानां परस्परविभेदकचिह्नमुच्चारणचिह्नञ्च। मया कृष्ण 'क्रिष्न' इति शिव 'सिव' इति राजेन्द्र 'रजेन्द्र' इति लिखितम्। पक्षान्तरे 'ज्ञान' 'शून्यवाद' 'याज्ञवल्क्य' इति च यथावल्लिखितम्। जाने प्रायशः स्वैरतासिद्धान्तस्य मे दोषं ग्रहीष्यति जनः। तदेषोऽस्य मुपगच्छाम।

"नाइन्टिन्थ्-सेञ्चुरि-एण्ड्-आफ्टार्"-समाख्यातवार्त्तापत्र-सम्पादकस्य चतुर्विंशत्यधिकोनविंशशततमख्रीष्टाब्दस्य जुलाइ-संख्यागतात् तदीयादेकस्मान्निबन्धात् कतिपयस्थलो[illegible] सम्मतिदानं मया कृतज्ञतापूर्वकमवश्यमेवात्र स्वीकरणीयम्। तत्प्रदर्शितसौजन्य[illegible] प्राप्तावसरेण मया च सानन्दमात्मा नियुज्यते तस्मै धन्यवादप्रदानाय।

जानुयारी, १९२५ रोनाल्ड्शे

प्रस्तावना

जातीयताशब्दस्याऽऽशयमाश्रित्य बहुलमेव व्यलिखत् कश्चन भारतीयो लेखको यस्य लेखन्यनल्पभागमग्रहीद् अर्वाचीनकालीनभारतीयजीवितप्रवाहालोडकेषु सामाजिकराजनीतिकान्तःक्षोभेषु। अकारि च तेनैवास्य लक्षणं जातेर्वैशिष्ट्यमिति। यथा व्यक्तेर्व्यक्त्यन्तरात् स्वगतैरेव धर्मविशेषैर्वैशिष्ट्यं निश्चीयते तथा जातेरपि तद्गतैर्धर्मविशेषैरेव जात्यन्तराद् विशेषोऽवधार्यते इति खलु स मन्त्रयते। ते पुनर्विशेषधर्माः शारीरिका मानसिकाः सामाजिकाश्चेति त्रिधा। ते तु नूनं जातिसङ्घटने दुरवगाहाद् विविधात् प्रागैतिहासिककारणविशेषात् सम्भूताः। यत्र विद्यमाना अपि एते विशेषाः स्वरूपतो निरूपयितुं न शक्यन्ते तत्र का कथा तेषां कारणनिर्वचनस्य। केवलमेतावदेव एतानधिकृत्य ब्रूमः—उपलभ्यन्ते खल्वेते विभिन्नजातिसङ्घटनासु चिरमिति। दृश्यन्त एव शारीरविज्ञानाङ्गा जनानामन्योन्यविलक्षणा अवयवसंस्थानभेदाः, ते तु सन्तोऽपि तत्त्वनिरूपणे न सम्यग् गौरवकाष्ठामावहन्ति। तत्तज्जातीनां चिन्तापद्धतिषु समाजसंस्थितिषु च केचन विशेषास्तां तां जातिं विशेषयन्तः संलक्ष्यन्ते। जनानां चित्तवृत्तिजातस्य साधारणत्वाद् विभिन्नया दिशया वाऽऽत्मविषयं वा जगत्प्रपञ्चं वाऽनाद्यनन्तान् विचारविषयान् वा विभावयतां विभिन्नदेशवासिनां साहित्य-शिल्प-दर्शनधर्मादिषु सर्वेष्वेव विषयेषु

कोऽपि विभेदः स-पजायेत, स एव विभे स्तेषामात्मस्वातन्त्र्योपलब्धौ बीजभूतो हेतुः, स एव विभेदस्तत्तत्सभ्यताविशेषेषु पार्थक्यविधायकः।

अस्ति किं भारतीयानामनितर ाधारणी काचन जातिः? यदि स्यात् तर्हि सा किमितरजाति-ः प्रागुक्तैर्वैशिष्ट्यैर्विशेषिता? भारतपरिसरान्तःस्थितानां जातिसभ्यताधर्माणां साङ्कर्यं तेषां शारीरिक-मानसिक-सामाजिकविपुलविशेषांश्चाधिकृत्य किञ्चन मयाऽन्यत्र कुत्रापि निवेदितम्। न च न स्वीकरोति 'पाल'महोदय एतद्देशनिवासिनां साङ्कर्यम्; उदर्के च भारतस्य सार्वलौकिकजातीयसत्तां साधयितुं स एव भारतीयहिन्दु-पार्शि-बौद्ध-मोस्लेम् खृष्टान्-समाजाः स्वां स्वां ः म्परागतामैतिहासिक-सरा मनु -कस्यैव जातीयोपपाद्यस्य समाधानं करिष्यन्तीति चाङ्गीकरोति। हिन्दु मतानुसारेणैव निरूपितस्तेन सामान्यजातीयादर्शावाप्तिविषयः सन्तज्य चेतरेषां कृते तेषां स्वकीयेन नयेनास्य निरूपणधुराम्। कृतहेत्वन्तराश्रयोऽपि शक्नुयात् स स्वं मतं स्थापयितुं सद्भावात् पूर्वतनग्रन्थोल्लिखितानां भारतीयेषु विशेषेणावस्थितानां हिन्दुसभ्यतानुशीलनधर्मलक्षणानां बलवतामैतिहासिककारणाना । प्राधान्येन हिन्दुभारतस्य चित्तसंस्थानमथाधस्ता तत्र तत्र पत्रेषु निवेशयिष्यते।

न च 'पाल'महोदयो जातीयविशेषकाणयपलपितुमिच्छति न्यूनाधिकैस्तुच्छैर्भेदकविशेषैः। जीवेष्विव जातिष्वपि किमप्यनिर्वचनीयमवतिष्ठते इत्येव तस्य महाभागस्य मतम्। लिखित तेन यद् जगत्यस्मिन् सर्वैव जातिर्धत्ते कमपि भावनाविशेषं पुष्यति च तं पारिपार्श्विकपरिस्थिति-रीतिराष्ट्रनयादिविशेषैर्वा तस्यैव ससार नस्य स चितसिद्धये। जीवात्मनामेकत्वमिति मूलतत्त्वं—यदन्तर्भूतमेव जीव-

'रमात्मनास्तादात्म्यमिति ।नेगमन ,—तदेव हि ।हि जातेमैव-भावनायाः स्व पमिति वक्तुं शक्यते। भारतीयति सस्यैकमेव मुख्यं प्रतिपाद्य , यद्धि चिरन्तनं प्राग ति [illegible]-वृत्ते, तद्धि हिन्दूनां विशिष्टं परमार्थज्ञानम्। पुरातनहिन्दुजाते-रिवार्वाचीनहिन्दुजातेरप्यात्मज्ञानमेव भित्तिपाषाणायमा । न खलु वेदान्तदर्शनज्ञानमन्तरेण भारतीयेतिवृत्तस्य मुख्यं तत्त्वं विज्ञा मलम्। अग्रे तावदस्य विवृतिप्रदानाय यतिष्ये। साम्प्रतं हिन्दुजातेर्विचित्रचिन्ताप्रवाहस्योदाहरणत्वेनो न्यस्यतेऽत्र मया सुविदिताधुनिकराजनीतिकसंक्षोभजा काचित् कथा।

यः खलु राजनीति संक्षोभस्याग्रणी य खृष्टीय-द्वाविंशत्यधि-कोनविंशशततमवर्षे 'मार्च'-मासि राजद्रोहितया निर्णीता-पराधोऽपि भारतभूमिभागे विप्लवं महासन्त्रासञ्च प्रे [illegible] व्यापकत्वेन युगपज्जनयामास, इदानीमपि तस्यैव एम्-के-गान्धी-[illegible] नामधेयादन्यस्य कस्यापि नाम बृटीशप्रकृतीनां नैव सुविदितमस्ति। गान्धीमहोदयो यमर्थमभिसन्धाय प्रावर्त्तत तमर्थं निह्नोतुं कदापि नाचेष्टत। तदपि निर्व्याजमवोचत, यन्मनसा समपर हदाशंसीच्च स राजशासनविकलीकरणाय इति। तदीयेनोद्देश्येन समं नास्ति मे कोऽपि सम्बन्धः, अस्ति तु तस्य कार्यपद्धतिभिः, ताभिरपि पुनस्तावानेव मे सम्बन्धो यावान् हिन्दुजातेर्विशिष्टचिन्ताधाराया निरूपणे निदर्शन-प्रदर्शनायोप ज्यते। आदितः प्रभृति धर्मयुद्धाय तस्य खल्वेव-मेव निर्बन्ध आसीद् यत् "युध्यन्तां सर्वे म पताकातल-सेविनः त्यागकृच्छ्रसाधनप्रहरणैरिति।" एइच्-आर्-एइच्-दि-डिउक्-अफ्-कनट्-महोदय दिश्य केनचिदु लेखेनोद्घोष्य-नायासेनापि जनाः संक्षोभमिमं धर्म्यं पावन ति ज्ञास्यन्ति। कालान्तरे कलिकातान र्थी वङ्गीयान् विद्यार्थिनः समा थामे-

भाषणप्रसङ्गेन स एवमभाषिष्ट नो जिह्रेमि खल्वाधुनिकीं शिक्षासरणिमनुसृत्य लब्धविद्यानामर्वाचीनग्रन्थोल्लेखोपलक्षितचेतसामग्रतो धर्म्यमिममभिप्रायमुपस्थापयन्। नापि व्रीडामनुभवामि राजनीतिकसमीक्षणे साकल्येन परिवृत्तिसाधनाय मम तावत् प्रयत्न इति ख्यापयन्। एष तु मे प्रयत्नो राजनीतिक्षेत्रे आध्यात्मिकभावसन्निवेशनायैवेति।

तदुक्त्यभिसंरम्भ एवोत्तरोत्तरं गणविग्रहात्मना परिणते तदुद्घोषितमाध्यात्मिकबलप्रामाण्यं शारीरबलनिन्दनञ्च तदा तत्प्रतिपक्षाणामुपहासमुद्दीपयतामिति यत् तत् सम्यक् स्वाभाविकमेव। परम् विहायेदं कारणं प्रतीच्यमानसानां सम्भ्रमप्रदोऽभूत् तदीयः समरप्रयोगः। इंलिशमेन् इत्याख्याते वार्त्तापत्रे निरदिश्यत प्रकटितागान्धीमहोदयरीतिभक्तिरविदिताभिधः कश्चन लेखकः— "स्वारब्धसंक्षोभस्वरूपद्योतनाय गान्धीमहोदयेन यत् पदं निरूपितं तस्य 'सत्याग्रहे'तिपदस्य लेशतोऽपि न बुध्यन्ते आशयं युरोपवासिन इत्यत्र च्छिन्नसंशयमकुरुतां तं इंराजैः सह संलापः इंराजीवार्त्तापत्रगतालोचनपाठश्चेति।" व्याख्यातं च तेनैव कैमर्थ्यमपि गान्धीमहोदयनयस्य—"एकचित्तताविरोधकत्वात् त्यजेयुस्ते समागममभीप्सवः सम्बन्धं शासकेन सांसारिककर्मभिश्च; लोभश्चार्थे धार्मिककौशलेषु चेति।" अभिहितश्च पुनस्तेनैव, सत्याग्रहो नाम—"दृढसङ्कल्पवद्गणप्रयुक्तात्मबलामे"ति। दृढसङ्कल्पगणप्रयुक्तात्मबलमाप्तुं वर्जयेयुस्ते सांसारिकभोगान् पार्थिवाभिलाषांश्च।

न खलु मतमिदं परिचितं पाश्चात्यचित्तस्य। न तथा भारतीयं मनः, यतस्त्यागेन तपोऽभ्यासैश्च शक्तिरवाप्यते इति हिन्दुजातिचिन्तानिर्मितेः फलमिदं मतं चिरातीतकालागतभारतीयविश्वासमवलम्बते। शत्रुयवासेः कारणरूपेणाऽऽत्मक्लेशस्वीकारस्यामोघताया

निदर्शनैः प्रकीर्णं खलु भारतीयं पुरातनं साहित्यम्। विश्रुतः कश्चन जनो यस्य चारित्रं दृश्यते वेदेषु रामायणमहाभारताख्ये महति महाकाव्यद्वये, पुराणेषु च, स खलु कस्याश्चित् कथाया नायको या कथोल्लिखितसरणिशरणानां पौराणिकनिदर्शनानां वर्णयितुं शक्यते। स खलु जनो भूपतिर्विश्वामित्र इति, कथा च सा क्रोडीकरोति ब्राह्मणेन वशिष्ठेन तस्य घोरं चिरायितं वैरम्; तत् समासेन वर्ण्यते। प्रागनुदवृत्तु गाधिसुतस्य गृध्नुतां वशिष्ठाश्रिता कामधेनुः यां समासादयितुं समजनि स स्थिरनिश्चयः। शारीरबलेन तमाप्तुमशक्तः स सन्त्यज्य राज्यम् अशिश्रिय-द्धिमाचलम्, तत्र च कठोरतमेन तपसात्मानं संयुज्य तापस-जनोचितजीवितं दधार। परमेश्वरमहादेवोपहृतदिव्यास्त्रजाल-रूपेण समाजगाम तस्य प्रथमं पारितोषिकम्। तैश्चास्त्रै-स्तूर्णमगमत् स वशिष्ठसङ्गरम्, परं शक्तिमता पुरोधसा पुनरपि पराजितः प्रत्यावर्त्तत हिमालयं तपोबललाभाय; स्वेच्छास्वीकृत-तपसे भूयश्च मनो निदधे। यस्मात् स क्रमेणाधिजगाम महत्तरां शक्तिम्, देवैरुपायनीकृतं क्रमप्रचीयमानं पारितोषिकञ्च; तस्य सहस्र-संवत्सरावसानस्य तदाचरितस्याऽऽत्मसंयमनस्याऽऽमूलादनु-धावनं [illegible]। परिशेषे च सर्वापदो मूलभूता सा कामधेनुस्तुच्छतां जगाहे विश्वामित्रपरिपालितकठोर-तपश्चर्या[illegible] पुरतः। तदानीं पुनर्विश्वस्य स्थितिविषय एव संशयः प्रादुरभूत्। तदर्जितालौकिक[illegible]-र्देवानां नराणां च तथा भयदाऽभूद् यथा देवा ब्रह्माण[illegible] प्रासकालं सङ्कटं निवेदयामासुः। प्रोचुश्च ते "विविधैरुपायैः प्रकोपितः प्रलोभितोऽपि न विचलति विश्वामित्रो महामुनिः, परं प्रावर्धत एव तस्य पावनस्तपःप्रयत्नः; [illegible]भिलाषो नूनं नाशयेत् स लोकत्रयं स्वतपोबलेन। साम्प्रतं

विश्वस्य सर्वा दिशः, नोद्भासते ज्योत्याकः, उत्प्लुता इव सर्वे सागराः, शकलीभूताः शिखरिणः, ससंभ्रमं चलति वसुधा, मुहुर्मुहुर्जायन्ते वात्याभिघाता इति।" न निष्फलं त्विदं दिव्यप्रतिनिधीनां ब्रह्मणो मनसि कार्यगौरवबोधं पदं ग्राहयितुम्, यतः स स्वयं देवसंघैर्देवतापससमीपं पसृत्याऽऽशीर्वचोभिरभिनन्द्य च तं ब्रह्मर्षिरित्यक्षरैरामन्त्रयामास। एवं प्रसह्य देवेभ्योऽवाप्य ब्राह्मण्यं विरराम राजा विश्वामित्रो भुवनभीतिदात् परःसहस्र-संवत्सरसमनुष्ठितात् तपसः।

गान्धीमहोदयस्याऽऽत्मबलवाद। यं बहव एव प्रतीच्यदेशवासिनो मन्यन्ते निरर्थकनिर्बन्धविशेष इति, स चेद् दृश्यते भारतीय-दृष्ट्या नूनं सुगमत्वं सम्यक् सङ्गतत्वं च यायात्। सत्यमस्ति विस्मयकरं सादृश्यं विश्वामित्रस्य राज्ञो गान्धीमहोदयस्य चाऽऽख्यानकयोः। तुच्छा वशिष्ठस्य कामधेनुर्विश्वामित्रवैरारम्भस्य मूलम्। तथैव "राउलट् एक्ट्" इत्याख्याया राजव्यवस्थाया विधिवद् व्यवस्थापनमिति हि तुच्छतरं कारणं गान्धीमहोदय-समारम्भस्य। यथैवाऽऽद्ये वृत्ते विश्वामित्रतपोलब्धजन्मनां विद्रावकविकासानां पुरतः कामधेनुर्व्यहासीत् सर्वगौरवं तथैवोत्तरवृत्तेऽपि विजहौ गान्धीमहोदयजातविक्षोभस्य पुरतः स्वगौरवं "राउलट् एक्ट्" इत्याख्यो विधिः।

अत्रायं तावद् हिन्दुजातेश्चिन्ताधाराया वैशिष्ट्यानामेकतमस्य—अनुष्ठानात् त्यागे विश्वासाधिक्यमित्यस्य दृष्टान्तः। उपोद्घातरूपेण मे प्रबन्धस्यात्रेदं मया समुपन्यस्यते। इतरेऽपि विशेषा यास्यन्त्येव प्रकटतां समं मे प्रबन्धविस्तरेण। इदं च स्फुटीभविष्यत्येव—सम्प्रति यः खलु संक्षोभो विशेषयति जातेरस्य सम्बन्धम्, स खलु संक्षोभो लेशतोऽपि हिन्दुजाते-र्बृटीशस्य च चिन्ताधारयोः संघर्षादुद्भूत इति।

प्रथमोल्लासः

अप्रतिरूपं किञ्चन परीक्षणम्

सम्प्रदायपरिसरवर्त्यो बालो यां भाषामाश्रित्य स्वमनोभावान् प्रकटयति तामेव भाषां द्वारीकृत्य दत्ता उपदेशाः सुखं प्रविशन्ति तस्य मनसि बुद्धौ चेति, विदेशीयभाषाद्वारेण वितीर्णा विद्या शुकानामिव कण्ठस्थीकरणं न बुद्धेरुन्मेषणाय कल्पते इति च स्वं मतं साम्प्रतं प्रकाशितं केनचिद् भारतीयभद्रमहोदयेन। आदौ तावदनिवेदितमपि सत्यमिवेदं प्रतिभाति। परं न तथेदं भारते।

तादृशबुद्धिसंवलितमानसो वैदेशिकस्तद्देशीयान्महाविद्यालयानुच्चशिक्षालयांश्च समीक्ष्य दर्शनपथागतैर्विस्मयं श्रोत्रपथातिथीभूतैश्च समधिकमुद्वेगमेव यायात्। पश्येच्च स महाविद्यालयेषु भारतीयैस्तरुणैः पूर्णान् प्रपाठप्रकोष्ठान्, अध्यापनवेदिकायाञ्च प्रायेण सर्वदैव कञ्चन भारतीयमेवाध्यापकम्। गणितं वा इतिहासो वा दर्शनं वा पदार्थविद्या वा यो वा को वाऽन्यो भवतु नामाध्ययनमार्गसमुपस्थापितः शिक्षाविषयः, सर्वत्र श्रोष्यत्येव स आङ्ग्लभाषामयमालोचनम्। अपिच युरोपदेशे या साधारणी शिक्षेति कथ्यते, तस्या एवोपक्रमं सर्वथा स्फुटमेव च शिक्षकशिक्षार्थिनोरूपेण तेनैव भाषाद्वारेण समधिगन्तुं यतमानान् जनप[illegible]तान् [illegible] किशोरकान् नूनं स विलोकयेदुच्चविद्यालयेषु; अभिजानातु वा न वा स तां शिक्षार्थं द्वारीकृतां भाषाम्

मातृकुलभाषेति। तस्य चेत् कौतूहलमनया विस्मयाव[illegible]याऽभिरू-तयाऽतिमात्र[illegible]द्रिक्तं सत् प्रचोदयेत् तं [illegible]वीनरीत्या वितीर्णाया अस्याः शिक्षायाः स्वरूपनिरूप[illegible], नूनं स तदा समवेयात—यथार्था प्र[illegible]रूपा शिक्षा[illegible]रीतिरि[illegible]ति, आ[illegible]दशीय-नगरस्थितानां लिपिकरा[illegible]णां बहुसंख्यकजना[illegible]तूपादान-मेव चास्या रीतेः सुव्यक्तं फलम्। रीत्याऽनया आ[illegible]लिपि-कराणां यद् बुद्धिविषयकसाधनं यद्वाचरणं तत् सम्यक्तयैव लभ्यते। धर्मविषयेऽपि [illegible]णां नस्ताटस्थ्याश्रयणस्याऽऽवश्यकत्व-स्वीकरणा[illegible] प्रभृत्येवाऽऽध्यात्मिकभावसम्पन्नो जनोऽप्रासगणना-विषयः सम्प्रति विरमति महम्मदीयेभ्य इस्लाम-मतोपदेशना[illegible] सनातनधर्मस्य वा गूढकुटिलमार्गेषु हिन्दूनां परिचालनात्।

शिक्षापद्धतेः [illegible]पताथाः सविशेषवैलक्षण्येन, तस्य [illegible] सर्वेष्वेव प्रदेशेष्वध्यापनक[illegible] प्रपाठप्रकोष्ठेषु च समवेतानां मध्ये समभावेनाऽऽवर्तितम् आश्चर्यजननं प्रकारगतं साहश्यं दृष्ट्वा, यदुपादानमाश्रित्य चलतीयं विस्मयजननी परीक्षा [illegible]विषये, तस्योपादानस्य स्वरूपसन्धाने स्वत एव स प्रवर्तितो भवेत्। ताभिश्चानुसन्धित्साभिर्नूनं नीयेत स केषुचिद् व्यापकेष्वेव सिद्धान्तेषु। तत्र प्रथमतस्तावदस्य विपुलतायतनस्य, विशेषेण नानारूपत्वं प्रकारस्य, असमानजातीयानां बहुकोटि-संख्याकानां (१९२१ खृष्टाब्दे ३२०,०००,०००) जनानां च स्थितिः। [illegible] एवास्य देशस्याऽऽसीत् काचिद् विशिष्टा शिष्टिः शिक्षा च। [illegible]तीयतस्तावद् व्यूल्यामस्य बहुलभागस्य हिन्दु-भागस्य नाम सुप्राचीनकालात् प्रभृत्येव गाढमुत्तः प्रबलो धर्म-भावः ; अपर[illegible] भागे महम्मदीय दरीदृश्यत एव कश्चन भीषणः [illegible]लुरिको भावः। [illegible]यतस्तावत् स्वमनोभावप्रकाशनाय परि-चितानां भाषाणां सम्भ्रमप्रदैः प्रका[illegible]पैश्चाऽऽसीदयं विभु[illegible]

इति। चरमतश्च स्वस्वमा॰ भाषायामपि प्रतिशतं प्रायेण ह्यधिक-नवतिसंख्यकानां सम्पूर्णरूपेणानधिगताक्षरत्वं तद्देशवासिनाम्।

नूनमेवंविधासु जातिषु वैदेशिकभाषाद्वारेण वै॰॰शिकशिक्षाप्रदान-प्रचेष्टनमसाधारणभावानेव श्रयेत्। यद्यपि मूलतोऽस्माद् बाहुल्येन ॰ाफल्यमव प्राप्तं तथापि केषुचिद्विषयेषु विफलतैवास्माभिः परिलक्ष्यते। दृश्यन्त एव उपदेशप्रदानस्य द्वारतया वैदेशिक-भाषाश्रयणं स्फुटतया दृश्यमानैर्दोषैर्युक्तमित्यस्य बहून्येव निदर्शनानि। येषां धर्मशास्त्राणि कदाचिदपि न पत्रारूढी-कृतानि परं संरक्षितान्येव मनःकक्षासु, वंशपरम्परया च यैर्वाचा एव तानि वितीर्णानि, तेषां विपुलस्मृतिस॰॰यकसाहित्य-निर्मातॄणां वंश्या एवाऽऽधुनिका भारतीया इत्यनेन तत्त्वेनैवेमानि प्रवर्धन्ते। तदनुसारेणैव च प्राप्तं तेन परम्परागत॰॰तिशक्तौ परमसौकर्यम्। द्वादशवर्षादूर्ध्वमेवाऽऽङ्गलभाषाद्वारेणैव शिक्षणीयं यस्य सर्वं तेन भारतीयेन बालेनाऽऽत्मनो दारुणकार्यभारोद्वहनाय तस्य निर्विवादस्वीकृता स्मृतिशक्तिः स्वत एवाऽऽश्रयणीयेत्यत्र नास्ति विस्मयस्यावकाशः, एवंविधास्ववस्थासु यज् जायते तत् तु "मनोविज्ञानपदस्याऽऽशयो व्याख्यायता॰"—इति प्रश्नस्य कस्मिंश्चिदनतिचिरगते परीक्षणे यदुत्तरं लब्धं तेनैव विशदीभवेत्। "मनोविज्ञानं हि प्रसाधका विकाराः"—इत्येवाऽऽसीदुत्तरपत्रगत-मुत्तरम्। सप्तदशाधिकोनविंशतिशततमखृष्टाब्दस्य ॰॰॰॰॰विश्व-विद्यालयस्य राजनिर्वाचितसभायाः पुरतः, आङ्गलभाषाद्वारेणोप-देशदानं शिक्षयत्यस्मदीयान् बालकान् ॰॰॰॰॰॰॰॰ पदेषु न वरं भावेषु, आकारेषु न पुनर्गूढार्थेष्विति प्रमा॰॰त्वेन ब्रुवाणस्य डक्टर-॰॰॰॰॰॰॰॰॰॰॰॰॰॰—अध्यापनकक्षासु लिखनार्थम् अनुवाचितानां दुर्बोधानामपि टीकानां धारणे योग्यतय॰ एवाऽऽ-सीदसंशयं मनसि।

दृष्टा मया बहुश एव विद्यालयाः, परिदर्शनावसरे च तेषां श्रितो मया बालकानां सविधे कतिपयसरलप्रश्न-जिज्ञासनाभ्यासः, प्रायेण सर्वदैव नाबुध्यन्त ते तेभ्यः कथितं विषयम्, तत्र तत्र च शिक्षकाणां च तेषां पुनरुदीरणं मे प्रश्नस्य सदैवापेक्षणीयं जातम्। तथैव मयापि प्रायेण न पारितं बोद्धुं तेषामुत्तरम्। भारतीयो [illegible] चरमवर्षद्वये प्रतिसप्ताहं यं षड्विंशतिहोरापरिमितसमयं नयत्याङ्गल-भाषापठनेन, एकस्यैव विषयस्य कृते तस्मादधिकतरः कालांशो न विनियुज्यते,—कलिकाताविश्वविद्यालयस्य राजनिर्वाचित-सभायाः सदस्यैः परिचितानां देशानां कस्मिंश्चिदपि देशे कस्यामपि वा द्वितीयस्तरीयाध्यापनरीत्याम् इति सत्यपि तैरेव प्रदर्शिते विषये नैतन्निराशाजननमपि विस्मयावहम्। व्याख्यात-मेवास्य कारणं केनचिदभिज्ञेन विदुषा, कथितञ्च तेन पूर्ववङ्गीयस्य कस्यचिदध्यापनशैलीशिक्षायै स्थापितस्य महाविद्यालयस्याध्यक्ष-त्वेनावस्थानकालेऽभीक्ष्णमेव दृष्टास्तेन बहव एव समाप्तविद्या-स्तरुणाः यैर्विद्यालयप्रवेशात् पूर्वं नालोचितं जातुचिदाङ्गल-देशीयैरिति। आङ्गलदेशीयस्याऽऽङ्गलभाषां श्रुत्वैव न शक्नुवन्ति बोद्धुं नैव च पारयन्ति तस्या भाषाया विशुद्धं स्वरभेदं वा ग्रहीतुं भारतीया विद्यार्थिन इत्यत्र विषये न स पश्यति किञ्चन विस्मयोद्दीपकमेवंविधास्ववस्थासु। अध्यापनशैलीशिक्षामहाविद्या-लयो हि कश्चित् शिक्षकोत्पादकः प्रतिष्ठा[illegible] यस्मान्निर्गतो गृहीतविद्यः स्वदेशीयानां शिक्षणविधावेव विनियुज्यते।

भारतीयविश्वविद्यालयस्य विद्यार्थिनां न जायते विश्वविद्यालय-[illegible]ऽनुरूपाधिकार आङ्गलभाषायाम्, भूयिष्ठभागेन च तेषां नैवार्ज्यते विश्वविद्यालयतः शिक्षाग्रहणावसरेऽपि सम्यक् ज्ञान-मा[illegible]भाषायामिति प्रतिपद्यते कश्चनापरोऽभिज्ञो [illegible]

लयाध्यक्षः। अभाषि च तेनैव—"वर्षषट्कं म[illegible]विद्यालयेऽति-वाहितवताम् एम्-ए-परीक्षार्थिनामपि बहूनामेवोत्तरपत्रतो ज्ञायतेऽनु-भवन्त्येव ते [illegible]विशेषमाङ्ग्लभाषायां स्वमनोभावान् प्रकाशयितुम्, तत्र तत्र च [illegible]स्तेषामुत्तरपत्रेषु परिलक्ष्यन्ते स्थूला एव व्याकरण-गताः प्रमादाः"—इति। प्राथमिकशिक्षानन्तरमेव या रीतिर्वैदेशिक-भाषा[illegible]वैव वितरत्युपदेशान् सा तु सनैराश्यं याति निष्फलता-मिति सिद्धान्तितं तेन।

निरा[illegible]करणायास्य दोषस्य बहव एव श्रिता उपायाः परं न ते सुष्ठुतया प्रतिभान्ति। यो हि [illegible]ल्पपरिमेयः समयो विनियुज्यते आङ्ग्लभाषाध्यापनायोच्चशिक्षालयेषु नूनं नैवास्माभिरवाप्यते तदनु-रूपं फलम्; यतश्च पुनर्विवेचनीयमेव यन्महाविद्यालयस्याध्ययनमार्गे आङ्ग्लभाषाया अवश्यपाठ्यत्वेन स्वीकरणं प्रायशो विद्यार्थिन आ[illegible]लानेव विदधाति न पुनर्निःसन्दिग्धान् स्वमनोभावप्रका[illegible]नाय द्वारीकृताया भाषायाः स्वरूपबोधने। "यत् बाइबेल-भाषितं मृगयुं न पूतं जनं मन्यते, कलयति स तद्भाषितं लूनपक्षं कुक्कुटमिवा-किञ्चित्करम्"—इत्येवं विधस्य वाक्यस्य टीकारचनाय केनचित् परीक्षकेण पृष्टस्य साधारणस्य भारतीयस्य बालकस्य को वा स्यान्मनस उपकारः। अपि च कथितभाषात्वेनाऽऽङ्ग्लभाषाज्ञानस्य विषये किं वा स्यादनेन प्रयोजनम्? अथवा जनपदागतो भारतीयो बालः कां नाम समुन्नतिं विधास्यति तदीयस्य भाषाज्ञानस्य—'ये तावद् भावाः 'साम्सन् एगोनिष्ट्स्' इति पुस्तकस्य [illegible]-तमव्यक्तीकरणत्वेन च गौरवमावहन्ति तान् वर्णय" इति प्रश्नं समासेन [illegible]मालोच्य, यत् सत्यं स चैकदा पृष्टोऽभूत्?

अपि वाऽऽङ्ग्लभाषाशिक्षया एवंविधमनःसंयोगस्यावश्यकर्तव्य-तया जाता क[illegible] विद्यार्थिनां स्वेषामपि मातृ-भाषायाम्। विश्वविद्यालयप्रवेशार्थिनो जायतां वा न जायतां

नाम यथोपयुक्तं ज्ञानं स्वमातृभाषिते साहित्ये चेति विषये आपेक्षिकम् औदासीन्यम् एव दृश्यते। सत्यमप..त एव कश्चित् विधिर्येन मातृभाषाविन्यासेऽपि तस्य परीक्षणं जायेत परं शैल्या अ. शरूपेण पठनार्थ..भोदितानां ग्रन्थानां षडवधिकासीत् संख्या तत्रापि च ..नर...ोदितग्रन्थविषयावगाहिणा मातृभाषायाः साहित्यस्य इतिहासाश्रयिणश्च प्रश्नाः सनिर्णयमासन् नियन्त्रिताः। पक्षान्तरे म..विद्यालये मातृभाषाविन्यासस्य कृतेऽध्यापनम् अनपेक्षणीयमेवेत्यदृश्यत नियमः। भारतीयबालस्य शिक्षाविधौ यदेव सारवत्तया चिन्तनीयं तस्यैव नूनमनेन जायतेऽपूर्वमवधीरणम्। अनेन कलिकाताविश्वविद्यालयस्य राजनिर्वाचितसभायाः सदस्यास्तथा विस्मयं याताः यथा तैरेव प्रकटितम्—शिक्षारीतौ विद्यत एव कश्चिद्..किसिद्धो विषयो येन तरुणाः ..क्षासमापनानन्तरमप्यसमर्था एव भवन्ति स्वेषामपि मातृभाषयाऽस्खलितं वदितुं निर्दोषं वा लिखि..म्—इति तेषां मतम्।

दूरे तावदास्तां शिक्षणद्वारवार्ता, भारतीयशिष्टि-सम्प्रदायाभ्यां सर्वथा प्रत्याविष्टेयं समग्रैव शिक्षारीतिः, उच्च..द्यालयाः वि-द्य-उपपद-प्राप्तेः प्राक्तनशिक्षामार्गाश्च मूलत एव प्रतीच्यशिक्षापद्धतेरनुरूपाः, वृटीशागमनात् पूर्वं समनुभूतेन भारतीयजीवितेनासम्बद्धाश्च। ते तु प्रायेण यन्त्रतुल्याः; स्व.शीयाया रीत्याः प्रकृष्टलिङ्गस्य शिक्षकशिक्षार्थिनोर्मध्ये दरीदृश्यमानस्य गाढसम्बन्धविशेषस्याभाव एव स्फुटं परिलक्ष्यते तेषु। विश्वविद्यालयवितीर्णा शिक्षा सर्वथा साकल्यनांसम्ब..। भारतीयविद्यार्थिनां चेतसा..ाशाभिरकपटचिन्ताभिश्च। निदर्शनमेकं सहसैवाऽऽयाति मनसि। सत्यं विभुता हि भारतस्य मनोवृत्तिः सदैव ..र्शनशास्त्रं प्रति गौरव..र्शनेन, तथापि चित्रम्! अनाक..र्य नामतोऽपि उल्लेखं भारतभूमेरुत्तलानां षड्दर्शनानां

वा वेदान्तसूत्रसंग्रहीतुर्बादरायणस्य वा भाष्यनिर्माणकोविदानां शंकररामानुजप्रमुखाणां वा समाप्यते वि ध-परीक्षार्थे गृहीतदर्शनशास्त्रैर्भारतीयैर्विद्यार्थिभिर्विश्वविद्यालयवितीर्णा विद्या।

प्रधानतो भारतीयानामेव प्रयत्नेनावस्थेयं समागतेति महान् एवायम् असत्याभासः। भारतीया एव प्रतीच्यज्ञानं प्रतीच्यभाषां च प्रार्थितवन्तः। केवलसाहित्यशिक्षादर्शरूपेण प्रवृत्तायां शिक्षायां परिदृश्यमानोन्मुखतापि भारतीयानामेव सकाशाल्लेभे प्रसरणरयम्। सप्तदशाधिकोनविंशतिशततमख्रृष्टाब्दे विश्वविद्यालयस्य राजनियुक्तया सभया युक्तराज्यस्य जनसंख्यया तुल्यं सार्धचतुष्कोटिपरिमितं दृष्टं वङ्गानां जनसंख्यानम् अवधारितञ्च यतन्तेऽत्र षड्विंशतिसहस्रसंख्यकाश्छात्रा विश्वविद्यालयस्य उपपदलाभाय इति।

परं यतो वङ्गानां दशांशपरिमिता जना जानन्ति लिखितुं पठितुञ्च ततो विश्वविद्यालयात् पूर्णशिक्षां प्राप्तवतां संख्या प्रायेण दशगुणा युक्तराज्यस्य। विस्मिता एवाभवत् सा राजनियुक्ता सभा वङ्गानां ग्रेट्ब्रिटेनप्रदेशस्य च अवस्थानामितरेतरैर्वैलक्षण्यैः। उत्तरोक्ते तु देशे दृश्यन्त एव प्रकारभेदाः शिक्षायाः। बहुलांशैरेव छात्राणां स्वीक्रियते आजीवानुकूला विद्या, स्वल्पपरिमितैरेवाऽऽसज्यते केवलसाहित्यशिक्षा। विपर्यये त्वितरसभ्यदेशवैलक्षण्येन वङ्गानां शिक्षितसम्प्रदायस्याधिको भागो मन्यते विश्वविद्यालयप्रदत्ताम् उपाधिविशेषमेव योग्यं काङ्क्षणीयं च लक्ष्यम्, यद्धि लक्ष्यम् अवाप्यते तैः केवलसाहित्यशिक्षास्वरूपेणाध्ययनमार्गेण; यस्माच्च पुनर्लक्ष्यात् प्रत्यक्षं नैव जायते काचित् कार्यकरी शिक्षा। ग्रेट्ब्रिटेनप्रदेशे प्रकारतो विभिन्नानाम् अष्टादशविश्वविद्यालयानां स्थितिरेव प्रकटयति शिक्षासरणीनां विभिन्नताम्। वङ्गेषु तावत् विद्यते एक एव विशालो विश्वविद्यालयः

संख्योत्कर्षेण यः खलु बृहत्तमो जगति स्थितानां विश्वविद्यालयानाम्, यस्मिंश्च विद्यन्ते सप्तविंशतिसहस्रसंख्यकाः सर्ववर्गीयाश्छात्राः, यत्र च पुनर्भवन्ति प्रतिवर्षं षोडशसहस्राधिकाः मैट्रिकुलेशन्-परीक्षार्थिनः। तस्यैव महतो यन्त्रव्यापारस्य शासन एव स्थापितैः सर्वशिक्षार्थिसमाजैरनुस्रियत एक एवाध्ययनमार्गः सर्वेष्वेव विषयेषु, पठ्यन्ते च अभिन्नान्येव पुस्तकानि, निर्विशेषं च दीयन्ते परीक्षणानि। प्रत्यक्षीकृताश्च तैर्निखिलेऽस्मिन् भारते पञ्चाशत्सहस्रसंख्यकैः शिक्षार्थिभिराश्रितास्त्रयस्त्रिंशदधिकशतसंख्यका महाविद्यालयाः द्वादशसहस्राधिकद्वादशलक्षपरिमितैश्छात्रैराकीर्णा ऊनपञ्चाशदधिकशतयुताष्टसहस्रसंख्यकाः प्रतीच्यानुरूपा द्वितीयस्तरीया विद्यालयाः। तथैवाऽऽसीत् शिक्षावृत्तस्य प्रसारो यथा तैर्दुष्कर एवाभूद् यत्र कुत्रापि वाऽस्मिन् भुवनतले अनेन सदृशस्याऽन्यस्य कस्यापि दर्शनलाभः।

कथं वेयं समुद्गता विस्मयजननी अवस्था? विगतशतवर्षावधि-नुसृताया आधुनिकशिक्षापद्धतेरुत्पत्तेः क्रमविकाशस्य चेतिवृत्तेऽस्य प्रश्नस्योत्तरमनुसन्धेयम्।

द्वितीयो [illegible]सः

रीतेद्[illegible] पत्तिरुपाचेतिश्च

न हि [illegible]र्वतनोल्लासे समासेन वर्णिता शिक्षापद्धतिः इष्ट-इण्डिया-कोम्पानि-नियुक्तानां बृटीश्शासकानामेव प्रयुक्तिः। बृटीशशासन-जनिते निर्भयत्वे लभतां भारतीया शिष्टिर्विशिष्टमेव विकाशम् इत्यासीद् वारेन्-हेष्टिस् महोदयस्याऽऽशंसा। [illegible]पकारार्थं प्रतिष्ठितं तेनैव "कालकाटा माद्रासा" इत्यभिहितं किञ्चित् स्वदेशीयं शिक्षाप्रतिष्ठानम्। किंच यदा त्रयोदशाधिकाष्टादशशततमे खृष्टीये वर्षे, तदाब्दसम्भूत एव "भारतीये [illegible]सनविधौ" अन्तर्निविष्टमभूत् "इष्टीरन् कोम्पानीशासकाः प्रतिवर्षं शिक्षायै निर्दिष्टं धनांशमिति" परिकल्पनम्, तदा तैरेव प्र[illegible]ख्यातः प्रतो[illegible]रूपाणां महाविद्यालयानां संस्थापनसङ्कल्पः व्ययितश्च शिक्षार्थं निर्दिष्टो धनांशः समुन्नतये प्राच्यशिक्षायाः। उत्पाद्यैव वर्त्तमानदशाविशेषं विरतमभूद् यदान्दोलनम् अन्यदेव तावत् तदागतिस्थान[illegible]। वस्तुतस्तु लौकिकशिक्षाभ्युदयविषयकान्दोलने समादरवतां शिक्षितसम्प्रदायानामुत्साहः खृष्टीयधर्मप्रचारकाणाम् औत्सुक्यातिरेकश्चेति विशेषतो विभिन्नादेवोन्नतिस्थानद्वयाल्लब्धोऽनेन प्रसरणारयः।

कलिकातायां तदुपकण्ठे च सन्दृश्यन्ते बहव एव साम्प्रतं कीर्त्तिस्तम्भाः, द्वयोरेवाऽऽन्दोलनयोः प्रारम्भं प्रति यैरा[illegible]ष्यन्ते चेतांसि प्रेक्षकाणाम्। डेभिड-हेयार् इत्याख्यस्य कस्यचिद्

घादकायन्त्रनिर्मा. रिलयडायस्य वणिजः प्रति-ष्ठित तेष्वेका, या हि खलु सम्प्रत्यपि संलक्ष्यते कलिकातान्तःस्थितस्य तन्नाम्नैवाभि-हितस्य कस्याचवुच्चाशद्दालयस्य । "बाराक् पुरस्या" क्रीडस्य तीरान्तरे, नगरात् कियतश्चित् क्रोशान् दूरे हुग्‌लीनद्या दक्षिण-तटस्थितं किञ्चन विस्मापकं हर्म्यं तु तावदपरम्। तत्तु हर्म्यम् ग्भिषेकादिना खृष्टधर्मे दीक्षादाननिरतेन केरि-मार्शमेन्-वार्ड-समाख्यातेन प्रख्यातेन धर्मप्र -त्रिकेणाष्टादशाधिकाष्टादश-शततमखृष्टाब्दे तदानीन्तन एव डेनिस्‌राज्ये संस्थापितम्, यद्यापि "श्रीराम् पुर्कलज्"—इत्यभिधया परिचितं स पर्वायमानमेव शिक्षाप्रतिष्ठानम्।

स्वभावतो धर्मस्य शासनप्र ण एव असमर्था अपि, ये नाम यथार्थखृष्टधर्म्युचितं जीवितमवा कर्तुं प्रसह्य हृदयेन विनियुज्यन्ते तेषामेवैकतम आसीद् डेभिड्‌हेयार्-महोदयः। तत्-समसामयिकेन बाबु-गोविन्दचन्द्रदत्तेन "थेकारे" वचनमुद्धृत्यै-वोक्तं—"न हि स जानाति किं तावदासीद् हेयार्-महोदयस्य मतम्, परं (यथार्थ) खृष्ट- मावलम्बिनो जीवितस्या रूपं किञ्चित् स दधार जीवितमिति।" पक्षान्तरे श्रीराम् रस्य खृष्टधर्म-प्रचारकाणां "वि-फ्रेण्डस्-अफ्-इण्डिया" वार्त्तापत्रेण द्विचत्वारिंश-दधिकाष्टादशशततमखृष्टाब्दस्य जुन्‌मासि मृत्युसम्बन्धिविज्ञप्ता व्याप्तरैः शंसित्वा शिक्षाविषये तस्य प्रोत्साहनमभि-हितम्—"अत्रेदमपि सखे अवश्यमेव स्वीकरणीयं यत् "गस्पेल्" विषये तदीयं स्थिरं वैरं प्राचुर्येण तद्वशं गतानामेतद्देशीयानां तरुणानां मनसि जनयद् विरक्तिं धर्मतत्त्वजिज्ञासा प्रोत्साहयच्च हैतुकतां साधारण्येन कञ्चिद् व्यापकमेवोदपादयत् प्रभावम्, यस्यावसा -त्मिका परिणतिः शिक्षितानाम् आधुनिकानामेत देशवासिनां मते व्यवहारे च सुव्यक्तं चिरं स्थास्यतीति।" दीर्घदर्शितयाऽनया

...मायोपलं ...वितथत्वं, तदितः परं ...स्पष्टी-...। वातिचिरात् येनास्तिकतामहातर...ः पराभूत वङ्गीयो विद्यार्थिसमाजस्तत्म...तः प्रष्टव्यता चेत् डेभिडहेयार महा... यस्यैव स्कन्धे न्यस्येत तदा ...नमशोभनमव तज् जायेत। एतद्धि पुरातन-काचभाजने नवीनमदिरानिवेशनप्रचेष्टनस्यापरि...र्थमेव फलम्। क्रियेत चेदस्य समारोपणं कस्मिंश्चिदपि जने, तदा तु नैतिकान् वा धर्म्यान् वा सर्वान् एव विषयान... समालोचयितुं स...हमाने ज्ञानाय...परि सुमहत्प्रभावसम्पन्ने स्वाधीनमये हि...कालेऽस्य कस्मिंश्चित् विशिष्टशिक्षके ...-वल्-डो...ओ-महोदय एव कर्तव्यं न तु डेभिड्-हेयार्-महोदये।

अथ शशततम खृष्टाब्दे ...हेयार्-महोदयः ...लेभे स्वकर्मणो-ऽवसरम्। अद्यापि कलकत्ता इत्यभिहिते आक्रीडे विद्यमाने तदीये चैत्ये दृश्यते विलिखितम्—"स्वदेशत्वेनैव गृहीताऽनेन प्रवास...मिः सानन्दश्च तत्र विनियुक्तस्तेन चरमो भागः स्वजीवित-कालस्य, ...न परोपकारितया च वङ्गीयानां शिक्षाया नीतेश्च स...तिविधानरूपस्यैकस्यैव व्यापकस्य प्रियस्य च विषयस्य कृते आत्मक्लेशो वा अर्थो वा स्वप्रभावो वा किमपि नासीत् तस्याविनियोज्यमिति।" एतदुद्देश्यप्रणोदितेनैव तेन पठिता वङ्गभाषा, परं तत्राऽऽकलय्य वङ्गभाषायां ...निक-शिक्षा...विषयाणाम्, भाविवंश्यानां प्रतीच्यसाहित्यविज्ञानज्ञान-दानाय ...स्यमानस्य कस्यचि... शिक्षाप्रात...नस्य संस्था...नाय मतिं दधे। अनयाकाङ्क्षया स...पितः स सङ्गं भेजे नगर-स्थितानां ...क्षितानां जनानां..., तैश्च ...एतदुद्देश्यस्य नैतिकस्य बुद्धिविषयकस्य च ...शीलनस्यावधार्तं सर्वेर्द सभी...ध्यानपेक्ष-मेव स्वस्य (हेयार्-महोदयस्य) एव लक्ष्यं ...खतवत। महतो

राजा राममो हनरायस्य परिचिन्तः उदपादयत् । एकीभूता तयोः शक्तिः प्रावर्तयत् सः श्रावेकाष्टदशशततमेऽब्दे 'हिन्दु कलेज्' इत्यभिहितं महाविद्यालयं । "विशिष्टवं .... भाषायाः, भारतीयभाषाणाम्, एशियाखण्डस्य विद्यायाः साहित्य-विज्ञानानां शिक्षणाय स्थापितोऽयं महाविद्यालयः" इति तस्य महाविद्यालयस्य परिचालकैर्विनिर्मितानामेव नियमानामादा-वेवाऽऽसील्लिखितम् ।

आधुनिकरीत्या शिक्षाविस्तारविधौ वैषयिकायां पृष्ठत एव चाऽऽसन् खृष्टधर्मप्रचारकाः । सत्यं विभिन्नम् एवाऽऽसीत् तेषां समुद्देश्यम् । भारतीयानां सविधे खृष्टधर्मस्योपदेशप्रकाशनस्य द्वारतयैव प्राथम्येन जाता शिक्षा तेषां प्रयोजनीया । श्रीरामपुरस्य एकायनैः कर्मिभिः "निउ टेस्टामेण्ट" ग्रन्थस्य प्रथमं संस्करणं सम्पादितं त्रिंशतोऽप्यधिकैः प्राच्यभाषितैः । यश्चि शदधिकाष्टदश-शततमेऽब्दे राममोहनरायस्य इदं साहचर्यं समासाद्य संस्थापित-वान् एकं विद्यालयं महाविद्यालयञ्च, याभ्यामेव च समुन्नते साम्प्रतं "स्कटीश्-चार्चेस्-स्कुल्"—"स्कटीश-चार्चेस्-कलेज्" इत्यभिहिते शिक्षाप्रतिष्ठाने ; तेन विदुषा, ..., राजनीतिनिपुणेन च आलेक्साण्डार् डाफ् महोदयेनापि श्रीरामपुरस्य विख्यातस्यैव त्रिकस्य समनुसृता सरणिः ।

समकालेऽभिः शासनविधिरप्यभूत् प्रभाविता । आङ्गल-भाषाद्वारेण प्रतीच्यविद्यापाठस्य समीहितत्वविषये 'राजा' राममोहनरायेण स्वयमेव प्रोत्साहितः प्रधान .... लर्ड-आमहार्ष्ट-महोदयः "संस्कृतशिक्षारीतेर्निरवच्छिन्नावस्थितिरस्य । तस्य स्वदेशीयानां विद्याध्यप्रतिबोध्य क .... तानि प्रस्तुत तिमिर ...... तानि इति, ... जनमस्य .... वनमेव यतः शासकस्य । इत्थं ततो .... स्य पदार्थविद्याया रसतन्त्रस्य शरीर-

न्यवच्छे शासनस्य अन्येषामपि प्रयोजनीयानां त्वं ज्ञानां च प्रह्लयेनाधिकतर-द्वारं प्रतिबोधक शिक्षापायं अयिष्यत्येव शासक इत्यत्र च पुष्णाति स विश्वासात्तत्व"मित्युद्घोषयत् स समतज्ञभेत एव कस्मिंश्चिल्लेखे।

तदानीन्तनी समवस्थैवैतेषां प्रह्लो-स-कारित्वं ययौ। अय-स्त्रिंशदधिकाष्टादशशततमखृष्टाब्दे भारतीयविधिना प्रधान-शासकस्य संसदि स्थितैः सदस्यैः कस्यचिद् व्यवस्थाशास्त्रज्ञस्य सदस्यस्य संयोजनमनुमोदितम्, तस्मिन्नेव च नवीने कर्मणि प्राथम्येन नियुक्तो मेकले एव त्रयोविंशत्यधिकाष्टादशशतत-खृष्टाब्दे जातायाः "साधारणशिक्षासमिते"रपि सभापतित्वेन निर्वाचितः। पण्डितम्मन्योऽसौ मेकले न्यक्कार-आलमेव व्यकारीत् प्राच्यविद्यां प्रति। पञ्चत्रिंशदधिकाष्टादशशततम-खृष्टाब्दस्य कस्मिंश्चिन्मन्तव्यप्रकाशनपुस्तके शासकसभ्यतयैव संस्थापितं तेन स्वकीयं मतम्; तदा प्रभृति च प्राच्य-शास्त्रविदां प्रतीच्यविदुषाञ्च विचारेषु तत् खलु मन्तव्यप्रकाशन-पुस्तकं प्रामाण्येनैव परिगृह्यते। "काष्ठफलकमात्र एव संस्था-पनीयानि युरोपदेशीयान्युत्तमपुस्तकानि भारतस्य आरबस्य च सर्वैरेव जातीयसाहित्यैस्तुल्यानि। यदि रीतेस्तस्याः परि-वृत्तिर्नैव साध्येत तदा "साधारणशिक्षासमिते"श्छिन्नं भवेत् तस्य बन्धन"मिति घोषणाथाप्तं तं तेन शिक्षाविषयकस्थितेस्तत्र सुदीर्घं विश्लेषणम्।

लर्ड-आमहार्ष्टमहोदयस्यानन्तरगामी लर्ड-विलियम्-बेंटिङ्क इत्युदाहृतः प्रधानशासकोऽभूत् तस्य बलवान् समर्थकः; निर्गता च तदागमनवर्ष एव "शिक्षायै शासकाधीनो धनभागः आङ्गलभाषा-द्वारेणैव युरोपीयभाषायां विज्ञानानां शिक्षणार्थमेव विनियुक्तः स्या"दिति घोषणा। अयस्त्रिंशदधिकाष्टादशशततम खृष्टाब्द एव

इंलण्डदेशे 'राजा'राममोहनरायो ममार, तस्मिन्नेव च वर्षे प्रागुक्त-धनविनियोगासेन्तर्गतात्रयी भारतीयो विधिर्विधिवद्व्यवस्थापितः। परं प्रदर्शितमेव फलं तदुप्तेन बीजेन। बाबु-रामतनु-लाहिडीनामानं कञ्चन सुजनं ब्राह्मणं स्वदलप्रधानं मन्यमानेन ज्ञानस्यालयविततेरुपायोपकल्पनरतेन केनचित् क्षुद्रेण संस्कारकदलेन सानन्दमभिनन्दितः सत्यस्यायं जयः। "ज्ञानान्वेषण" इति "बेङ्गल् स्पेक्टेटर्" इति च पत्रिके विनिर्गते; संघटिता "सोसाइटि-फर्-दि-एकुइसिशन्-अफ्-जेनारेल् नलेज्" इत्युदाहृता काचित् संसत्। तस्यैव वर्षस्य जूनमासेन परिलक्षितं "काल्काटा मेडिकेलकलेज्" प्रतिष्ठानम्, यदीयं समजनि साफल्यम् उच्चवर्णानामपरिज्ञातमृत-देहस्पर्शनं निन्दनीयमिति पुरातनरीतेर्विलङ्घनसाहसात् "हेयार्स् स्कुलतो गृहीतविद्यस्य कस्यचन मधुसूदनगुप्ताभिधस्य, सार्धं त्यानेन मृतनरशरीरव्यवच्छेदनविषये केषाञ्चित् साहसिकच्छात्राणाम्। एवम्प्रकारेण पूर्णरयेण प्राचलद् नवमदिरायाः पुरातनकाचभाजने अवपातनक्रमः। सप्तत्रिंशदधिकाष्टादशशततमे च वर्षे विचारालयेषु पारसीकभाषाया निवारणात्, शासकाधीनेषु सर्वेष्वेव नियोगेषु प्रतीच्यविद्यानामादृता यदुत्तरकाले समादराधिक्यं प्राप्स्यन्तीति, च लर्ड्-हार्डिञ्ज्-महोदयस्य चतुश्चत्वारिंशदधिकाष्टादशशततम-खृष्टाब्दीयाद् विज्ञापनाद्घोषणेन समधिको वेगः।

सार्-चार्लस्-उड्-महोदयस्य चतुःपञ्चाशदधिकाष्टादशशततम-खृष्टाब्दीयेन सुप्रसिद्धेन लेखेन वर्णितां शिक्षारीतिमनुसृत्यैव जातं किञ्चन राजशासनम्। तेनैव चानुशासनेन प्रतिप्रदेशमेकैकस्य "साधारणशिक्षाविभागस्य" प्रतिष्ठापनं विधाय, यथानियमेन परिचालितानां शिक्षाप्रतिष्ठानानां साहाय्यार्थं दानस्य विधिं व्यवस्थाप्य च साधितस्तस्या रीतेर्बहुलो विस्तारः। भारत-मधिवसतः, अमस्य मूलद्रव्यस्य च नियोगस्य विनापि फलानि

शिक्षयितुम्, स्वदेशस्य विभवस्य सं[illegible]ताविषयेऽस्म[illegible] समुन्नतिम् विधातुम्, धनस्य वा[illegible]ज्यस्य च सुखावहायाः समुन्नतेः सर्वानेव गुणान् क्रमेणासन्निधय[illegible] अधिगमयि[illegible] प्रो[illegible]साहितं पुनस्तेन च [illegible]पारेमाणेन प्रादेशिकविश्वविद्यालयाना[illegible] आमीवानु[illegible]लविद्या-[illegible]वेतविद्यालयाना[illegible] संस्थापन[illegible]। परमन्यद्धि शिक्षामार्गाङ्कनं शासकस्यान्यदेव च तदङ्कितवर्त्मनैव समा[illegible]लनपरिचालन[illegible]। वस्तुत[illegible] समा[illegible]लनस्यास्योत्तरश्चेतिहास एव दर्शयति दुस्तरं लब्धोऽनेन स्वक एव कश्चिद् स्योत्कर्षः यस्य नियन्त्रणेऽसमर्था एवाभवन् कर्तृपक्ष्याः। न चाधिगतास्तैश्चतुःपञ्चाशदधिकाष्ट-दशशततमखृ[illegible] लेखेन प्रदर्शिता व्यापिकाः प्रत्याशाः। पर्यस्ता जाता चतुरस्रता प्रयोगस्य, यतो विहाय चिकित्सा-शास्त्रमार्गं सर्व एवाऽऽभ्यासिकाः शिक्षामार्गाः कदाचिद[illegible] न विजहुस्तेषां स्वल[illegible]ताम्। पक्षान्तरे पुनरुद्रिच्यमानया कुसुम-स[illegible]द्धोपलक्षितैर्वृक्षैरिव केवलसा[illegible]त्यशिक्षामार्गैः प्रसभमेव व्यधायि तेषां निःसारता। जातेः परम्परागतः स्वभाव एवात्र कारणमिति [illegible]। हिन्दूनां महम्मदीयानां वा ययो-[illegible]र्योः सम्प्रदायगताः शिक्षारीतयः केवलसाहित्यशिक्षारूपा धर्मविषयावगा[illegible] ययो वा समासंस्ते तु केवलसा[illegible]त्यशिक्षास्वेव कुर्यातां मनःसंयोगमिति त्वपरिहार्यः खलु विषयः। संस्थापित-[illegible]विश्वविद्यालयस्य प्रकारवि[illegible]षोऽपि जातस्तस्यैव भावस्य परिपोषकः। सप्तपञ्चाशदधिकाष्टदशशततमखृ[illegible] समा[illegible] तसम्भवोऽयं विश्व-विद्यालयः [illegible]काञ्चि[illegible]वाधिकोऽभूत् कस्मा[illegible] परीक्षासमाजा[illegible], तदा सर्वा[illegible]येव [illegible]नानि आत्मवशगत्वेनानुभावि[illegible]मू एव तस्य सामर्थ्यसद्भावात्। अशीत्यधिकाष्टदशशततमखृष्टाब्दे चतुः[illegible] [illegible]दशशततम[illegible] ष्टाब्दस्य राजनीत्य[illegible] सार्था गृही-ताना[illegible] पायानां फलेषु कस्यचिद् [illegible]जनिर्वाचितसभा[illegible]पवस्य

परी प्र विषयतां गतेषु विश्वविद्यालयप्रदत्तो पाधिदान समाको ग्रीपत्वेन, अनसवा प्रातः ... पाविडत्य कस्याऽऽजीवस्य च मुद्रात्वेन परि हीतानि। अन्यच्च, एवंविधोपपद-प्रशंसा-पत्रावाप्तिरूपा शिक्षाविषयिणी विशिष्टता कश्चिन्निर्दिष्टं ...मात्मकं गरिमा ...प्यावि...त इति विवा पशो त धिकारिणामार्थकतर-मूल्यदर्शनादेव वक्तुं शक्यते।

द्व्यशीत्यधिकाष्टादशशततमखृष्टाब्दीया राजनिर्वाचिता सभाऽपि विस्मयं गतवती रीतेरस्याश्चतुरस्रताया अभावरूपादपरस्मा पि कारणात्। ...लिता च तयाऽस्या गुरुशीर्षता। ...स्यापि ...तेषु जनेषु माध्यमिका ...षाया उच्चशिक्षायाश्च कृते भाव-विशेषम् सौदासीन्योपेक्षाकक्षास्वेव निपतिता प्राथमिकी शिक्षा। अचेष्टतैव सा राजनिर्वाचिता सभा दूरीकर्तुमेतान् देदीप्यमानान् दोषान्। कृताश्च तया प्राथमिकशिक्षाया महते विस्ताराय कल्पिष्यमा...ः प्रस्तावाः। स...पस्यापिताश्च ...स्तथैवापरे केवल प्रस्तावाः ये तु उच्चशिक्षाविषयकोपपदलाभाय द्रुततरं प्रचीयमानस्य ...प्रवाहस्याहाम वेगं नियमयन्तः कश्चिद ... तस्याऽऽजीवानु-कूलासु प्रणालीषु स...रयिष्यन्ति।

अधुनापि पूर्वाधिगतमेव स्वं वेगमाश्रित्य प्रधावन्त्याः, ...यन्त्र...थ कर्तृपक्ष्योद्भावितैः सर्वैरेव प्रयत्नैरप्रभाविता ...स्तस्या रीतेर्नान्यदस्ति किञ्चन प्र...स्ततरं व्याख्यान..., द्व्यशीत्यधिकाष्टादश-शततमखृष्टाब्दस्य राजनिर्वाचितसभायाः प्रशं...नीयस्योद्यमस्य सम्पूर्णरूपेण ...फलताधिगमात्। वाणिज्याविषयक...लनेषु केवलशा...ोद्योतरेषु च ...नसम्पादनारम्भे ...तद्योग्यान् समर्थान् विधातुम् उच्चशिक्षालये ...कस्या... ...शिक्षासरणि...पस्य प्रवर्तनायैव गृहीताः प्रस्तावा वैयर्थ्यं गताः, परं तदव्यवहिते विंशत्यां सं...रेषु प्राथमिकशिक्षाया विस्तारे ...तीयस्सरोप-

शिक्षाया विस्तारत आपे ...को भवन तत्रैव परिलक्षिता ; प्रकर्षं नीतश्च द्वितीयस्तरीयाशिक्षाया उत्कर्षातिरेको द्वितीयस्तरीयेषु विद्यालयेष्वपि उन्नततरप्रकाराणां सम्भूतिश्च प्रारब्धमाणाणां त... जाता-यानां विद्यालयानां सम्भूतेरानुगुण्येन सु... ऽऽसीत्। मौलौ चास्याः शिक्षायाः समदृश्यत काचित् प्रवृद्धिः, प्राधान्येन सर्वतोभावेन वा छात्रदत्तवेतनमात्रोपजीविनाम्, विश्वविद्यालय ... छात्र-परीक्षायै ... प्रतिष्ठानरूपेण न पुनर्वस्तुगत्या विद्याधिगमस्थानतया प्रवर्धमानाना..., विनैवाऽऽङ्ग्लदेशीयानां साहाय्यमाङ्ग्लशिक्षावितरणनिरतानाम्, शिक्षार्थं द्वारीकृतां भाषां स्वमातृभाषितमिवोदीरयितुं समर्थानाम् अध्यापकानां जातुचिदपि संस्पर्शमलभमानै...तैराकीर्णानां म... विद्यालयानां संख्यायाम्। सत्यं द्व्यधिकोनविंशतिशततमखृष्टाब्दस्य राजनिर्वाचितायाः सभायाः प्रयत्नेन साधिता रीतेरस्याः केचनोत्कर्षाः, परं सापि राज निर्वा...चितसभा द्व्यशीत्यधिकाष्टादशशततमखृष्टाब्दस्य राजनिर्वाचिता सभेव निष्प्रभावैव जाता प्रतीच्यशिक्षाशिक्षितानां केवलसा... त्यशिक्षामार्गावलम्बने बद्धपरिकराणां छात्राणां प्रवाहम् अन्याभिः प्रणालीभिः प्रवर्तयितुम्।

भारतस्य प्रतीच्य-जगत्याः संस्पर्शलाभस्य परि...तिरूपाया भारत... मैवानुगताया ...शिक्षापद्धतेरयमव संक्षिप्त इतिहासः। ... च तस्या रीतेः प्रवृद्धताया इदमेव स्वरूपम्। यस्या जातेर्मतिप्रकर्षो भृशं विभिन्नादेवेतिहासात् पारिपार्श्विकावस्थायाश्च जातस्तस्या एव जात... शेनैव प्रकारतो विभिन्नानां ...तनतमानां केषाञ्चिदादर्शानां सम्म...थानाञ्चोत्तराधिकारिणा..., बहुसंख्यकानां जनानां संस्कृतिं ल...चीकृत्याविज्ञातचरस्वरूपं किञ्चित् परीक्षणमेवो... पादितमनया शि...क्षणालयेष्वविसंवादितोऽयं विषयः। सुकरमेवास्याः ...पद्धतेः सविस्तरं दोषवर्णनम्, यतः स्वयमेवानया

स्वीक्रियते परिस्फुटं स्वकं विज्ञानम्। "वर्णयतैतत्सदृशं किञ्चनाऽपरं परीक्षायां यस्य विषयतां गता यूयमेवे"ति भाषमाणोऽस्या रीतेरुत्पत्तेर्विकाशस्य चेतिहासस्यानभिज्ञः कश्चन वैहासिको मन्यतां नामाऽऽत्मानं दर्पभुक्तम्। स्वेषाम् आभ्यन्तरवैकल्येषु शनैः शनैर्वैदेशिकैरधिकृतस्य प्रदेशस्यापि तस्याः प्राथमिकविद्यालयशिक्षासमापनानन्तरमपि पिपठिषवश्च, तैरेव वैदेशिकैस्तेषामेव भाषाम् अतद्विद्भ्यः सौदासीन्यं शिक्षाऽनिरतेभ्य एव जनेभ्योऽध्येतुं प्रसह्य नियोजिताः; ततश्च तैस्तेषां संवर्धने सम्यक्परिचिताः, स्वदेशीयैः शिष्टिसंस्कृतीतिहाससम्प्रदायसाम्प्रदायिकजीवितैश्च सम्पूर्णरूपेणासम्बद्धाश्च विषया वैदेशिकभाषयैव कयाचिदनभ्यस्तया च रीत्या केषुचिद्दूरभूमिष्वेव संस्थापितेषु वैदेशिकेष्वेव विश्वविद्यालयेषु प्रविश्यैवाऽऽसन् शिक्षितव्याः।

गतानि साम्प्रतं तान्येव थामलानि शस्यक्षेत्राणि। पूर्वानुभूतस्य सुखस्य स्मृतिः साम्प्रतिकस्य निरवच्छिन्नदुःखदा[illegible]स्यावसाद-श्चैव[illegible]ते।" कुतः समागतेयं दीनता मूर्तिवा ? प्रश्नस्यास्य यदुत्तरं तेन परिकल्पितं तदेवोत्तरं तस्याभिभाषणस्य गौरवजनने हेतुः। [illegible]ङ्गेन बहुधा बहुभिरुपायैश्च कृतं तेनैतस्य विघोषणम्। "साधितमस्माभिः स्वजातीयानां विजातीय[illegible] विस्मृताश्च हृदयेनाभ्यनुज्ञाताः पूर्वतना आदर्शाः। विगतशताब्द्याः क्रियेत चेदनुधावनं तदा तस्या अस्पष्टाभिर्भीषणाभिः पिशाचाकृतिभिर्जुष्टत्वं नूनं प्राकट्यं लभेत। अतः खलु पुनरप्यहं ब्रवीमि वयमेवात्र दूषणीया इति। नष्टमधुनाऽस्माकं पुरुषत्वम्। [illegible]रुषत्वहीनानां नो जीवितधारणाधिकारं विना विनष्टाः सर्व एवाधिकाराः। मन्दभाग्यैरस्माभिर्विदेशीयानां वणिजां वेदिकायामस्माकं वाणिज्यं कृषिकार्यं शिल्पञ्च सर्वाण्येवैतान्युपायनीकृतानि। भग्नमस्माकं गेहस्थितं तर्कुण्या समं सूत्रनिर्माणचक्रम्, कर्तितमस्माभिरास्माकीनं पाणिपादम् श्वासावरोधेन घातितञ्च स्वकीयायामेव दोलिकायां स्थितं भाग्याधिदैवतम्।"

बृटीशागमनात् पूर्वं समनुभूतानां शान्तिस्वाच्छन्द्यादीनां सुचारु वर्णनं जातीयतावादिनां वक्तॄणां यतः साधारणी सम्पत्तिर्जाता, ततस्तद्[illegible] किञ्चिदत्र विवदिषामि। कर्षकसमाजपरिलालितः साहित्यविशेष[illegible]वैतासामैतिहासिकविच्युतीनां मन्ये संशोधनाय सुष्ठु कल्पिष्यते। बहुशताब्दीर्यावत् पूर्ववङ्गीयकर्षकसमाजानां वंशपरम्परया गीयन्ते खलु कानिचिद् गीतानि। तानि तावद् गीतानि ग्रामस्थितैः कविभिर्देशस्य ता[illegible]कालिकीमवस्थामवलम्ब्यैव विरचितानि। व[illegible]यसाहित्यगतानां रत्न[illegible]नां जगत्या सह परिचिति-[illegible]पादयितुकामेन राय-[illegible]सेन-बाहादुरेण तेषु गीतेषु कानिचि[illegible] संगृह्या-[illegible] च साम्प्रतं प्रकाशितानि। तेषु पुनर्दीनेश-

चन्द्रसेन-सङ्कलितेषु गीतेषु विख्यातस्य केनाराम-दस्योः कथा प्रधाना। काव्यनिर्माणकौशिल्याच्चन्द्रावत्या मनोहारिणी कृतिरियं षोडशशताब्द्याश्चरमे भागे जातानां विषयाणामैतिहासिकत्व-प्रतिपादनायैवाऽस्तु सम्पादितेति गीतसंग्रहप्रकाशकेनैव प्रतिपादितम्। अतो बृटीशागमनात् पूर्वं स्थितस्य दास्यमहोदयवर्णितस्य सुखमयकालस्य नूनं यथायथं वर्णनमास्ते तस्यां चन्द्रावत्याः कृताविति दृढमस्माभिर्वक्तुं शक्यते।

राजद्रोहेण संपीडितस्य विपन्नस्य च कस्यचिद्देशस्य, शून्यीकृतानां वेश्मभूखण्डानाम्, अस्तव्यस्तशासने स्थितानां क्लिष्टानां भयविप्लुतानां जनानाञ्च वृत्तं सम्यक् समुद्घाट्यते केनारामकथया। दस्युभयेन धरणीगर्भे रक्षितव्यमासीत् तदानीं जनानां धनमिति चन्द्रावत्यैव गीतम्। "रज्जुनिर्मितकण्ठपाशैः श्वासावरोधेन दस्युभिर्घातिताः पथिकाः पथिषु। 'काजी'नां शासनाधीना ग्रामाश्च प्रपेदिरे निर्मक्षिकत्वम्।" केनारामस्य कार्याणि वर्णयन्त्या तया तावदेवमभिहितम्।—"तद्भयाद् वृक्षस्य पर्णान्यपि चकम्पिरे। गेहं सोऽस्मदीयं पश्येदिति भीत्या न केनापि रात्रौ प्रज्वलितः प्रदीपः। सन्ध्यासमागमानन्तरं न कोऽपि भवनान्निर्जगाम।" दिवसं क्षेत्रेषु भ्रमित्वा सन्ध्यायां प्रदीपिकादीपितं स्वं मन्दिरं प्रविश्य सानन्दमगायत् कर्षक इति यत् सोत्साहं वर्णितं दास-महोदयेन मन्ये म-गौरवलिप्तमस्य किञ्चन भाष्यम्।

दुर्भिक्षं बृटीशशासनस्य फलमिति यदुक्तं सानुगेन दासमहोदयेन तदप्येतेनैतिहासिकेन गीतेन नानुमोद्यते। वङ्गेषु परिदृष्टानां दुर्भिक्षाणां ---- भीषणेन दुर्भिक्षेण तत्काले समाक्रान्तोऽभूद् मैमन्सिंह-प्रदेश इति चन्द्रावत्यैव काव्यनिर्मात्र्या सम्बुद्धोघितम्। सुस्पष्टं वर्णिता च तया तस्य दुर्भिक्षस्य भीषणता। "बहूनां गृहिणां गृहाः करालस्य क्लेशस्याऽऽवासत्वं दधिरे, शतशो नरा नार्यश्चाम्रियन्त।

विक्रीताः पतिभिः स्त्रियः पुत्राश्च स्त्रीभिः। [illegible] तदा सर्वे स्नेहा आचारा भावाश्च। नरास्तदानीं तिर्यञ्च इवाऽऽ[illegible]न्वेषणाय दिवसेषु स्थानात् स्थानान्तरं बभ्रमुः।

शस्यपूर्णः [illegible]र्मानसिकेन सन्तोषेण च तुष्टो वृटीशागमनात् [illegible]र्ववर्तिकालोऽप्यन्तरान्तरा दुर्भिक्षादिभिः पीडितोऽभूदित्यत्रास्त्येव तावदतः प्रमाणम्। यद्यप्येतेषां गीतानां मौलिकमा[illegible]र्यस्य कालवशा[illegible] कथञ्चिद्विपर्यासो जातस्तथाप्येतेषां सयत्नपठनेन दाश-[illegible]तिहासस्यो[illegible]कर्षविशेष एवाभविष्यत्।

साम्प्रतं दाश-[illegible]दयस्य वचनानि पुनरालोचयामः। ग्रामाणां ग्लान्यादिकं वर्णयित्वा नगरावस्थावर्णने सञ्जातेच्छः स तात्कालिकीं वाणिज्यपरायणतां भृशं निनिन्द।

युरोपस्य वाणिज्यपरायणता तावत् कञ्चनाभिशप्तो विषयविशेषः। खृष्ट[illegible]विलम्बिभिर्युरोपदेशवासिभिर्द्विशतवर्षाणि यावद्वमत्य 'क्राइष्ट्'मतं वाणिज्यपरायणतैव पूज्यते प्रवृत्यते च क्लेशसंकुले वर्त्मनि। प्राकारस्थिते[illegible] लिखितेष्वभिनिवेशदानं किमासीत् तेषामसाध्यम्? गाढेऽन्धकार एतस्य वाणिज्यपरायणतारूपस्य दानवस्यान्वेषणमपि नाम तेषां समुचितं कर्म? अस्माकं मनोवृत्तौ कदाचिदपि नासीन्न भविष्यति वा वाणिज्यपरायणतायाः स्थानमित्येत[illegible] सततं सर्वथैवास्माभिः स्मरणीयमेव। क्रियेत चेदस्माभिरस्माकं देशे वाणिज्यपरायणतायाः प्रतिष्ठापनम्, तदा स्वैरे[illegible]स्माभिर्वञ्चितो भवेत् स्वेषां [illegible]ः। महाकाया दानवा इव पण्यनिर्माणस्थानानि तेषामनु[illegible]यमानानां नो जीवितानां निष्काशनं विधास्यन्ति। पण्यनिर्माणस्थानानां विशालाभिश्चक्रधाराभिः परिपीड्यमाना [illegible] वयं प्राणहीना यन्त्रविशेषा इव भवामः। एवं प्रकारेण [illegible] [illegible]णतल[illegible] सं[illegible]मेत्य लिहन्तोऽस्मान् [illegible] [illegible]ष्यन्ति [illegible] धनिनः।

भूतं खल्वेव प्रतीच्यशिक्षापद्धत्याऽनया संयन्त्रिता अस्मद्देशवासिनः। गुरुगृहात्, गार्हस्थ्यधर्मशिक्षाप्रतिष्ठानात्, यात्राभ्यः, कथकताभ्यः, चण्डी-रामायणविषयकेभ्यो गीतेभ्यः, संकीर्तनेभ्यः स्त्रीजनानुष्ठितव्रतेभ्यश्च जनानां हितकारिण्याः शिक्षाया विस्तारो जातस्तदानीम् आर्यावर्तस्य सुखसमृद्ध्यादीनां समये। अपरे आदर्शा इव शिक्षाया आदर्शोऽपि समधिगतः साम्प्रतं दारिद्र्यं नीचताञ्च। निर्मितोऽस्माभिरिदानीं विशालः कश्चिद्विश्वविद्यालयः। परम् स्वभावविरुद्धाया अस्याः शिक्षापद्धत्या जायन्ते जनिष्यन्ते च बहव एव तावद् दोषाः। शिक्षापद्धत्याऽनया अनावश्यकस्याऽऽङ्गलभावस्य निवेशनं क्रियतेऽस्माकम् आचारेषु वर्तनरीतिष्वपि। तेन च हेतुना आधुनिकशिक्षाप्राप्तो वङ्गीयो जनः प्रतीच्यशिक्षामनासादितवतां स्वदेशीयानां [illegible] इव प्रतीयते। अनयैव तावद्रीत्या नश्यति खलु वङ्गानां मतिप्रकर्षोऽपि। अपरेषु देशेष्वपरासु जातिषु वा भवतु नामेयं रीतिः सम्यक्तया प्रयोज्या तथापि वङ्गेष्वस्याः प्रसारोऽनपेक्षणीय एव। कर्दमनिर्मितः पादयोरुपरि स्थितः प्राणहीनः प्रतिकृतिविशेष इव निःसारेयं रीतिर्जातीयशिक्षामन्दिराद् भङ्क्त्वा दूरीकरणीया। नवीनतयोज्जीवितमस्माकं जातीयभावं यथार्थज्ञानलाभस्य वर्त्मसु परिचालयितुं यदि नाम वयं पुष्यामोऽभिलाषम्, तदा द्वारीभूताभिरस्मद्देशीयाभिरेव प्राकृतभाषाभिः शिक्षायाः प्रसारोऽस्माभिः साधनीयो न त्वहितावहेनाऽऽङ्गलभाषाद्वारेण। साम्प्रतमस्माभिर्या नाम शिक्षा लभ्यते सा त्वन्यस्माद् गृहीताऽनुकरणेन लब्धा च। जातीयमतिप्रकर्षेण समं तस्याः शिक्षायाः सहकारिताऽभावाद् अस्माकं मनोवृत्तेः समुन्नतिसाधने सा सर्वथा निर्वीर्या जाता।

वैदेशिकराजनीतेरनुकरणात् तेषां स्वकीयायां राजनीतावपि नाऽऽसीत् सारः सत्यं वेदवृक्षोपितं वाग्मित्वं [illegible]। प्रतीच्य[illegible]

सर्वमेव तैर्गृहीतम्। ग्रहणावसरे [illegible]मेको मुख्यो विषय-[illegible]ः। आतुचित् तैर्नो निपातिता स्वेषां दृष्टिः स्वदेशं प्रति। नवा तैर्विचिन्तितः कदाचिद्वा वङ्गानां विषयः। नाऽऽलोचितश्च तैः [illegible]नजातीयेति[illegible]स्यातीतो वर्तमानो वा दशाविशेषः। अतस्तेषां राजनीतिकसमान्दोलनम् असारं निरर्थकं जनानामैकान्तिकेनाऽऽग्रहेण विवर्जितञ्च जातम्। शि[illegible] जनानां हृदये गाढमुत्तोऽभूदाङ्गलभावः। पठितं चिन्तित[illegible] तैराङ्गलभाषयैव। अकिञ्चित्[illegible] अकृत्रिमेषु वस्तुषु समादराधिक्यं पुष्यन्तः स्वदेशस्य साधारणा जनाः प्रत्यादिष्टा आङ्गलभावानुप्राणितैर्जनवर्गैः। एवं रीत्या वाणिज्यं शिल्पं शिक्षा राजनीतिः समाजिकविधिश्चेत्येतेषु सर्वेष्वेवेदानीन्तनेषु विषयेषु दृश्यन्त एवाऽऽङ्गलभावस्य चिह्नानि। आङ्गलभावस्यानुकरणं साम्प्रतमस्माकमावेशविशेष एव। अस्माकं जीवितस्य सर्वेष्वेव वर्त्मसु चेष्टितेषु च सर्वत्रैवाऽऽलोक्यन्तेऽस्माभिस्तस्य कृष्णाः पदाङ्काः। उपकल्पितान्यस्माभिर्देवा[illegible] स्थाने सभागृहाणि। रङ्गमञ्चेष्वभिनीय आनन्दानुभूतेः पण्यतां विधाय चास्माभिरद्यानुष्ठीयते दानधर्मः। गुटिकापातक्रीडा[illegible]भिः क्रियतेऽस्माभिरनाथालयानां सहायता। देशीयं स्वास्थ्यप्रदं क्रीडादिकं वर्जयित्वा विदेशीयाः क्रीडा अस्माभिः प्रवर्तिताः। वेशे चिन्तायां भावे संस्कृतौ चास्माकं साङ्कर्यं जातम्। नच न दृश्यते जन्मविषयेऽपि तत्साङ्कर्यानयनायाधुना मदविक्षिप्ता चेष्टा।

अवतारितवाक्यानां संख्यानं यथेच्छं वर्धयितुं शक्यते, परं, कश्चिन्मन्यं नीतिविशेषञ्च प्रचारयितुं वाग्मिवरेण तथा कृतमिति प्रदर्शनाय मन्य एतावन्मा[illegible]लं स्यात्। वङ्गानां प्राचीनयाऽवस्थया [illegible]चनीयमेव वैसादृश्यं बिभर्त्ति तदीया साम्प्रतिक्यवस्था। प्राच्यप्रतीच्यादर्शयोः पारस्परिकसङ्घर्षोत्थितैर्धूलिभिरन्धीकृतैर्जनैः स्वोपास्यानि दैवतानि वि[illegible] दैवतानां वेदिकासु

समनुष्ठिताद् बलिप्रदानादेव समुपस्थितोऽयं व्यसनसम्पातः। परं तत्रैव नाभूद् विरतः स वक्ता। कथं जना उत्पथं नीयन्ते स्मेति प्रश्नस्य श्रोतृवर्गाणां सविधे समाधानं कृत्वा दुर्निमित्तानि विशेषेण तेन प्रदर्शितानि। तेषु दुर्निमित्तेषु जनानां दृष्टिं समाकर्ष- स सिद्धः पुरुष इव लक्ष्यावाप्तेः पन्थानं प्रदर्शयांबभूव। कथं ते विदेशीयान् आदर्शान् अधिगन्तुमस्या लोलुपताया वशं गताः? वङ्गेष्वाङ्गलदेशीयानामागतिसमयेऽवसन्नास्तावदासन् वङ्गदेशीयाः। क्षीणतमासीत् तदानीं तेषां जीवनीशक्तिः, निरर्थकानां भ[illegible]डलाना- माचरितेन विलुप्तो दयाधर्मोऽवाहसत् तेषां पूर्ववृत्तम्। धर्मस्येव ज्ञानस्याप्यवनतिर्जाता। स्मृतिविषयतां गतास्त[illegible]नीं नवद्वीपस्य प्राचीनस्य यशसो वैदुष्यस्य च सम्प्रदायाः; अतः खलु सर्वेषां दुर्बलानामिव तेषामपि जातस्तदा तथाविधः कश्चनावस्थाविशेषः। स्वेषां निःसारतैव तेषामाङ्गलशासनस्वीकरणे बीजम्। आङ्गल- शासनस्वीकरणेन सममाङ्गलदेशीयानां शिष्टिसंस्कृतिविलासादिकं सर्वमेव तैः परिगृहीतम्। परं प्राप्तावसरैः साम्प्रतं वर्जनीयं खलु तैस्तदा[illegible]वस्तुष्वाकर्षणम्। प्राचीनासु वेदिकासु पुनरपि संस्थापित एव वह्निः केनचिज्जातीयेन सिद्धेन। कृत एव वङ्किमेन मातृभूमौ मातृत्वस्याऽऽरोपः। समग्रामेव जातिं समाम[illegible]्य तेना- भाणि "सुजलां सुफलां मलयज[illegible]ीतलां शस्यश्यामलां मातरं वन्दस्व, स्थापय च तां स्वेषु भवनेष्विति।" समयः स व्यतीतः। अधि- कोनविंशतिशततमात् खृष्टा[illegible] स्वदेशितायाः श्रूयते पटह- निनादः। चण्डवात इव समुपागतः स्वदेशीयान्दोलनप्रवाहः। विपुलो जलोच्छ्वास इव स्वदेशीयान्दोलनप्रवाहः सरभसं प्रविश्य सर्वाणि [illegible] विक्षिपंश्चाद्यापर्यन्तं [illegible]तां काञ्चन जीवित- शक्तिम्। अस्य सञ्जीवके प्रभावे स्थितैर्वङ्गीयैः पुनर[illegible]तं स्वदेशस्य वक्षसि निरन्तरं प्रवहति शिष्टि-संस्कृत्योः स्रोतस्यवगाहन[illegible]खम्।

तेषां आर्तिर्भेत ास्य यथार्थसम्प्रदायविच्छेदं नरा्वनुभवितुं जातास्ते तथा योग्याः। नवीनतया प्रबुद्धस्य वङ्गानां जातीयजीवितस्य यथोचितं संपूर्णं चोन्नयनं कथं स्यादित्येव ऽऽसीत् तेषां तदानीन्तनः समालोचनीयो विषयः। पुरोहित इव सिद्धः पुरुष इव वा प्रदर्शितस्तैः तस्य मार्गः। गुणागुणविवेचनोचितेऽस्मिन् जातिनिर्माणकाले समूलमुन्मूल्य युरोपीयमसंयमस्याऽऽदर्शं दूर एव स तैर्निक्षेपणीयः, इदं श्रयणीयश्च प्रश्नस्य प्राच्यदेशजातस्य स्वार्थत्यागस्याऽऽदर्शः। शिक्षासंस्कृतिविषयिणी कृषिवाणिज्यविषयिणी वा समस्या पुरातन्यैव रीत्या तैः समाधेया। एतेषां विषयाणां प्राचीनसामाजिक-पद्धत्या सम्बन्धोऽपि विवेचनीय एव। नहि तावदेतावतैवालं भवेत्। विचिन्तनीयश्च तैस्तेषां चिन्ताभिप्रेताभिः कार्यैश्च धर्मविषयकप्रश्नस्य सूक्ष्मः सम्बन्धः। एते तावद्विषयाश्चेत् तेषां मतौ नावतिष्ठेरन् तदैतेषामपि विषयाणामसत्यताज्ञानस्य जायेत नूनं काचित् सम्भावना। ग्रहणीयस्तैः स्वजातेर्मतिप्रकर्षस्यानुकूलो विषयः, वर्जनीयो दूरे निक्षेपणीयश्च सर्वो विदेशीयो विषयः। तैः पूर्वं समनुभूता तेषां शक्तेः स्थिरा निरन्तरा च योनिस्तत्रापि तेष्वेवाऽऽसीन्निहिता। अद्यापि पूर्ववद् वङ्गानां वेगवत्यो विशाला नद्योऽप्रतिहतेन रयेण सागराभिमुखं द्रुतं धावन्ति। प्राचीनकालस्य समुच्छ्रितः स हिमालयोऽद्यापि पूर्ववदेव गगनं परिचुम्ब्य तिष्ठति। जगतो येषां स्थायिनां भावानामुपरि वङ्गानां जीवितं मनोवृत्तिश्च प्रतिष्ठामलभेताम्, तेषां स्थैर्यं निर्विकारता गौरवञ्च तावदद्यापि तथैवाऽऽसते। गतजीवितानां वङ्गानां पूर्वावस्थाप्राप्तिं पुनरुज्जीवनञ्च तेषां मृतस्याऽऽत्मनः साम्प्रतं वङ्गीयानामेव कर्म।

वाष्पीययन्त्राणां प्रवर्तनात् पूर्वं सर्वेष्वेव देशेषु परिदृश्यमानेन शिल्पनिर्माणकौशलेन कर्मरूपेण [illegible] नीतिनार्थशास्त्रविषयकेण मतेन नास्ति मेऽन्न कोऽपि सम्बन्धः। वक्तुर्मनसः परिचय एतेन

लभ्यत इत्येव तावदभिभाषणस्य यथार्थगौरवकारणम्। जातीय-विद्वेषेण प्रभावितमभूत् तस्य जीवितमिति स्पष्टतयैवास्माज् ज्ञातुं शक्यते। जातीयवैरपोषणमेवाऽऽसीत् तस्य लक्ष्यमित्यत्र नास्त्येव तावत् सन्देहलेशोऽपि। सत्यं वङ्गीयतरुणानां मनसि प्रविष्टस्य नैराश्यस्याधैर्यस्य च भावानां बाह्याकारतया [illegible] वर्णितो वैप्लविकोऽपराधस्तेनैव दूषितः। जन्मभूमेः सेवायै महती प्रबला च वासना साम्प्रतिकेन राजतन्त्रेण [illegible] सती जनयत्यता-प्यधैर्यस्य नैराश्यस्य च भावान्। परं दाशमहोदयेनान्यैश्च स्थापित-मिदमेव तावन्मतम्। मतस्यास्य प्रचारणं तावद्वाक्स्वातन्त्र्यस्य विधिविरुद्धपरिवर्जनं [illegible] प्रशस्यमेव। वाग्मितायाः शक्त्याऽनायासेनैव वशं नीयन्ते वङ्गीयाः। [illegible]निर्वर्णिताऽतीतगौरवकथा तेषां [illegible] दारुणमवोद्दीपयितुमलम्। यस्मिन् समये प्रेट्ब्रिटेन्-देशीयैर्गृहीतमिदं हितकरं भारतशासनकर्म तत्कालस्य भारतीय-जीवितस्यानुज्ज्वलांशो भाषणास्वपि काल्पनिकासु व्यतीतप्रशंसासु नैव निवेशितो दृश्यते। वेदानुमोदितमिति ब्राह्मणैः कीर्त्यमानं क्रूरं सतीदाहविधिमनुसृत्य यत् तैर्दग्धाः संख्यातीताः सजीवा नार्य-स्तासां मृतानां भर्तॄणां चितासु, तस्य नोल्लेखस्तत्र परिदृश्यते। भवानीपूजनमिषाद् दस्युतयाऽनुगम्यमानं श्वासावरोधेन नरघातन-म[illegible]वतां ठगाना[illegible]प्लववार्तायाः, देशस्यांशविशेषे बालिकाहत्या-रूपस्य निर्घृणशिशुहननविधेर्वा नास्ति तत्र समुल्लेखः। केनचिद् ब्रटीशेनैव प्रधानतमराजप्रतिनिधिना निवारितः सतीदाहः, षड्वर्षा-भ्यन्तरे द्विसहस्रसंख्यकानां ठगानां दण्डं विधाय केनचिद् ब्रटीशे-नैव दूरीकृतो देशस्य भयङ्कर उत्पातः, केनचिद् ब्रटीशेनैव पुनः शिशु[illegible] विनोचितो भारतस्य तनुव्रणः। ब्रटीशानां सानु-क्रोशविधेः प्रवर्तनात् पूर्वमपराधिषु कामचारतः प्रयोज्या अङ्गकर्त-नादिरूपा नानाप्रकाराः क्रूरा दण्डाः साम्प्रतं विस्मृता भारतीयैः।

चिरं विस्मृताश्च तैस्तेषां पिण्डारिजातीयानां करालाः करवालाः, यैस्तावत् पि[illegible]दे[illegible]स्योपरि निपत्य स्तूपीकृतैर्भस्मभिः, विध्वस्तैर्गेहैः, आर्तानां विपन्नानाञ्च नरनारीणां क[illegible]स्वरैः, रक्त-पिपासया घातितानां जनानां मृतदेहैश्च पूरितः स्वेषां गमन[illegible]र्गः। अ[illegible]वतैतेषामेव विषय[illegible]ां कृते विंशशताब्द्या अपि श्रोतृवर्गः सि आर् दाश-[illegible] तत्सहकर्मिणाञ्च वाचस्पत्येन विमुग्धो जातः। [illegible]टीशशासन तावन्नैवाभविष्यदेतेषां सम्भवः। बृटीशा-गमनात् पूर्वं भारतमासी[illegible] [illegible]खशान्त्यादीनां निवासोऽधुना पुनः प्रतीच्यस्य मारात्मकच्छायायां दुःखदारिद्र्यक्लिष्टं तद् वैवर्ण्यं मालिन्यञ्चाधिगच्छतीति तैर्मन्यते।

द[illegible]मोल्लासः

आनन्दमठः

अर्वाचीनकालीनस्य धर्ममार्गिसमान्दोलनस्यौ[illegible]पिकस्वभावता पूर्व[illegible]सम्यग् वर्णिता। वङ्गीयवै[illegible]विकान्दोलनस्य प्रधानाः प्रवर्तका यैर्धर्मानुशासनैस्तद् वै[illegible]विकान्दोलनं योजयि[illegible] तस्य साहित्यञ्चेत् सुष्ठु समालोच्यते, तदा तानि धर्मानु[illegible] [illegible]स्युः। लेखाः शासनानि [illegible] पत्रिकाश्चेति [illegible] वै[illegible]विकलेखप्रमाणानि "ॐ" इति हिन्दूनां प्रार्थनाक्षरेण वि[illegible]षितशीर्षा[illegible]यासन्। गूढार्थेन तेन प्रणवाक्षरेण प्रायेण साहचर्य[illegible] अहभ्यत "वन्दे मातरम्" शब्दस्य।

द्वयोरेतयोः प्रार्थनमन्त्रयोः प्र[illegible]वज्ञातविशिष्ट[illegible] समं सर्वेषामेव हिन्दूनां मनःसु विराजते। "ओमित्येतदक्षरमुद्गीथमुपासीत" इति खलु छान्दोग्योपनिषदः प्रारम्भकं वाक्यम्। एतदक्षरसमाहितचित्तस्य जनस्य मनसो बाह्यविषया विनिवर्तन्ते। ओमित्यक्षरेण विना सर्वैरन्यैर्विषयैर्यावन्न रिक्तं भवति तस्य मनस्तावदनु[illegible]यते तेन काचिन्मानसिकी सुषुप्ति[illegible]। तदक्षरं तदानीं सर्वाति[illegible]थिना सर्वगतेन परमात्मस्व[illegible]पेण [illegible]त्मना परिणमति। परमात्मनो ज्ञानात् "जीवात्मना परमात्मनो ब्रह्मणस्ता[illegible]त्म्य"मिति वे[illegible]शनस्य मूलतत्त्वं लभ्यते। अत ओमित्यक्षरं भार[illegible]थाना-मनितरसाधारणस्य श्रद्धाविशेषस्य (हिन्दुमते ज्ञानस्य) उद्बोधकम्। वि-सि-पाल-महोदयमते अद्येयं खलु हिन्दूनां जातीयजीवितस्य

परमोऽयं [illegible] ।भोन्तनैर्भारतीयैर्जातिनिर्मातृभिः सर्वथैव स्मरणीयोऽयं विषयः ।

परं भारते धर्म-[illegible]र्शनयोर्मध्ये दृश्यते खल्वविनश्वरः सम्बन्धः । जातीयसमा[illegible]लनस्य मूर्धनि स्थितम् ओम् इत्यक्षरं यथा जातीयदर्शना[illegible]था मुद्रया तद् विशेषयति, तथा "वन्दे मातरम्" ध्वनिरपि धर्म्यथा [illegible] तस्य समान्दोलनस्य वैलक्षण्यं सूचयति । कथितञ्च वि-सि-पालमहोदयेन "वन्दे मातरम्" ध्वनिना यो नाम नूतनो जातीयतावादः प्रकटीक्रियते स तु न राज्यपरिपालनविषयको न [illegible]नर्थनीतिविषयको न वा पुना राजनीतिकादर्शविशेषः । धर्मविशेषः खल्वयम् । "वन्दे मातरम्" इति प्रार्थनम् अवस्थाविशेषाज्ञातत्वाद् गौरववि[illegible]षमेवाधिगच्छति । ग्रन्थस्यास्य पूर्वतनेषू-ल्लासेषु कस्मिंश्चित् प्रसङ्गतो निर्दिष्टस्य, वङ्गीयकथाकारेषु जनानां प्रियतमस्य, विश्रुतस्य वङ्किमचन्द्र-चट्टोपाध्यायस्याऽऽनन्दमठसमाख्यातस्य कथाकाव्यस्य पात्रविशेषेणैतत् समुदीरितं प्रार्थनम् । नवीनसम्यसंप्र[illegible]ाय वैप्लविकप्रतिष्ठानानां सदस्यैर्वङ्गीयतरुणानां मनःसु स्वेषां भावान् वसुमस्य पुस्तकस्य व्यवहारः कृत इत्यत्र किञ्चनोदाहरणं मया [illegible] उल्लासे । वङ्गीयविप्लववादिनां दलैस्तथैव महताऽभिनिवेशेन गृहीता अस्य काव्यस्य भावाः यथाऽस्मादेव काव्यात् समा[illegible]लनेन लब्धा काचित् [illegible] वक्तुं शक्यते ।

वङ्गानां सा[illegible]त्यजगति व[illegible]चन्द्रचट्टोपाध्यायेन यत् स्थानमधिकृतं तद्विषये तृतीयोल्लासे मया समालोचना कृता । तदीयवतनका[illegible] पूर्वं संस्कृतस्यैवाऽऽसीत् प्राधान्यम् । शिक्षितसमाजीनीयजना [illegible] पुस्तकेषु [illegible]स्यार्थोक्तिं च [illegible] वङ्गभाषा । एतस्या अवस्थाया व[illegible]चन्द्रचट्टोपाध्यायेन महता-[illegible] सर्वेषां चिन्तनानां भावानाञ्चाभिव्यञ्जनक्षमा काचिन्निर्मिता सजीवा भाषा । [illegible]ततमे खृष्टाब्दे

त-प्रचारितं व-दर्शनसमाख्यं सामयिकं वार्तापत्रं विदग्धजनानां वैदुष्यप्रदर्शनस्य केन्द्रत्वं लेभे। तद्वार्तापत्रस्य लेखकानां नाम-सूच्यां ... दीनबन्धुमित्रः, कविर्हेमचन्द्रवन्द्योपाध्यायः, ऐति...ासिको रामदाससेनः, कृष्णकमलभट्टाचार्यः, अक्षयचन्द्र-सरकारश्चाऽऽसन्। परं सर्वेष्वेव लेखकेषु कथाभिर्न...स्यानां तीव्र...लोचनाभिश्च वङ्किमः श्रेष्ठत्वं प्राप। व-भाषाबाङ्मियस्य दुर्बलताम् एकरीतिसेवन...पाकर्तुं साहित्यस्य समालोचक... लिखितानि तेन बहून्येव पत्राणि वङ्गदर्शनस्य। निर्दयया लेखन्या समापितं तेन स्वप्रवर्तितं कर्म। त. स्वदेशीयैः सानन्दं सा... पठितास्त... प्रणीताः कथाः। तास्तावत् कथाः आर्-डब्लिउ-फ्रेजार्-महोदयेन तदीये "लिटारारि हिष्ट्रि अफ् इण्डिया" पुस्तके भारतीयानां जीवितस्य चिन्तायाश्चान्तःस्थितस्य भावस्य प्रकाशने येशोन्मेष-विशेषतया प्रतीच्यपाठकानां ...तीति वर्णितम्। तेनैव लेखकेन निर्माणशक्तिसम्पन्नेष्वर्वाचीनेषु भारतीयेषु तत्कृते परिकल्पितं प्रथमं स्थानम्। तदीयैः प्रशंसकैस्तदीयासु कथासु स्वदेश-प्रीतेर्भावावस्थान... सार् वाल्टार् स्कट्-महोदयेनापि तस्य तुलनं क्रियते। तस्य स्वदेशप्रीतिर्धर्मभावेन गाढं रञ्जितेति द्रष्टव्योऽयं खलु तावद्विषयः। भारतीयानां प्रबलतमो भावः, प्राच्यसभ्यतायाः श्रेष्ठमुपादानञ्च धर्म्यस्तावत् कश्चन भाव इति तेन बुद्धम्, अतो न केवलं तेनाभिरञ्जितो धर्मेण स्वदेशप्रीतिरसः, परं धर्मस्याङ्ग-विशेषरूपेण परिकल्पितस्तेन जातीयताभावः। तदीयाया लेखन्या मोहिनीशक्तिर्वङ्गभाषायै जीवितं शक्तिविशेषञ्च ददाविति लिखित्वाऽभिहितं केन... परेण लेखकेन—"...जीवितस्यापरिहार्यां परिणतिमनुसृत्य धर्माचरणेन धर्मसाहित्याध्ययनेन च व्ययितो मया जीवितस्य चरमो भागः।" ...स्य स हि ... प्रबलः समर्थकः। कियत्कालं सोऽ-...सकानां

कर्मकरः। लक्ष्यीकृतं तेन भारतीयजीवितैः प्राच्य-प्रतीच्यादर्शानां संयोगविधानम्। विद्विषे स राष्ट्रविप्लवम्। आनन्दमठस्य प्रथम-संस्करणस्योपोद्घाते राजद्रोह आत्मपीडनमिति राष्ट्रविप्लव आत्म-हत्येति स व्यलखीत्। आङ्ग्लदेशीयैरेव राष्ट्रविप्लवाद्रक्षिता वङ्गाः। एत एव तावद्विषयाः कृतावस्यां विशदीकृताः। नूनं दैव-स्येयं विडम्बना, यदिदमेव तावत् पुस्तकं राजद्रोहिभिः परिगृहीतं प्रथा[illegible]मालामाय।

स्वदेशप्रीतेर्निदर्शनमितेयं कथेति यद्वर्णितं नरेशचन्द्र-सेन-महोदयेन, तत् तु प्रमाणाप्रतिष्ठितमेव। मोगलसाम्राज्यस्य ध्वंस-समये जातानां विशृङ्खलावस्थानां काञ्चिदेवाऽऽदाय विरचितेयं कथा। अष्टादशशताब्द्याश्चरमे भागे सन्न्यासिवेषेण भ्रमणशीलै-र्लुण्ठनकारिभिरुपद्रुतोभूदत्यर्थं वङ्गानामुत्तरो भागः। वारेन् हेष्टिंस्-महाशयस्य पत्रेषु दृश्यते तेषां विधिविगर्हितकार्याणां समुल्लेखः। तथाविधस्तैः प्राप्तः समुत्कर्षो यथा तेषां वृत्तं "सन्न्यासिसमान्दो-लनम्" इति नाम्नैव प्रथितं जातम्। एतस्मात् सन्न्यासिसमान्दो-लनादेव संगृहीतैरुपादानैर्वङ्किमचन्द्रचट्टोपाध्यायेन विरचितानन्द-मठनामाख्याता कथा। सन्तानपदवाच्या आसंस्तस्यां कथायां सन्न्यासिनः। कस्यास्ते सन्तानाः? काली-दुर्गा-जगद्धात्र्यादि-रूपेणाऽऽविर्भूताया हिन्दुभिः प्रपूजिताया महाशक्तेः सारूप्यं प्रापि-ताया जन्मभूमेस्ते सन्तानाः। वस्तुतस्तु वि-सि-पाल-महोदयश्चेद्-वङ्गीयमतानां विश्वासयोग्या व्याख्याता, तदा वङ्गानां जातीयता-वादिभिर्जन्मभूमेर्जातीयभावस्य च प्रतिरूपतया काल्या दुर्गाभवानी-जगद्धात्र्यादिरूपावशेषाणाञ्च व्याख्यानमेव तस्याः कथायाः समर्थितम्।

कथारम्भे कस्यचिद् दुर्भिक्षाक्रान्तसंवत्सरस्य रोगैरभावैश्च [illegible]तानां जनवर्गाणां शोचनीयावस्थाविशेषस्य दृश्यते वर्णनम्।

ग्रामस्य भूस्वामी न[illegible] महेन्द्रसिंहः स्त्रियं कल्याणीं कन्यां सुकुमारीञ्च गृहीत्वा सन्निकृष्टं विशालं नगरं प्राप्तुमैच्छत्। ज्येष्ठे मासि पादचारेणैव ते प्रचेलुः। प्रखरश्चाऽऽसीत् खर[illegible]तपधि-श्रयणोत्व[illegible] शिश्रिये भूतधात्री। ज्वालामयमभूद् वात-मण्डलम्, उत्तप्तं ताम्रनिभमिव ददृशे गगनतलम्, मार्गगता धूलिकणा वह्नि-स्फुलिङ्गा इव प्रतीयिरे। कस्मिंश्चिद् विध्वस्ते ग्रामे [illegible]स्थापनं विनिश्चित्य पानीयस्य खाद्यस्य चान्वेषणाय दूरं गते महेन्द्रे सकन्यका तस्य पत्नी केनचिद् दस्युदलेनापहृता गभीरे वने च संस्थापिता। ततस्तस्याः सकाशाल्लब्धानामलङ्काराणां विभागसमय वस्तूनां मध्ये विवादे समुपस्थिते सति सकन्यका सा तैरलक्षिता घनान्धकारे दुर्गमे वने विवेश। अत्यर्थं परिश्रान्ता सा तत्र मुमोह। मोहावसाने कस्यचिद् भग्नमठस्य प्रकोष्ठे "मातर्मा भैषीः साम्प्रतं नास्ति ते भयकारणम्" इति वदतो दीर्घकेशस्य लम्बकूर्चस्य च कस्यचित् सन्न्यासिजनस्य समीप आत्मानं सा स्थिताम् अमन्यत। स तस्याः श्रुत्वा सर्वं वृत्तान्तं प्रतिश्रुत्य च तस्यै तद्-भर्तुः सन्देशसंग्रहम्, वने निगूढं स्थितं तद्गणेन भवानन्देन परि-चालितं सशस्त्रं सन्तानदलं समाहूयामास।

अथ महेन्द्रमासाद्य भवानन्दस्तेनाऽऽनन्दनिकेतनानन्दमठा-भिधानं मठं प्रति चलितः। पथि चलता भवानन्देन महेन्द्रेण समं यज्जल्पितं यच्च तत्सविधे गीतम्, तत् सर्वं महेन्द्रस्य मनसि कौतूहलं जनयदपि व्यामोहविशेषमेवोदपादयत्। भवानन्देन गीतं "वन्दे मातरम्" इति। महेन्द्रोऽपृच्छत् "काऽसौ माते"ति। अदस्यैवोत्तरं भवानन्देन श्लोकान्तरं गीतम्। "देशमातृकेयं न तु गर्भधारिणी"ति महेन्द्रेणावैनिगदितम्। "नास्त्यस्माकं तदति-रिक्ता काचिदपरा माते"त्यभूद् भवानन्दस्य प्रत्युत्तरम्। जन्म-भूमिमेवोद्दिश्य गीतं भवानन्देनेति बुद्ध्वा महेन्द्रस्तं पुनरपि तद् गातुं

प्रार्थयामास। मातृ-दानसमये त-सहचरण कम्पितमिति ज्ञात्वा सविस्मयो महेन्द्रस्त परिचयं पप्रच्छ। सन्ताना वयमित्यभाषि भवानन्देन। "कस्य सन्ताना यूयम्" इति महेन्द्रेण पुनरपि पृष्टः सोऽकथयत्—"अस्माकं जन्मभूमे"रिति। एवं क्रमेण तैरासादितो मठः। येन तावन्मान्येन सन्न्यासिना कल्याण्यै तत्कन्यकायै चाऽऽश्रयो दत्तस्तेन सत्यानन्देनैव गृहीतो महेन्द्रस्यापि भारः।

पत्नीकन्ययोः सान्निध्यप्रापणात् पूर्वं सत्यानन्दो मठपरिसरस्थितेषु मन्दिरेषु प्रतिष्ठिता देवतामूर्तीर्महेन्द्रं प्रदर्शयामास। प्रथमं जगद्धात्रीं प्रदर्श्य "चिन्तयैवमासीदस्माकं देशमातृके"ति स कथितः सत्यानन्देन। ततः किञ्चिदन्धकारं गृहं नीतः स भीषणां ददर्श काञ्चिन्मूर्तिम्। कम्पमानः स उच्चैरवदद् "इयं खलु कालीति!" एतादृश्येवास्माकमिदानीन्तनी देशमातृकेति व्याख्यानं स तत्र तस्माल्लेभे। अन्तिमे मन्दिरे स्वसाहचर्यं गताभ्यां लक्ष्मीसरस्वतीभ्याम् अप्यधिकतररमणीया विश्ववन्दिता काचन स्त्रीमूर्तिरवलोकिता महेन्द्रेण। भाविन्या जनन्याः प्रतिमूर्तिरियमित्यभिहितः स सत्यानन्देन। अत्यर्थं विचलितो महेन्द्रः प्राह—"कदा द्रक्ष्यामो वयमेवंविधां समुज्ज्वलां मातृमूर्तिम्?" "यदा सर्वे सन्ताना देशमातृकां मातृरूपेण ज्ञास्यन्ति, तदा"—इत्यासीदुत्तरम्। ततः स पत्नीकन्ययोः समीपं नीतः। कथाकारेण तेषां समागमस्य यद् वर्णनं दत्तम् तेनात्र नास्ति मे किमपि प्रयोजनम्। गौरवावहे देशमातृकापूजनमहे पतिर्महेन्द्रो वीतचिन्तः सन् मिलतामिति मनसि निधाय कल्याणी स्वकन्यकया समं यदात्मनः स्वदेशप्रत्यावर्तनं स्वीकृतवती तदेवात्र गौरवविषयमाकर्षति।

ततो वर्णिताः केचिद् उद्दीपका विषयास्तावत् स्वामिकर्तुं शक्यन्ते। सत्यानन्द-कल्याणी-सुकुमारी-समाख्यातानि त्रीणि

पात्राणि व्यसननिमग्नान्यासन्। उत्तरोक्तं पात्रद्वयं भवानन्द-जीवानन्दाभ्यां सन्तानाभ्यां यथाक्रमेण रचितम्। उल्लिखितयोः सन्तानयोः प्रथमः कल्याणीं प्रत्यासन्ने नगरे निरापदमरक्षत्, द्वितीयश्च कथायाश्चरमे भागे वर्णितया जीवानन्दस्य पत्न्या शान्त्या समं विविक्ते वने कुटीरं निर्माय निवसति। आत्मनः स्व निर्मेः सकाशं सुकुमारीम् अनैषीत्। शासकप्रेरितैः सैनिकैः परिगृहीतः सत्यानन्दः कारावासमन्वभूत्। शेषोक्तः सन्देशो द्रुतं सन्तानेषु विस्तारं लेभे। लक्षशस्ते मठं प्राप्ताः। "सत्यधर्मस्योद्धारनाय विहितप्रतिज्ञस्य विष्णोरवताररूपेणास्माभिः परिपूजितस्य सत्यानन्दस्योद्धाराय गृहीतशपथाः प्राणैः पणीयतव्यम्" इत्यभाषिष्टाभिः ज्ञानानन्दः। हरिध्वनिं कृत्वा धीरैः स्थिरनिश्चयैश्च पाद निर्गत्य रक्षिणां बाधामवधूय च तैरनुष्ठितं सत्यानन्दस्योद्धरणम्।

मठं प्रत्यागत्य सत्यानन्दो महेन्द्रेण चिरमजल्पीदियेष च तं सन्तानव्रतदीक्षितं कर्तुम्। "धर्मेणैवानुमोद्यते वैप्लविकं कार्य-जातम्" इत्यस्य विषयस्य स्थित्या तयोः कथनेन तेन गौरवं किञ्चन प्रापे। "सन्ताना वैष्णवाः" इति व्याख्यातं तेन महेन्द्रस्य समीपे। महेन्द्रेणोक्तम्—"वैष्णवाः सर्वथैव रक्तपातनं न सहन्ते तत् कथं सन्तानैर्युध्यते हन्यन्ते वा मानवाः। "चैतन्यप्रचारितं मतमेव चिन्तयसि महेन्द्र" इत्यवोचत् सत्यानन्दः। दुष्कृतां घातनं भूतधात्र्या जनन्या मुक्तिश्चेति वैष्णवधर्मस्य गूढतत्त्वम्। चैतन्य-प्रचारितं वैष्णवमतं सत्यधर्मस्यार्धो भागः। प्रेममयोऽस्य ईश्वरः। नहि परमेश्वरः केवलं प्रेममयः परमनन्त शक्तिश्च। चैतन्यस्य विष्णुः प्रेममयोऽस्माकं विष्णुस्त्वनन्तशक्तिरेव। सर्वे वयं वैष्णवाः परमुभयोरेवाऽऽवयोः स्वीकृतं मतं वैष्णवधर्मस्यार्धभागतां गाहते। इतोऽप्यधिकं बहु मिच्छोर्महेन्द्रस्य सविधे देवस्य सत्त्वरजस्तमो-गुणात्मकत्वं प्रतिपादितं सत्यानन्देन। विभिन्नैरेव मार्गैस्ते गुणाः

समाराधनीयाः । सत्त्वात् परमेश्वरस्य दयास्नेहादिकं स..ञ्चति, अतः प्रेम्णैव स समाराधनीयः । तदेव तावद्..तीयत चैतन्यमता-वलम्बिभिः । रजसस्तस्यश..श..शक्ति..पद्यत । तदुपासकैर्योद्धव्यं ..श्वरस्य शत्रवो हन्तव्याश्च । तदेवास्माभिः क्रियते । तमसो यथेच्छं रूपं परिगृह्यते परमेश्वरेण ; माल्यगन्धादिभिश्च स तदा पूजनीयः । एतदेव साधारणैर्जनैर्विधीयते । "तत् किं सन्तानसङ्घो धर्मसङ्घः" इति महेन्द्रेण परिशेषे जिज्ञासितम् । "अथ किम्, तथैवैषः" इत्याह सत्यान..: । "न काङ्क्ष्यतेऽस्माभी राज्यम्, परमेश्वरस्य शत्रुतां गता ..सलमाना एव निहन्यन्ते ।"

भाविन्या जनन्या मन्दिरं नीतो महेन्द्रो देव्याः पुरतः प्रार्थन-स्तेनापरेण जनेन समं ..न्तानव्रते दीक्षितोऽभूत् । ..धनादिक-मैश्वर्याणि च त्यक्तुम्, इन्द्रियाणि विजेतुम्, नारीभिः सहैकासना-ध्यासनमपि वर्जयितुम्, सत्यधर्मस्य कृते योद्धुम्, एकस्या एव मातुः सन्तानत्वं मनसि निधाय जातिभेद..त्यक्तुञ्च ताभ्यां गृहीताः शपथाः । ततस्ताभ्यां मातृसमीपे कृतः स्तवः । एवं क्रमेण तौ यथारीत्या दीक्षितावभवताम् । पुरुषस्य छद्मवेशेनाऽऽगता जीवा-नन्दस्य पत्नी ..न्तिस्तावद् द्वितीयो दीक्षार्थी जनः । सन्तानैर्ब्रह्म-चर्यस्योपरि कीदृशं गौरवं समारोपितम्, तत् प्रदर्शयितुमेव कथायां तस्याः प्रवेशः परिकल्पितः । ..क्षाग्रहणानन्तरं सा प्रथमं सत्या-नन्दस्य समीपे परतो जीवानन्दस्य पुरत आत्मानं प्रका..यामास । कथं पत्नी पत्या सह तस्याः सांसारिकान् सर्वान् सम्बन्धान् विसृज्य तेन सहाऽऽध्यात्मिकमैक्यम् अनुभवन्ती वस्तुं पारयति, तदेव कथायाश्चरमांशे दर्शितः कविना । कथायां व..तानां युद्धाना-मन्तिमे युद्धे ..न्तानानां जयलाभानन्तरं जीवान..न सममुभयो-र्भाविन्या..पथं ..लम्बयन्त्याः शान्त्याः किमपि चित्रं लब्धाऽऽस्ते वर्णितम् । शान्त्याऽभिहितम्—"न च पुनरावां गृहिणौ भविष्यावः ।

चिराय ब्रह्मचर्यव्रतं परिगृह्य एवमेव सन्न्यासिनौ स्थास्यावः। यदि साम्प्रतं तीर्थेषु विचरिष्यावः।"

"तत्र आवाभ्यां किं तावत् करणीय"मित्यपृच्छज्जीवानन्दः।

"ततो हिमालयस्योपरि कुटीरं निर्माय परमेश्वरं पूजयावः याचिष्यावहे च तं देशमातुरस्या मङ्गलम्।"

जीवानन्दस्य सन्न्यासग्रहणमत्यर्थं सरलतापूर्णम्। ततश्चन्द्रालोकोद्भासितायां गभीरायां तस्यामेव निशीथिन्यां समुत्थाय तौ अमभवानन्ताय निर्जग्मतुः।"

शान्तिजीवानन्दयोर्निदर्शनेन यो हि नाम ब्रह्मचर्यस्याऽऽदर्शः प्रदर्शितो लेखकेन, भवानन्दस्य वृत्ते तदधिकतरं स्फुटतां याति। स्मरणीयमेवेदमस्माभिर्यद् भवानन्दः कल्याणीमुद्धृत्य प्रत्यासन्ने नगरे तां निराकुलं स्थापयामास। कल्याण्या दर्शनाय गतो भवानन्दस्तस्या आत्मनः प्रेमवार्तां निवेदयामास। एतेन कस्यचिन्नाटकीयदृश्यस्योपादानमुपायनीकृतम्। श्रुत्वैतत् कल्याण्या स्मारितः स सन्तानव्रतस्य समयः। "त्वद्रूपवह्निना भस्मीकृतमिदानीं मे तन्मतम्" इत्यभूद् उत्तरम्। "इन्द्रियपरवशो यः सन्तानधर्माद् विच्युतो भवति तस्य मृत्युरेव प्रायश्चित्तम्" इति भवन्मुखादेव मया पूर्वं समाकर्णितम्, अपि नामैतत् सत्यम्?"—इति प्राह कल्याणी। तेन तदभ्युपगतम्; स्मर्तव्योऽस्मि त्वया मन्मरणादनन्तरम् इति प्रार्थितश्च। "पापाशयो व्रतोल्लङ्घनकारीति च त्वं स्मरिष्यसे मया ते मृत्योरनन्तरम्" इति परुषाक्षरैः सावज्ञमवधूतः स कल्याण्या। नातिचिरकाले शासकसैनिकैः सह सन्तानानां सङ्गरेऽग्रेसरो भवानन्दस्तैर्घातितः सन् पापस्य प्रायश्चित्तं चकार।

एतेषूदाहरणेषु मया न्यस्तं किञ्चन गौरवम्, यत एतैरेव बङ्किमविप्लववादिनां पुरतः समुपस्थापित उच्चकैरादर्शः। सापराधोऽपि स एवाऽऽदर्शोऽभूत् तेषां अवर्णीयः। तेषां कार्याणि

कानिचिच्चित्रा ण्यपि भीषणान् कृष्णान् मेघान् भित्त्वा विनिर्गता मरीचय इव मरीचिमालिनो दृष्टिमाचक्रुषुः। कथाया अवशिष्टांशं यदि समासतो न वक्ष्यामि तदा मत्समुद्देश्यसाधनविधौ तस्यानावश्यकत्वमेव जायेत। सैनिकैः समं सन्तानानां युद्धद्वयस्य वर्णनमास्ते। तत्र द्वयोरेव युद्धयोः सन्ताना विजयं लेभिरे।

विजयलाभानन्तरं जातस्य दृश्यस्यैवं तावद् दृश्यते वर्णनम्—"तस्यामेव निशायां देशस्य स भागो हरिनामध्वनिना मुखरो जातः। "पराजिता मुसलमाना हिन्दुकरतलगतश्च साम्प्रतं देशस्ततो हरिर्हरिरिति जयध्वनिं सता मुहुर्मुहुः" इति सर्वैरेव कथयाम्बभूवे।

सत्यधर्मस्य पुनः प्रतिष्ठापनाय बृटीशानामागमनं तेषां शासनञ्चाऽऽवश्यकं इत्येव तावत् पुस्तकस्योपसंहारः परिकल्पितः कथाकारेण। सन्तानदलस्य विधिविगर्हितेभ्यः कार्येभ्योऽन्यतो दुष्टिदानस्यावसरोऽप्येतेन तेन लब्धः। युद्धावसाने मठं प्रत्यागतं सत्यानन्दं कश्चिद् गूढचरित्रो महाप्रभावः सन्न्यासी युद्धादिभ्यो वारयित्वा तेन सार्कं विविक्ते हिमालये गन्तुमादिदेश। साम्प्रतं सामिकृतं मे कर्म इत्युत्तरैः समुपस्थापितः सत्यानन्देन गमनप्रतिबन्धः। कथाशेषतां गतेऽपि मुसलमानशासने नाद्यापि सुप्रतिष्ठितं हिन्दुराज्यम्। "साम्प्रतं नैव प्रतिष्ठां यास्यति हिन्दुराज्यम्, परम् इंगलण्डशासनाऽवस्थानमेवाधुना भारतस्य मङ्गलाय कल्पिष्यते" इत्यभिहितं तेन सन्न्यासिना। पुनरपि सत्यानन्देनापरा प्रदर्शिता बाधा, परं तस्या अप्युत्तरविशेषः परिकल्पितस्तेन सन्न्यासिना। "दस्युवृत्त्यैव युष्माभिर्लब्धो जयः। न हि खलु पापानि कदाचित् सुफलं प्रसुवते, अतः पापेन पथा प्रचलद्भिर्भवद्भिर्दुरापादनीय एव देशस्योद्धारः। विशेषतः प्रतीच्यज्ञानराशिभिर्जुष्टो बृटीशागमः सत्यधर्मस्य पुनःस्थापने उत्कटतयैवेदानीं समपेक्षणीयः। सत्यं हिन्दुत्वं ज्ञाने प्रतिष्ठितम् न तु कर्मणि। पदार्थनिष्ठत्वेनाधिकरणनिष्ठत्वेन च ज्ञानं

द्विविधम्। [illegible] लाभात् पूर्वं सत्यधर्मसारांशविशेषस्य पूर्वोक्तस्य विकाशोऽसम्भव एव। भारताच् चिराय गतं [illegible] ज्ञानम्, आङ्गलदेशीया एव प्रत्यानीय देशमध्ये तत् तनिष्यन्ते। तेन च पुनरपि भारतम् अधिकरणनिष्ठं ज्ञानं प्राप्स्यति। एवं "यावन्न हिन्दवो ज्ञानेन धर्मेण शक्त्या च महत्त्वम् अधिगमिष्यन्ति तावद्[illegible]लशासनं भारते सुस्थिरमेव स्थास्यति।"

परिशेषे च छिन्नसंशयः सत्यानन्दः कर्ममयं जीवितं विहाय तेन समं चचाल।

जन्मभूमेः सेवायै स्थिरां [illegible] जनानां सङ्घविशेषेण कथावस्तुनः समसामयिकस्य हिन्दुत्वपरिपीडकस्य मुसलमानशासनस्योत्सादनेन हिन्दूनां पुनरुज्जीवनं तावदुल्लिखितस्य कथासंक्षेपस्य सारांशः। आनन्दमठेन इदं प्रमाणीकृत्य विप्लववादिनां सङ्कल्पन्तेषां कार्यस्यानु[illegible]णस्य कस्यचित् प्रतिष्ठानविशेषस्य सुष्ठु चित्रमपि तेभ्यः प्रदर्शितम्। कथास्थितं "[illegible]सलमानशासन"-पदम् अपनीय तत्स्थाने विनिवेशितं विप्लववादिभिर्वृटीशशासन-पदम्। [illegible]टीशशासनन सम्पादितानि हितानीति, यैः कैरप्युपायैर्लक्ष्यविशेषसाधन-सङ्कल्पः सदोष इति च कथायाश्चरमे भागे वङ्किमचन्द्रचट्टोपाध्यायेन समुपस्थापितस्य सिद्धान्तद्वयस्यैवैतेनापलपनं जातम्। सत्यम् आनन्दमठनिर्मातुरेतद्विषयावगाहि सिद्धान्तद्वयं कदाचिद् विशिष्टैरपि विप्लववादिभिः स्वीकृतमिति चिन्त्यमेवैतत्। परम्, कारावासनिग्रहादीनामवसाने, सफलतया विम[illegible]डतेन राजद्रोहेणैव सम्पादनीयं हिन्दूनां सुमहत् पुनरुज्जीवनम् इति भावस्य मोहेन, वङ्गीयैः साहित्यैर्वाचस्पत्यैश्च तेषां भावप्रव[illegible]स्वभावस्य प्रमा[illegible]ण चाप्रभावितायाश्चिन्ताया अवसरान् प्राप्यैव तैस्तत् स्वीकृतम्। अन्येषु विषयेषु प्रच्छन्नसमितिभिरानन्दमठस्य सन्तानानामा[illegible]शं एव परिगृहीतः।

न केवलं वैप्लविकसमितिभिः परं प्रकारतो विभिन्नैरप्येकमेव लक्ष्यं समुद्वहद्भिः सर्वैरेव वङ्गीयैर्जातीयतावादिभिर्गृहीतः सन्तानानां "वन्दे मातरम्" इति रणशब्दः। पञ्चदशाधिकोनविंशतिशततमे खृष्टाब्दे बालेश्वरं निकषा नगररक्षिभिः सह सञ्जाते संघर्षे यस्य वैप्लविकदलस्य यौ सभ्यौ मम्रतुः, वङ्गीयवैप्लविकदलेषु जीवितनिरपेक्षतमस्य यतीन्द्रनाथमुखोपाध्यायपरिचालितस्य तस्य दलस्य तावेव सभ्यावानन्दमठस्य प्रधानपात्रद्वयस्यैव नाम पर्यगृह्णीताम्। सन्ताना इव "ढाका अनुशीलनसमिति" सदस्या अप्यात्मसंयमं नैतिकसाधुताञ्चाङ्गीचक्रुः। "सुखम्, विषयलालसां सांसारिकासक्तिञ्च दूरे निक्षिप्य समागच्छत भारत-सन्तानाः, तूर्णमागच्छत भोः, मातृपूजायै मिलध्वम्।"—नवदशाधिकाष्टादशशततमे खृष्टाब्दे विनिर्गते "ॐ"-"वन्दे मातरम्"-पदाभ्यां विभूषितशीर्षके "पुकार" (आह्वान)-समाख्याते पत्र एवं विधम् अस्माभिरदृश्यत किञ्चनाऽऽमन्त्रणपदम्। "ढाका अनुशीलनसमिति" सदस्यैर्विधातव्येषु चतुर्षु समयेष्वेकस्तावत् सत्यानन्दं निकषा महेन्द्रेण गृहीतस्य त्यागस्य संन्यासस्य च शपथस्यानुरूपः। कठोरसंयतजीवितोपक्रमं स्वीकृत्य तस्य समयस्यांशविशेषे यल्लिखितमास्ते तस्मादधिकतरं विशदं वर्णनं कथायामपि नास्ति। तस्मिन् शपथे वर्जनीयानां कर्मणां यादृक् सविस्तरं वर्णनं दृश्यते, तादृग् गभीरमनुसृत्य शिष्टाचारस्य नियमः कथायां सन्निवेशयितुं नैव शक्यते। "भ्रंशितास्मि चेदस्माच्छपथाद् अथवा कर्तास्म्यस्य शपथस्य विरुद्धं किञ्चन कर्म, तदा नातिचिरादीशस्य, जन्मभूमेः, शक्तिमतां मात्राञ्चाभिशापाः कल्पतारो मे विनाशाय—इत्यादीनि पदान्यासन्नुपसंहारवाक्यघटकानि। काल्याः प्रतिमूर्तिसन्निधौ वा सविधे शपथग्रहणाद् धर्मानुगतत्वमपि समधिगतं तेन शपथेन।

नाऽऽसीत् स शपथः फल्गुर्यतः शपथभङ्गापराधः सर्वथैवाभूत्

दण्डेनाऽऽगतः। यथैव कल्याणीसमीपऽशिष्टं व्यवहारं प्रदर्श्य भवानन्दो ममार, तथैव तत्रापि सापराधानां मृत्युरवधारितत्वमियाय। कस्याश्चित् तथाविधायाः संसदश्चत्वारः सदस्या नियमोल्लङ्घनात् तस्या एव संसद इतरैः सदस्यैर्यथोक्तप्रकारेण दण्डिता अभवन् इति विषयो मदीयज्ञानपथातिथित्वं प्रायावित्यधुनाऽप्यहं स्मरामि। अस्य प्रतिकूलतया कस्यचिज्जनस्य कार्यमत्र समुपस्थापयितुं शक्यते। स्वाचरितदाम्पत्यनैतिकापराधेनाऽऽगतस्य एकस्या एव संसदः सदस्यपदवीमलंकुर्वाणस्य घातकत्वेन स हि तावज्जनो निर्णीतः। प्रच्छन्नसंसदां सदस्यानां मुहुर्मुहुर्जायमानैरनुपेक्ष्यैः स्खलितैर्नास्ति मे तादृशः कश्चित् सम्बन्धो यादृशः सम्बन्धो विद्यते सर्वैरेव सापराधतया निर्दिष्टस्य समान्दोलनस्यास्याऽऽदर्शस्य विद्यमानताया एवानुसन्धानेन। यथा नाम दृढतया समान्दोलनप्रवर्तकाः स्वेषां लक्ष्यस्य तदवाप्तिमार्गस्य च धर्मानुशासनाधीनत्वं प्रतिपेदिरे, सा खलु दृढता, हिन्दूनां जनजीवनविषयकः समान्दोलनस्य कश्चिदादर्शविशेष आसीदेव इतीदं मत्प्रदर्शितं मतं प्रमाणैर्द्रढयति। हिन्दूनां धर्मपुस्तिकासु श्रेष्ठाया भगवद्गीताया अपि संगृहीतं तैस्तथाविधं किञ्चनोपादानम्, यत् तु प्रकरणं विहाय चेदालोच्यते, तदा विप्लवात्मकानां कर्मणां समुत्साहकत्वमेव यायात्। विप्लवस्य प्रवर्तकैरस्य धर्मग्रन्थस्य यथा नाम व्यवहारः कृतस्तस्याऽऽलोचनं विना समान्दोलनस्य निगूढतत्त्वानां विचारोऽसम्पूर्ण एव तिष्ठेद् इत्यतस्तस्यैव व्यवहारस्य तद्धर्मग्रन्थस्य वृत्तान्तोऽर्थश्च प्राथमिकतयैवापेक्षितौ विषयौ।

एकाद ।।ल्लासः

ःप्रक्रमः।

विश्रुतानां व्याख्यातॄणामध्यात्मवादस्य, ःांसा रिकजीवितस्य कठोरतायाश्च पारस्परिकविरोधशमनमभिलष्यत्सु भारतीयेषु मनीषिषु, तद्विरोधोपशमनस्य दुःसाध्यतया विमूढेषु च तेषु विरचितेयं खलु भगवद्गीता। मानवजीवितस्य दुःखादिकम्, किं बहुना तज्जीवितमपि कर्माधीनम्। कर्मसंयमोऽथवा जगतः सर्वसङ्कल्पत्याग एव तेषां दुःखादीनां विरतिसाधनक्षमोऽगद इति श्रूयते। अतः खलु भारतीयैर्मनीषिभिः समुपदिष्टः सर्वस ्त्यागमन्त्रः।

स्वीकृतेषु पक्षेषु स्फुटतयैव दुष्प्रधर्षः स्यात् सिद्धान्तः। तुल्यतया स्पष्टतया च साधारण्येनाप्रयोज्योऽभूत् स तावदगदः। नियमैर्बन्धैश्चोपेतस्तदानीं दुर्भेद्य एवाऽऽसीद् वर्णाश्रमो धर्मः। तन्नियम ि- सम्भूतो युद्धधर्मः, योधपुरुषः केनोपायेन स्वकं कर्ममयं जीवितं जह्यात्, अस्यैव तावद्विषयस्य भगवद्गीतानिर्मात्रा कृतं समाधानम्। इतरेऽपि तत्राऽऽसन् समाधानार्हा विषयाः। मानवानामिन्द्रियैर्ग्राह्येभ्यो विषयेभ्यो भिन्नत्वेन वा, अवास्तविकतयाऽव्यक्ततया च पर ् ःविपर्यविशेषत्वेन वा, साधारणानां जनानां बुद्धेरविषयी ्तया गूढया प्र ालिकयैवाऽऽध्यात्मिकवागाडम्बरस्य चित्तविभ्रमो पादिन्या ःटिलतया साधारणानां दुरधिगमस्वरूपत्वेन वा, अविज्ञेयत्वेन वा, अ ्रिवर्तनीयया स्थित्या प्र ाधितत्वेन वा, दारुणे निरवसाने च जन्ममृत्युचक्रे पुनः पुनरन्ध इव विवर्तमानानां जनानां

कर्मसु सर्वथैवासीनत्वेन वा भगवतोऽस्तित्वकल्पना सर्वसङ्ग-परिहार-निर्व्यापारत्वाभ्यां सुखेन विरागमार्गेण मुक्तिं मृगयमाणानां सन्न्यासिजनानामेव तृप्त्या अलम्। परं कर्मिजन आपत्समय तुलनया कथञ्चिद् भ्रान्तिहीनं विषयमेवाऽऽश्रयेत्, मानवानां स्वाभाविकीं प्रवृत्तिमनुसृत्य चेश्वरे मानुषत्वस्याऽऽरोपं कृत्वा स्वस्यार्थे ईश्वरविशेषं परिकल्पयति। अत्यर्थं विभिन्नतां गतयोः परमेश्वर-विषयिण्योः कल्पनयोरन्यान्यगतविरोधशमनेऽत्र तावत् सविशेषमेव चेष्टितं भगवद्गीताकारेण। एवंविधं चेष्टितं जातुचिदपि न सम्पूर्णां सफलतां प्राप्नोति। अतो गीतायां बुद्धेर्योगोपायानां परस्परविरुद्धानामपि भावानां स्थितिर्नैव विस्मयोत्पादिनी। तितिक्षा-कोमलतयोरागरत्वेन प्रथितं हिन्दूनां चेतो गीतायाः स्वरूपस्याप्यात्मनोऽनुरूपत्वेन नैवान्वभवत् तामधिकृत्य कञ्चिदप्यु-द्वेगम्। परं सुव्यवस्थितेनावर्तितेन च युरोपीयाणां चेतसाऽसौ-कर्यमेवालभ्यत गीतायास्तथाविधात् स्वभावात्। न केवलं सर्वेषु धर्मेषु सत्यमस्तीत्येतावानेव, परं सर्व एव धर्माः सत्या इत्ययमपि भावो यन्मानसं प्रभावयितुं शक्नोति तथाविधं मनो गीतायाः पूर्वापरविरुद्धैर्भावैः कथं नाम क्लिश्यताम्।

महाभारतस्य षष्ठे पर्वणि क्षत्रियाणामुपाख्यानमवलम्ब्य विर-चितेयं कविता। काव्यस्य तस्य द्वे प्रधाने पात्रे द्वे चाप्रधाने। सज्जीकृतैः स्वैः स्वैः सैनिकैः सङ्गराय सङ्गतानां कुरुपाण्डवानां राज-वंशस्य वृद्धो राजा धृतराष्ट्रः, संग्रामभूमेर्वार्ताग्रहः सञ्जयश्चाप्रधान पात्रे। पाण्डवानां द्वितीयो* योद्धा राजकुमारोऽर्जुनस्तत्सारथ्य-माश्रितो विष्णोरवतारः कृष्णश्च प्रधाने पात्रे। कुरुक्षेत्रस्य रणा-ङ्गनरूपे दृश्ये परस्परबद्धवैराः समवेता युयुत्सवः सैनिकपुरुषाः। विपन्नतां गतेषु योधपुरुषेषु युयुत्सुं स्वजनं दृष्ट्वा कृपया परयाविष्टो-

* महाभारतानुसारेणार्जुनस्तावत् पाण्डवानां तृतीयः।

ऽर्जुनः करौ संहृत्य कृष्णमुपदेशं ययाचे। अन्तत ऽर्जुनेनानुष्ठितैः प्रश्नैरुपेतैः सप्तशतमितैरध्यायैर्दत्तं कृष्णेन तस्योत्तरम्। वृद्धस्य राज्ञो धृतराष्ट्रस्य समीपे वार्तावहेन सञ्जयेन वर्णितः कृष्णार्जुन-संवाद एव भगवद्गीता। एतेष्वध्यायेषु द्विसहस्रवर्षेभ्यः पूर्वं कुरुक्षेत्रे रणाङ्गने समुदीरितानां दार्शनिकतत्त्वानां दृश्यते सङ्कलनम्। यासां समस्यानां समाधानाय चिन्ताशीलानां मानवानां मनांसि सर्वकालं यतमानान्यासते, तासामेव समस्यानां समाधाने भारतीय-चिन्ताया अवदानभूतान्येव तानि दार्शनिकानि तत्त्वानि। सूक्ष्माण्यतिगम्भीराणि तानि तावत् तत्त्वानि कालप्रवाहेण जीवित-प्रवाहेण च समं वर्षसहस्रक्रमणं कृत्वा साम्प्रतमपि भारत-सुतानां मनोमन्दिरे देदीप्यमानानि विराजन्ते। स्वानुष्ठेयस्य कर्मण आयतिं विचिन्त्य सहसा परितापपरिगतोऽभूत् क्षत्रप्रधानः प्रथित-कीर्तिः पार्थः। प्रबुद्धस्य विवेकस्य प्रणोदनया जातिधर्मापेक्षितेन कर्तव्येन च सममेव क्लिश्यमानः स झटित्येव जनानां दृष्टिं सहा-नुभूतिञ्च समाकर्षति, यत एवंविधस्य तुल्यैर्गुणदोषैरुपेतस्य विकल्पस्य सर्व एव विषयीभूता भवन्ति। समुचितं मार्गं जीवित-कालस्य कचनावसरे प्रदर्शयितुं न कोऽप्यायासः समनुभूतः श्रीकृष्णेन। प्रहसतैव तेन विहितं द्वितीयाध्यायगतं व्याख्यानम्। पुरुषप्रकृतिरूपौ द्वौ सनातनौ स्वतन्त्रौ परमार्थौ स्वीकृतवतः सांख्य-दर्शनस्य विश्वोत्पत्तितत्त्वमवलम्ब्यैव दत्तोऽत्रोपदेशः। साधुता-वासनौत्सौम्यपदवाच्यानां सत्त्वरजस्तमसां गुणानां साम्यावस्थारूपा प्रकृतिः सम्पूर्णरूपेण सचेतना। गुणानां साम्यावस्थायाम् अप्रकटाऽवतिष्ठते चेतना। पुरुषेण समं प्रकृतेरनिर्वचनीयेनोपायेन सङ्गमे जाते गुणानां समताया विच्छेदो जायते, सा चेतना च प्रकटतां गाहते। अन्यथा चेदुच्यते, तदा विकाररूपं विश्वमनुभूतं जगदा अन्तरेणास्तित्वमित्येव, परं पुरुषसंसर्गादेव प्रकटतामभ्येति।

एतयोः परमार्थयोर्यथार्थस्वरूपबोधात्—कर्मफलैः सर्वथैव निर्मुक्तः पुरुष इति प्रकृतावेव तानि संसक्तानीति च विज्ञायेते। कृष्णसंवादेन तावदेतदेव विशदीक्रियते।

नरेषु स्थितस्य कस्यचन सनातनस्वरूपस्य सत्यस्य सनिश्चयोपस्थापनेन स्मारिता वयं बौद्धानां शून्यवादम्।

"न त्वेवाहं जातु नाऽऽसं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम्॥"

वेदान्तदर्शनमतमनुसृत्यैव व्याख्यातस्तः "शरीरी"। नरा अनन्तस्य मूर्तयः। कृष्णेनोक्तम्—

"अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्"।

इति। अत्र "तत्"पदेन जगतो मूलतत्त्वम् परमेश्वरो वा, "इदम्"-पदेन नरैरनुभूयमानं विश्वञ्च द्योतिते भवतः। "तत्"पदप्रतिपादितस्य सनातनत्वमविनाशित्वञ्च पुनः पुनः सनिश्चयमुपन्निस्ते।

"विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति।"
"न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥"

एतस्माद् एतदेव तावदायाति—आत्मनो मूर्खतयात्मानं कस्यापि हन्तारं मन्यमानो जनो वस्तुगत्या तस्य देहिनो देहान्तरसंक्रमणमेव घटयति। यत :—

"वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही॥"

एतस्मादेव तावन्न सर्वम्। यतः

"य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥"

अत्रेदं तावद्वक्तुं शक्यते एकमपरोऽनुवर्तत इति। हतानामभावात् कुतः स्याद्धन्तॄणां सद्भावः। "य एनं वेत्ति हन्तारं" स

तावन्मूर्ख इति वाक्येन तस्मादप्यधिकं किञ्चिद् द्योत्यते। साधारण-बुद्ध्या विषयमिमं क्षणमालोचयामः। "क"नामधेयः कश्चन जनः "ख"नामधेयेन केनचिज्जनेन हतः। कोऽसौ किस्वनो वाऽसौ येन हत्याऽनुष्ठिता? अत्रासन्दिग्धमेव स्यादिदमेव तावदुत्तरम् "ख"-नामधेयेनैव हननं कृतमतः "ख"नामधेय एवात्र प्रष्टव्यः। सांख्य-दर्शनमनुसृत्य चेदालोच्यते तदाऽस्य तथात्वं न स्यात्।

"कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः"

इत्यतः प्रकृतिजेभ्यो गुणेभ्य एव जातन्तद्धननकर्म इति वक्तुं शक्यते। सत्यं प्रकृतिपुरुषयोर्द्वयेन मेलनेन सञ्जातमिदं कर्म, परं कर्मणोऽस्यैवंविधस्वरूपत्वे न खल्वनुयोज्या प्रकृतिः।

"प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते॥"

न च्छिन्नसंशयोऽभूदर्जुनः। स उवाच—

"ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दन।
तत् किं कर्मणि घोरे मां नियोजयसि केशव॥
व्यामिश्रेणैव वाक्येन बुद्धिं मोहयसीव मे।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्॥"

कृष्णेन पुनरप्यभाषि—

"लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ।
ज्ञानयोगेन सांख्यानां कर्मयोगेण योगिनाम्॥

उल्लिखितयोर्मार्गयोः कर्ममार्ग एव श्रेयान् साधारणस्य जनस्याऽऽचरणीयोऽयञ्च। परं कर्तव्यानुष्ठानरूपम् एकमेव लक्ष्य-मुररीकृत्य करणीयं हि सर्वथा कर्म। न केनापि त्यक्तुं शक्यते वर्णा-श्रमानुमोदितः स्वको धर्मः।

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा।
कर्तुं नेच्छसि यन्मोहात् करिष्यस्यवशोऽपि तत्॥"

परं स्वकर्तव्यतयाऽननुशिष्टानि कर्माणि तस्य वर्जनीयानि ।

"श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।

स्वभावनियतं कर्म कुर्वन्नाऽऽप्नोति किल्बिषम् ॥"

अपिच, परार्थपरताया उच्चकैर्भावैरनुप्राणितः सन्नेव कुर्वीत जनः स्वकर्तव्यम् । कर्तव्यबुद्ध्यैव करणीयं तेन कर्म, नान्यस्माद् हेतोः । दारुणां हि फलाकाङ्क्षया विहितं कर्म यतस्तत् कर्मिणं विवर्तमाने जन्मबन्धे नियोजयति ।

स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ।

अयं हि खलु सुमहान् उपदेशो गीतायामस्माभिरसकृदेव लभ्यते ।

"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।"

अपरञ्च—

"अनाश्रितः कर्मफलं कार्यं कर्म करोति यः । स सन्न्यासी"

"निराशीर्यतचित्ताऽऽत्मा त्यक्तसर्वपरिग्रहः ।

शारीरं केवलं कर्म कुर्वन्नाऽऽप्नोति किल्बिषम् ॥"

अत्र बौद्धमतेन समं गीताया उपदेशानाम् एकरूपता द्राग् व्यक्ततयैवाऽऽभाति । समूलमुत्पाटनीयौ कामः संसारासङ्गश्च । सुष्ठुतया तस्मिन् सम्पादिते सति छिन्नसंसृतिशृङ्खलो विशुद्धो नरः सुखदुःखैरपरामृष्टं निर्विकारावस्थाविशेषं प्राप्य तस्मात् समुच्छ्रितात् प्रसादप्रासादादविचलित एव स्वकीयया पार्थिवप्रकृत्या क्रियमाणानि कर्माणि पश्यति । वस्तुतस्तु बौद्धार्हताम् अवस्था तेन तदानीं लभ्यते ।

परमेश्वरं साकारत्वेन लब्धुं नराणां लालसाविशेषस्य पूरणाय समुत्थिते प्रचेष्टन एव गीतानिर्माता बौद्धधर्मप्रवर्तकेन समं साहम्यमुदवहत् । उपन्यस्ता उपदेशाः सामान्यतो दार्शनिकाः सांख्यवेदान्तमतानुगाश्च । सर्वत्र दार्शनिकभावैः स्पर्धमाना आसते

धर्म्या भावाः। गीताकर्तुर्मनसि नैरवच्छिन्नं युध्यमाना आसं-स्तदीयैर्द्वीपकैस्तर्कैः समं तस्य भावप्रवणतायाः सा ऽपगा लालसाः। यस्तावदीश्वरवादः काव्यस्योत्तरांशे दृश्यते, स तु द्वितीयाध्यायस्य सप्तमश्लोकगतेन किंकर्तव्यताविमूढस्यार्जुनस्य—

"यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्"

इति वचनेनैव प्रथमं सूच्यते। सप्तमाध्याये कृष्णः स्वयमेवाऽऽत्मनि परमेश्वरत्वम् आरोपयति—

"त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥
दैवी ह्येषा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥"

नवमाध्याये तस्येश्वरत्वं पूर्णतयैव प्रकटीभवति। "पिताऽह-मस्य जगतः"... "तपाम्यहम् अहं वर्षं निगृह्णाम्युत्सृजामि च"; "अमृतश्चैव मृत्युश्च"। "अपि चेत् सुदुराचारो भजते मामनन्यभाक्। साधुरेव स मन्तव्यः" "कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति।"

"मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।"

परं सर्वेष्वेवेश्वरवादात्मकेषु श्लोकेषु चतुर्थाध्यायस्य कश्चन श्लोक एव विशेषेण समुल्लेखनीयः। तत्रेश्वरस्य मानुषरूपेणा-वतारस्य सुव्यक्तं चकास्ति किञ्चिद् वर्णितम्।

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥"

चरमतश्चैकादशाध्यायेऽर्जुनोऽनन्तमाकिरूपेण कृष्णं द्रष्टुं तं प्रार्थयाम्बभूव। तत्प्रसादाच्च तथा दिव्यं चक्षुर्लब्ध्वा सर्वाश्चर्य-

मयमनन्तं विश्वतोमुखं सूर्यसहस्रमिव दीप्तिमन्तं भगवन्तं ददर्श। अनेकबाहूदरवक्त्रनेत्र उज्ज्वलाखण्डलचापवर्णो दीप्ताननेत्रो द्यावापृथिव्योरन्तरं सर्वाश्च दिशो व्याप्य स्थितो महोज्ज्वलभीषणश्चेति वर्णितो भगवान् विश्वरूपः। एकयैव तुलिकया निरूपिताऽनन्ताऽकिरनन्तरूपश्चेति विस्मयावहः खलु विषयः, परं भारतीयेन शिल्पिना नियतमेवायमुद्भाव्यते। एवं प्रकारेण वर्णितः परमरूप। नित्याद् देशकालातीताद् निर्गुणाद् ब्रह्मणोऽप्यर्थे भिन्न एव।

"अनादिमत् परं ब्रह्म न सत् तन्नासदुच्यते"—इत्यादिरूपो ब्रह्मविषयको बोधो न तु साकल्येन विस्मृतः। परं परम-सत्यतया निर्णीतं ब्रह्म शङ्करेणापरैश्च वैदान्तिकाद्वैतवादस्य प्रचारकैर्दर्शितेन वर्त्मना न यथायथं वर्णितम्। ईश्वरस्य सर्वेश्वरत्वात्मके बोध एवात्र ब्रह्म निमज्जयितुं दृश्यते काचित् प्रवृत्तिः। सर्वत्र गीतायाम् अव्यक्तेन परम-सत्येन तुलनया व्यक्तेनेश्वरेण द्वितीयमेव स्थानमधिक्रियते। कर्मणैव मुक्तिर्लभ्यत इति विशिष्टाद्वैतवादिभिर्नैव समर्थ्यते। एतन्मतमवलम्ब्यैव स्वरचिते भाष्ये शङ्करेणोद्घोषितम्—"अविद्याजनितेनाऽनात्मविषयेण शुद्धज्ञानविरोधिना कर्मयोगेणाऽऽत्मज्ञानसम्पन्नस्य जनस्य किमपि करणीयमवशिष्यतेति न स्वप्नेऽपि चिन्तितुमलम्"—इति। तथापि जातीयदर्शनं दैनन्दिनजीवितस्याऽऽचारान्तरा विजृम्भमाणस्यातलस्पर्शस्य खातस्योपरि साधारणानां जनानां कृते निर्मितस्त्वेतेन सेतुः।

उक्तोऽयं भगवद्गीतायाः संक्षेपः। विप्लववादिसमाजैरादेशीयमाणेयं गीता कथं तेषां समादरलाभे योग्यतां लेभ इति निपुणं निरूप्यमाणो, अधर्म्यकार्यस्य साधनाय धर्म्यसाहस्य विविधाननरूपाणां मानवजातेरितिहासे परिदृश्यमानानां शोचनीयानां निदर्शनानामेकतममस्माभिर्लभ्यते।

अष्टाधिकोनविंशतिशततम खृष्टाब्दे यदा "ढाका-अनुशीलन-समितिः" प्रथमं सघोषणं निषिद्धा, यदा च राजपुरुषैः समितिगृहस्य परीक्षणं कृतम्, तदा समितेर्वस्तूनां मध्ये द्वादशभ्योऽप्यधिकसंख्यकाः "गीताः" परिदृष्टाः। नियमेन तस्यां समित्यां गीताध्यापि प्राचलत्तत्राऽऽस्त एवेदं प्रमाणम्। निर्गमनात् परं नातिचिरादेव सघोषणं निवारितस्य वैप्लविकवार्तापत्रेषूग्रतमस्य "युगान्तर" समाख्यस्य वार्तापत्रस्य—रक्षणाय च साधूनां विनाशाय च दुष्कृतां युगे युगे सम्भवत्यवताररूपेणेश्वरः—इति भावात्मको गीतायाः श्लोक एवाऽऽसीदादर्शवाक्यम्। वैप्लविकदुष्करकर्मणः प्रारम्भे गीतां कृपाणञ्च शिरसि निधाय ग्रहणीय आसीत् समितिसदस्यैः शपथः।

केषाञ्चिद्गीताश्लोकानामुपदेशा विकृतायाः स्वदेशप्रीतेः कृते सापराधान्यपि कर्माणि समर्थयन्त इति महत्त्वाद्गीतायाः संक्षिप्तात् सारांशादेवानायासेन ज्ञातुं शक्यते। मानुषस्य जीवने तस्यापरिहार्येण क्षणभंगुरत्वेन यद्धि नामाऽऽपेक्षिकमगौरवं न्यस्यते, तदेवाऽऽपेक्षिकमगौरवमलम्पाटवैर्जनैः स्वप्राणविसर्जने परप्राणघातने वाऽऽरोप्यते। युद्धायार्जुनं प्रति पुनः पुनः कृता उपदेशाः पृथिव्यां धर्मसंस्थापनाय हिन्दुधर्मस्य पुनरुज्जीवनाय वा जनान् प्रवर्तयितुमेव विहिता इति तैर्मन्यते।

"हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः॥"

इत्यादिभ्यः श्लोकेभ्यः कीदृशोऽर्थो ग्रहीतुं शक्यते, स त्वकथितोऽपि ज्ञायत एव। "दारुणकर्मकरणाय कर्तव्यतयाऽपेक्षिते शौर्यकठोरतादौ विकृता भावभूयिष्ठता सर्वथा वर्जनीया क्लेशपरम्परारूपं जीवितं समुद्वहद्भिर्जनैरित्यादिप्रवर्तको[illegible] सूचिते गीताया महत्त्वं गौरवञ्चेति कथितं स्वर्गतेन बालगङ्गाधर-

तिलकेन। यथा तथा वा भवतु तेषां पदस्थानां ... परम् अयत्नेनैव प्रभावयितुं शक्येषु वङ्गीयेषु तरुणेषु तैरुपदेशैर्यत् फलं प्रदर्शितं तत् तु वैप्लविकदलानां ब्राह्मणवधरूपभीषणतमपापस्यानुष्ठानेऽप्यनौदासीन्यप्रदर्शनादेव सम्यक्तया प्रकाशीभूयते। कृती ...पो वसन्तकुमार-चट्टोपाध्यायो ब्राह्मणोऽपि निरनुशयं तैर्घातितः। वैप्लविक-प्रतिष्ठानानां गुरुभिः सर्वथैवोपेक्षितं वर्णाश्रम-धर्मप्रतिपालनरूपं गीतायाः प्रधानमतानाम...तममित्यक्लेशेनापि प्रदर्शयितुम् अलम्। क्षत्रियत्वादेवार्जुनो युद्धायोपदिष्टः। एक-वर्णीयानां जनानां धर्मोऽपरवर्णीयैर्जनैर्नानुष्ठेय इति दृश्यते गीतायामेवोपदेशः। न तु वर्णधर्माणां लक्षणं तेषां यथाविधि परिपालन... निर्दिशतोऽष्टादशाध्यायस्य त्रिचत्वारिंशश्लोकात् समारभ्य ...चत्वारिंश-श्लोकं यावत् पञ्च श्लोकाः, नवा पुनः "पर-धर्मो भयावहः" इति विषयप्रतिपादकस्तृतीयाध्यायस्य पञ्चत्रिंश-श्लोको वैप्लविकानां गीताध्यापनसमयेषु कदाचिदपि समुल्लेखं लेभिर इत्यसंशयं वक्तुं शक्यते। एतादृशे धर्मप्रवणे देशे विश्व-वन्दितस्य गीतासमाख्यस्य ग्रन्थस्य तादृश्यपव्याख्या कथं जातेति सत्यं विस्मयावहोऽयं विषयः। एतस्मादेव कारणाच्छासकेन समाश्रितं कठोरं धर्मविषयकम् औदासीन्यम्। तेन च हेतुना साम्प्रतं सर्वैरेव विद्यालयैस्त्यक्तं धर्मोपदेशनकार्यम्।

वैप्ल... हेतुभूतानां वस्तूनां तादृगेव विद्यत आधिक्यं यथा तैरेव वस्तुभिर्निर्मापयितुं शक्यतेऽश्रमेणैव कश्चित् सम्पूर्णो ग्रन्थः। तथा सति निर्माण... ...स्य (मत्कृतस्य) ग्रन्थस्य परिवर्तितः स्यात्। अतोऽपरां काञ्चिद् वैप्लविकपत्रिकां समालोच्यैवास्माद् विषयाद् विरमामि। "भवानी-मन्दिर"समाख्या खलु सा पत्रिका। यस्यामरविन्दघोषेण ...पकानि लिखितान्यासन्नध्यात्मवादसिक्तानि, येन च पुना राष्ट्र-

विप्लवरूप अपिशाचो धर्म्येण भावेन प्रभावितस्तनायवि- थोत्तेव सा पत्रिकाऽभूत् सम्पादितेति खल्वतर्कयन् सर्वे जनाः। हिमालये किञ्चिन्मन्दिरं निर्माय तत्र संस्थापनीया हि माता भवानीत्येवं क्रमेण प्रारब्धा लेखकेन पत्रिका। एतस्य पवित्रकर्मणः साहाय्यार्थं समाहूताः सर्वे मातुः सन्तानाः। काऽसौ भवानीति जनः स्वतः पृच्छेत्। भारतीयचित्ताप रणोचितैराध्यात्मिकैर्भावितैर्भूषितं कविना वृत्तं तस्य व्याख्यानं। सनातनस्य भगवतो यया नामानन्तया शक्त्या कालचक्रमिव ...इदं निरवसानं भ्रमति, सा हि ताव-नन्तशक्तिर्विभिन्नभावेनानन्तरूपे च जनानां प्रत्यक्षतामुपैति। अनन्तास्तथास्तैरेव खलु विभिन्नैर्भावैर्विशिष्यन्ते तावद् युगानि। साऽनन्तशक्तिरेवेयं भवानी, सैव तावद् दुर्गा, सैव खलु काली, सा हि प्रेममयी राधा, सा च लक्ष्मीः, साऽस्माकं जननी सर्वा-नवास्मा- सृजति। साम्प्रतिके युगे शक्तिजननीतया सा माता प्रादुर्भूता।

लेखकेन प्रतिपादनीयस्तावदयं खलु विषयः।—देशवासिनां शक्तिसाहससामर्थ्यानामभाव एवाऽऽस्ते। परम् सन्त्येव तेषां ज्ञान-प्रेमोत्साहाः। तथापि शक्त्यर्जनं विना साम्प्रतिके काले एतैः सर्वैरपि न किमपि करणीयं स्यात्। "गभीरं चेच्चिन्त्यते तदा इदमेव तावत् प्रतिभास्यति यदस्माकमस्त्येव कस्यचिद् विषयस्या-भाव इति। स हि प्राथम्येन शक्त्यर्जनप्रयत्नरूपः। शारीरिकी शक्तिः, मानसिकी शक्तिः, नैतिकी शक्तिः, सर्वोपरि च सर्वासामेव ...नामव्ययाऽक्षया च योनिराध्यात्मिकी शक्तिश्चेति सर्वा एवा-स्माभिरर्जनीयाः।"

ततो यो हि नाम आत्यभिमानो वैदेशिकं शासनं नो सहते, यश्च आत्यभिमानस्तद्वतां जनानां विस्फोटकास्त्रस्य (बम्) ...वतकास्त्रस्य (रिभाल्भार) च महतो प्रबलः प्रयोक्तो हेतुस्तं

आत्मभिमानं प्रति लेखकेनाऽऽकृष्टाऽस्माकं दृष्टिः। "भारत' भारतीया जातिर्वा नैव विलीयेत। जगतीस्थितासु जातिषु भारतीयानामेव कृते निश्चितमास्ते नूनं सर्वासामेव जातीनां तत्कालीनमङ्गलाय सम्पत्स्यमानं श्रेष्ठं समभिनन्द्यञ्च भागधेयम्। भारतादेव निर्गमिष्यति जगतोऽनागतकालस्य धर्मः। तेनैव च सनातनेन धर्मेण सर्वेषां धर्माणां विज्ञानानां दर्शनानाञ्च मध्ये संस्थापयिष्यते कश्चन समो भावः समानेष्यते च जातिष्वैक्यम्। जातिभिरद्यावधि समनुष्ठितेषु कर्मसु विस्मयावहतारतमञ्चेदं सुमहत् कर्म समारब्धुमेवाऽऽविर्बभूव भगवान् रामकृष्णो धर्ममुपदिदेश च विवेकानन्दः।" परं तद्भागधेयस्य सफलतापादनमपेक्षत एव शक्त्यर्जनम्। तस्यायमागतः समयः। अतः प्रथममेव विरचनीयं तावच्छक्तिरूपताया भवान्या मन्दिरम्। तत्रैव तन्मन्दिरमधिवसेयुः केचन सर्वत्यागिनो नवीनाः कर्मयोगिणः। याभ्यां कर्मभक्तिभ्यामपाक्रियेते नराणां भीतिदुर्बलता च, ताभ्यामेव कर्मभक्तिभ्यां समुपेतस्य पुरातनस्य वेदवाक्यभूतस्य वेदान्तसूत्रस्योपरि प्रतिष्ठितं ज्ञानं सुप्रतिष्ठं पर्वतमिवावलम्ब्य प्रवर्तेत तेषां कर्म।

एतैः कर्मभिः किं तावत् फलमवाप्यते? भवानीमुखेनैव लेखकेन विहितमस्योत्तरम्। "आर्यधर्ममयं जगद्विधातुं क्षमायाः कस्याश्चिज्जातेर्निर्माणं युष्माभिरेवोपक्रियेत। न हि यौष्माकीणैव सा जातिः, युष्माकं युष्मदीयानां सन्तानानां च न स वर्तनकालः, सागरैः शिखरिभिश्च परिगतं भारतवर्षमेव न हि तद्भुवनम्, परं जनानां कोटिभिः पूर्णा समग्रा भूतधात्री।"

भावप्रवणेषु सोत्साहेषु वङ्गीयानां तरुणानां मनःसु पूर इवान्मादकस्यास्य विवेश तत्प्रभावः। अशान्ततापादकैर्धर्मविषयकैरुद्दयावेगतरलैर्विवेकहीनास्ते विपत्पथ एव नीताः। ऊनविंशत्यधिकोनविंशतितमवत्सरस्य प्रथमे भागे बहुलिखितमिति-

नाम् एकस्याः समितेः कस्याचनैकस्य सभ्यस्य सकाशाद्यो प्रार्थनपत्रे तत् सर्वं स्पष्टीकृतमेवाऽऽसीत्। समितिप्रमाणीकृताल लब्धावकाशाः समितिसदस्याः न च न बहुमन्यन्त आनन्दमठ-निर्मातुरुपसंहारात्मकं वाक्यमिति यत् प्रागेव मयोक्तं प्रसङ्गत-स्तथाविधमेव किञ्चन वाक्यं तत्रापि पदं लेभे। साधारणजनानां निर्भयत्वेनानौचितकर्मकरणात् समनुभूतो यस्तेन द्वीपान्तरवास-दण्डस्तस्य न्याय्यत्वं प्रतिपाद्य कथितमिदं हि तेन—"द्वीपान्तर-वाससमये एतद्विषयमधिकृत्य स्थिरमप्रमत्तञ्च चिन्तितुमवसरं प्राप्य सम्मीलिते मे नयने। बुद्धञ्च मया भारताद् बृटीशशासनस्य दूरीकरणं नैव सुकरं काङ्क्षणीयं वा। यदि दैववशाद् कदाचित् शक्नुयाद् भारतं विध्वंसयन्वितेनाधर्मेण वैप्लविकेनोपायेनापि सफ-लतामधिगन्तुम् तदा जगत आध्यात्मिकोन्नयनरूपेण महता लक्ष्येणो-पलक्षितं तत् (भारतं) सर्वाभिर्जगतीस्थिताभिर्जातिभिः कदापि नैवाऽऽश्रयणीयं भवेत्।" येषामाध्यात्मिकभावसम्पन्नानां जनानां निदर्शनैः प्रकीर्णं खल्विदं भारतम्, तेषामेकतमोऽयं धर्मार्थोत्सर्गी-कृतजीवितो लेखकः। राजपुरुषैरनुष्ठितात् तदीयग्रहणात् पूर्वं कथं तेन त्यक्तो वैप्लविकदलेन स्वस्य सम्बन्धस्तदपि तेन तत्र वर्णितम्। न च वैप्लविकदलस्य लक्ष्यं तस्याऽऽसीदनभिमतमिति कृत्वा वर्जित-स्तेन तद्दलस्य सङ्गः परं सनातनस्य सत्यस्य परमेश्वरस्य लाभाया-ऽऽत्मप्रेरणाया अङ्कुशाघातेन सन्दीपितस्य तस्य स्वजीवितविनियोग एव तत्र सङ्गत्यागे हेतुः। तस्य नाम स्वेषां दले विनिवेशयद्भि-र्विप्लवप्रवर्तकैस्तदीयानां धर्मविषयिणीनामुच्चाशानां कीदृशो व्यवहारः कृतस्तदपि तेनैव व्याख्यातम्। "वैप्लविकैरेव कर्मभिर्भारतस्य मुक्तिर्भवेन्नान्यथेति, हिन्दुधर्मः शास्त्रनिगडान् भङ्क्त्वाऽपि सहस्र-गुणसंवर्धितया भास्वरतया तेजस्वितया चोपेतम् भवितव्यं नवजीवनमेष्यत्येवेति, भारतञ्च पराभूय जगन्नूनं तस्याऽऽध्यात्म...

उन्नयनं जनयेदिति च तेषां मतेषु ते तस्य विश्वासः दृपाक्रमिति चिन्नमेवैतत् ।"

विकृतया स्वदेशप्रीत्या विकृतेन धर्मेण च युगपत् संवर्धितस्यास्य करुणस्यापि दुष्टस्य समान्दोलनस्येयं हि खलु शोचनीयता। त्रयोविंशत्यधिकोनविंशतिशततमे खृष्टाब्दे आगष्ट्मासस्य तृतीये दिवसे यो हि नाम युवा शाँखारिटोला-पत्रस्थानाधिकारे स्थितस्य अ-तलालरायस्य घातकतया निर्णीतोऽभूत्, तेनैव कथितम्—"कस्यचिद् धर्मभीरोर्विदुषश्च जनस्याऽऽदेशेनैव मयैतस्य हननं सम्पादितम्" इति। नवसंगृहीतसभ्यानां गुप्तसमितिषु समान्दोलनप्रवर्तकानां पवित्रतायाश्चान्धो विश्वास एव समान्दोलनम् अरुन्तुदेन कारुण्येन विशेषयति।

द्वाद[illegible]ल्लासः

भारतीयानां कलानां वैशिष्ट्यम्

अर्वाचीनकालस्य भारतीयं राजनीतिकसमान्दोलनं विशेषयङ्क्यां विद्वेषविप्लवाभ्यां जाता, देशस्य प्रतीच्यत[illegible]न तदानुषङ्गिकस्य शिक्षितैर्भारतीयैः क्रमप्रतीयमानमूल्यस्य जातीयवैशिष्ट्यापचये च प्रतिकूला प्रतिक्रिया मया पूर्वतनेषु कतिपयेषूल्लासेषु सविस्तरमेवानुचिन्तिता। राजनीतिक्षेत्रे पुनरभ्युत्थानभावः सर्वोत्कर्षेणैव वर्तते ; राजनीतिनि[illegible]णाश्च यथा स्थानान्तरे तथा भारतेऽपि सर्वथैव स्वप्राधान्यरक्षण एव बद्धयत्नाः। जातीयतावा[illegible]स्य यत् खलु लक्षणं कृतं वि-सि-पालमहोदयेन, तदनुसृत्य चेदुच्यते तदा [illegible]नैव राजनीतिकेन न भवितव्यम्। राजनीतिकोविदस्य जनस्य जातीयताभावाद् राजनीत्यनभिज्ञस्य जातीय[illegible]भावोऽधिकतरं हि [illegible] वस्तु। डक्टर् [illegible]नाथ-ठाकुरः कविरेव, परम् बहुभिर्भारतीयैः स धृतविग्रहो जातीयादर्श इव परिगण्यते। राजनीतिविदां प्रचलितया प्रियया रीत्या विदेशीय[illegible]सनस्यात्याचारान् अविचारांश्चावर्णयित्वा वर्णिता तेन स्व[illegible] धीशक्तिः। भारतीयानां [illegible]तावश्यकरूपेण स्थितां तेषामेवातीतवार्ताम् आलोक्य, स्मारयंश्च भारतीयानामे विस्मृतप्राया[illegible]त्पधिका[illegible]ताकथाम्, दर्शयति स स्वकं सजीवतासम्पादनकौशलम्। तस्य लिखितेषु प्राचीनभारतस्य [illegible]पं प्रतिबिम्बितं दृश्यत इति भ[illegible]तमध्यापकेन राधाकृष्णेन। राजनीतिवि[illegible]

विप्लववादिनाञ्च वाग्या यस्मादेव विषयाल्लब्धा प्रेरणा यश्च वा विषयो लक्षीकृतः ; रवीन्द्रनाथस्यापि वाग्या तस्मादेव विषयाल्लब्धा प्रेरणा विषयश्च स एव लक्षीकृतः। चित्रम् जातिगतसङ्कीर्णता-परिहारवादिभिर्दुष्टेऽप्यस्मिन् समये प्राधान्येन मूलतश्च भारतीया-नामेव विषयाणां प्रतिसम्पादनाय यत्यते तेन सर्वान्तःकरणेन। रवीन्द्रदर्शनविषये भारतीयैर्धृतस्य मतस्य संक्षेपोऽध्यापकेन राधा-कृष्णेन स्वरचितग्रन्थस्योपोद्घाते समासेन निवेशितः। "सार् रवीन्द्रनाथठाकुरस्य वाणी-दर्शनयोर्व्याख्यानादेव धर्मकलादर्शनेषु भारतीयादर्शस्य व्यञ्जकं तस्मादेव समुद्गतञ्च तदीयं कार्यजातं व्याख्यातं भवति। रवीन्द्रनाथस्य कृतौ तदीयहृदयस्य भारत-हृदयस्य वा स्पन्दनमनुभूयत इत्यपि नास्माभिः शक्यते बोद्धुम्। कृतौ तस्य शृणोति भारतं स्वकीयमीप्सितं नष्टसन्देशम्।" अपरथा चेदुच्यते, तदा न तु तस्य साहित्यनिर्माणे कौशलम्, परं ... वनस्थितान् जनान् भारतीयसंस्कृतौ स्वकं सर्वातिशायित्वं प्रदर्श्य प्रसभं तेभ्यः सम्माननाभिनन्दनार्जने तदीयं सामर्थ्यमेव भारतीयानां जनतानां सकाशात् तस्य गौरवलाभे वीजम्।

प्रथमदर्शनात् सम्यगननुभूतोऽपि बुद्धिविषयतालाभानन्तरं विस्मयावहः प्रतीच्यप्रभुत्वमसहमानः कश्चन विद्रोहभावः कला-जगत्यपि वर्तत एव। अहमहमिकयोपलक्षिते दारुणेऽस्मिन् युगे समासादितावस्थानस्य भारतीयस्वभावस्य विचेष्टितेभ्य एव जातं परिदृश्यमानमिदं लुप्तवस्तूनां पुनरुद्धरणम्। द्वयोरादर्शयोः सङ्घर्ष-स्यापरोऽयं कश्चनाऽऽकारभेदः।

भारतीयकलानां प्रतीच्यकलानाञ्च मध्ये यो हि नाम मौलिको विभेदो वर्तिष्यत, यश्च विभेदः प्रायेण सर्वथैव न स्वीक्रियते, अन्यथैव वाऽवगम्यते, तमवगाहयित्वाऽस्य विषयस्य विशदीकरणम् असम्भवमेव। नास्ति मे प्रकारगतभेदेनात्र तथाविधः सम्बन्धो

यथा विद्यते लक्ष्यगतैर्भेदैः। प्रकारगतो भेदस्त्वस्त्येव। अवयव-[illegible] प्रतीच्यचित्रे समं तुलनया प्राच्यस्य चित्रं दैविकचित्रतयैव वर्णितम्। परं मे साम्प्रतिकोद्देश्यसिद्धौ द्विप्रकारयोः कलयोर्विभेदचिन्तनं तुलनया तुच्छ एव कश्चिद्विषयः। [illegible]नां प्रतीच्यकलानां [illegible] भेद एवात्रावधानविशेषार्हः। आशयगतोऽयं भेदस्तावत् कथमपि वक्ष्यमाणप्रकारेण व्याख्यातो भारतीयेन व्याख्यात्रा। परितो दृश्यमानान् सर्वानेव विषयान् यथायथं चित्रे विनिवेशयितुं यतन्ते प्रतीच्यशिल्पिन इति नूनं स प्रतिपादयेत्। तक्षको वा चित्रकरो वा प्रतीच्यशिल्पी स्त्रियाः पुंसो वा मूर्तिनिर्माणावसरे विस्मयावहमेव सादृश्यं विरचयति। ससीमा तस्य सौन्दर्यादेरादर्शरचनाशक्तिः। चित्रादर्शभूतस्य वस्तुनः प्रकटान् दोषानपनीय तत्र गुणसंयोग एव स [illegible]मः। मानवमूर्तेर्यथायथत्वेन चित्रणमेव तस्य कल्पनायाः परा काष्ठा। मानवमूर्त्यतिरिक्तस्य विषयस्य द्योतनं बहिर्भूतमेव तस्याभिप्रायस्य। वास्तवतैव तस्य लक्ष्यं न पुनः काल्पनिकता।

एतद्विषयस्योपपत्तये निरूपणीया एवात्र मे पोष्ट्-इम्प्रेशनिसम् फिउचरिसम् फिउचारिसम् इत्यादिभिर्नामभिः परिचिता अर्वाचीनाया युरोपीयकलायाः कौतुकावहा उपचयाः। परं तेषां मूल्यावधारणे स्थायित्वपरिचिन्तने चासमर्थमहमात्मानं परिकल्पयामि। तथापि क्षणभंगुरत्वेनोन्मत्तकल्पनात्वेन चागृह्यन्त ते (उपचयाः) समकालीनैः कलाविद्भिरिति सत्यमेवैतत्। विविधेषु कलाचित्रस्य [illegible]लावहाया अतिसूक्ष्मानुभूतेर्जाता कल्पना[illegible] काचिन्नवीनतैव प्रत्य[illegible]काया: कलाया वैशिष्ट्यमिति केनचित् स्वीक्रियते। परं फिउचरिसम्-फिउचारिसम्-विषये तेनैव लिखितम्—"एतौ ताव[illegible] निरर्थकौ यदेतयोः स[illegible]र्थकपेक्षासुलावहयाऽनुरूपाऽपयसृष्टत्वं वक्तुं शक्यते। फिउचारिसम् अपि यदि

स्वस्यानुगतं विपुलं कञ्चन भावपर्यायः। परं फिडयास्ट-
प्रभृतिभिस्तं भावपर्यायं वर्णयितुमालिखितुं वा प्रयतितैर्न
साफल्यं लब्धम् इति दीर्घायां स्वगतकल्पनातायां प्रवाहविच्छेद-
मननुभवन्त्यपराणि चित्रविषयकाणि मनोलौल्यानीव स फिड-
यास्टिसम् अपि फिडविसश्रोतामेवास्माभिः संस्थाप्यते। सत्यं
वा मिथ्या वैतद् विवरणम्, युरोपीयाणां शास्त्रादिकलाप्रासेतो
प्रकारा नैव कञ्चिदपि भागं गृह्णन्तीत्यस्य विषयस्य ग्रहणमेवात्र मे
समीचीनतया प्रतिभाति। हिन्दूनां बौद्धानाञ्च कलाभ्योऽप्रद्यावैव
स्वपक्षसमर्थनावसरं तासां निन्दनाय या खलु स्वाभाविकी
प्रवृत्तिर्जायते प्रतीच्यकलायाः प्रधानप्रवाहभूतया वास्तवतया रञ्जित-
मात्मानं मन्यमानस्य भारतीयस्य परीक्षकस्य, सा तु न च न
युक्तिसिद्धा।

भारतीयानि मण्डोक्कचित्राणि तदितराणि वास्तुकाकारतया
युरोपीयाणां विस्मयमेवानुपादयन्ति। मनुष्याकाराणां नास्त्यजनक-
मनुकरणं हि भारतीयं प्रतिच्छन्दः। भारतस्यांशविशेषेषु स्थितानां
मन्दिराणां गात्रेषूत्कीर्णानि मूर्त्यादीन्यश्लीलान्येव। भारतीय-
कलानां प्रतीच्यकलानाञ्च तुल्यञ्चेत् प्रवृत्तिनिमित्तम्, तदा प्रतीच्य-
कलाभेदेन भारतीयेन परीक्षकेणानुष्ठितं तासां निन्दनमपि
न्याय्यत्वं यायात्। अत तावद् भारतीयो व्याख्याता स्वदेशीयानां
कलानां लक्ष्यान्तरत्वमेव प्रतिपादयेत्। तन्मते तु जागतिकानां
वस्तूनां यथार्थप्रतिमूर्तिनिर्माणेन समं नास्ति कोऽपि सम्बन्धो
भारतीयस्य कलाविदः। बाह्यरूपमनु यत् खलु सत्यं विद्यते,
तत्प्रतिपादनमेव तस्य लक्ष्यम्। तदीयाः कलास्तत्रैव दर्शन-
मनुवर्तन्ते। अतथ्यं हीन्द्रियग्राह्यं जगत्। आवरणमात्रं तत्
तथ्यस्य वस्तुनः। विचित्रस्य तस्याऽऽवरणविशेषस्य प्रतिरूप-
निर्माणे न दृश्यते तस्येहा, परं दृश्यत एव सा तदावरणेन व्यव-

हितस्य वस्तुनः स्वरूपस्थापनं। यः खल्वाध्यात्मिकत्वं तस्य दर्शनेषु देदीप्यते, कलास्वपि स एव तस्य प्रणोदकः। न हि स च इन्द्रियग्राह्यमेव वस्तु चित्रेषु निवेशयति, परं तद्वस्तुनो ध्यानाद् यत् तस्य मनसि जायते, तदेवाऽऽकारैर्वर्णादिभिश्च योजयति।

द्रष्टुमशक्यानां विषयाणां सूचनम् न तु नेत्रपथागतानां वस्तूनां याथातथ्येन चित्रे विनिवेशनमेव समुद्देशो भारतीयकलाविद इति विषये प्रतीतिविषयतां गते सुग्राह्याणि भवन्ति सनातनप्रथानुयायीन्यस्वाभाविकान्यपि भारतीयानि धर्म्याणि प्रतिरूपाणि। "शरीरविज्ञानानुमोदितमानवशरीरस्य यथार्थप्रतिमूर्तितया तद् (भारतीयकलाविदा लिखितश्चित्रम्) ग्रहीतुं नैव शक्यत इति लिखितं ओ-सि-गाङ्गुलीमहोदयेन। संवदन्ति च तानि वास्तवतामतिवर्तमानेन केनापि वस्तुना। शारीरविज्ञानानुमोदितेन साधारणजनस्य शरीरेण नैव वहन्ति तानि किञ्चिदपि साहश्यम्। अतः खलु चित्रवस्तुनो वाऽऽकारातिरिक्तविषयस्य प्रकटनाय भारतीयेन कलाविदा श्रयणीया आसन् केचन विशिष्टाः सङ्केताः अतिवास्तवताप्रतिपादनोचितावयवसंस्थानभेदाश्च।

अतस्तावन्मन्ये प्रतीच्यदेशीयैः कलानां गुणदोषविचारकैरविचार्यैव भारतीयदेवतामूर्तीनां बहुबाहुत्वबहुमस्तकत्वादिरूपाणि वैशिष्ट्यानि नीतिविरुद्धानि भावव्यञ्जनेऽक्षमाणीति च दूषितानि। विशुद्धाः कलाश्चेद् भावानामभिव्यक्तिर्न त्वाकाराणाम्, तदा दक्षिणभारतस्थितैर्मन्दिरतक्षकैर्निर्मितस्य नृत्येश्वरस्य शिवस्य श्रीनटराजस्य पित्तलमयप्रतिरूपस्य शिल्पचातुर्यं नैवापलपितुं शक्यते। चतुर्भिर्भुजैः समुद्धृतेन वामपादेन चोपलक्षिता वह्निमण्डलपरिगता सा मूर्तिः प्रचण्डवेगसम्पन्नं किञ्चिद् वस्तु द्योतयति। अश्लीलानि वा भवन्तु तानि नाम प्रतिरूपाणि वैदेशिकानां मनसि सौन्दर्यभावमुद्बोधयितुम्, परं भारतीयानां सविधे तेषां व्यङ्ग्यमस-

न्विग्धमेव। भारतीयानां समीपे नटराजो धृतविग्रहम् इव समग्रं दर्शनशास्त्रम्। सर्वस्य जगतो धात्रीं सर्वेषां प्राणरूपां ...ऽऽद्याशक्तिं पश्यति स नृत्यस्य भ्रमिषु। प्रलयकामना मुक्तत्वावस्थाश्च नृत्यस्यापराभवस्याभिव...यन्ते। नटराजस्य मूर्तेर्विस्तृतं विवरणं ...समसामयिकैः साहित्यैर्वर्णितस्य त...तत्पाशवस्यांशविशेषाश्च डक्टर ... भारस्वामिलिखिते "डान्स् अफ् शिव" (शिवनृत्यम्) ...आख्याते निबन्धात्मके ग्रन्थ एव दृश्यन्ते। नैव पारयन्ति प्रतीच्यकलावि...। भारतीयया दृष्ट्या मूल्यमवधारयितुं तस्य शिल्पकर्मणः, यस्यान्तर्नि...तार्थस्तेषां सकाशे प्रच्छन्न एवाऽऽस्ते।

डक्टर ...भारस्वामिसदृशेन विदुषा दृश्यतां नाम नटराजे कलाधर्मविज्ञानानां सङ्कुलनम्, घुष्यतां वा तेन "दृग्विषया...मन्तःस्थितायाः, विज्ञानेन निर्विवादं स्वीकृतायाः शक्त्या, विज्ञतया निर्मिता एतादृशी यथार्था प्रतिमूर्तिर्नैव शक्यते स...तुपादयितुं साम्प्रतिकेन ... कलाविदे"ति, वयं त्वस्य मूल्यावधारणेऽसन्दिग्धमेवाक्षमा इति च ब्रूमः।

...पूर्वभागे सुबहुलप्रचारात् प्राच्यविषयानभ्य...कामानामभ्वनीनानाञ्च सममेव परिचिता हि बुद्धस्य साङ्केतिकी निषण्णा प्रतिमूर्तिः। भारतीय-युरोपीययोः कलयोर्मध्ये स्थितो यः खलु कलाविषयको मौलिको विभेदः प्रकटीक्रियते द...नटराजस्य प्रतिमूर्त्या, बुद्धस्य प्रतिमूर्त्याऽपि स एव विभेदः प्रकाशीभूयते। प्रतीच्यदृष्ट्या चेत् समालोच्यते बुद्धस्य प्रतिमूर्तिस्तदा तत्र बहव एव दोषा दृश्येरन्। मुखमण्डलं भावविहीनम्; नापि शरीरविज्ञाना...स्तत्रावयवसंस्थानवि...। बुद्धस्य मूलशरीरेऽस्थिमांसधमन्यादिकम् आसीदित्यस्य नास्ति तत्र किमपि सूचकम्। एतया दृष्ट्या सा प्रतिमूर्तिरसमाप्तेति वक्तुं शक्यते, परं ...त्या तया मनसि स...तुपाद्यत एव ...ल्पनस्तस्या अभीप्सितः स भावः।

काम ऽस्य विशाला पित्तलमयी बुद्धप्रतिमूर्तिर्बौद्धशिल्पानभिज्ञस्यापि मम मानसे यं खलु भावं समजनयत् तस्य निर्वर्णनाय जायते मेऽत्र प्रबला काचिद् वासना ।

"उन्मुक्ते नभस्तले कस्मिंश्चिद् रमणीये भूभागे वर्तते प्रतिष्ठिता सा विपुला प्रतिमूर्तिः। मूर्त्याश्रितस्य तस्य भूभागस्य सौन्दर्यं कथमपि नैव शक्यतेऽपलपितुम्। नेत्रविषयी...तायां तस्यां बुद्ध-प्रतिमूर्त्याम्, तत्स्थानस्य स्थिरस्य दृश्यस्य रमणीयतामवमत्यैव स...र्णनिर्विकल्पताभावः प्रसभमप्रतिहतश्च विशति नराणां चेतःसु। या खलु दिव्या शान्तिमूर्तिमयीव ददृशे बुद्धस्य वदने, ...-तया च समं दृढं नीरवञ्च स्पर्धमानेव सा चकासा...कार। ऋतूनां प...र्तनेन समं भिन्नरूपत्वं प्रयान्त्यस्तमनानि, परं कालस्य गत्याऽ-परामृष्टा, ग्रीष्म-शीतयोः शरद्वसन्तयोश्चानवहिता, जायमान... म्रिय-माणेषु च जनेष्वचेतना गभीरध्यानमग्ना, कामवासनावजनमा...-लभ्यायां पूर्णायां शान्त्यां विराजमाना सा बुद्धस्य प्रतिमूर्तिस्त-...शोभते। तस्या दिव्यायाः शान्त्याः पूर्णायाः सुमहत्या निर्वृतेश्च समीपे सर्वमन्यत् तुच्छतां जगाहे।"

निपुणं विचार्यते चेत् तादृशानुभव...कं कारणम्, तदा भावस्य वस्तूनां याथातथ्येन विनिवेशनस्य चाभाव एव तत्र प्राधा-न्येन प्रष्टव्यतां यायात्। समग्रया प्रतिमूर्त्या ...। स्थिरतात्म-कात् प्रधानाद् भावान्नैवान्यतः समाकृष्यते मनः प्रति...रितरै-र्विस्तारविशेषैः। सर्वं हि तत्र निश्चलम्। शरीरे मनसि वा किमपि नासीच्चञ्चलताया व्यञ्जकम्। प्रशान्तताया वा, कर्मविमुक्तेर्वा, मोक्षादिशब्दवाच्यायाः सकलबुद्धयतिशायिन्याः पूर्णायाः शान्तेर्वा, जन्मव्यसननिष्कृतेर्वा, यं हि नामाऽऽदर्शविशेषमधिगन्तुं युगानि व्याप्यैकान्तिकेनाऽऽग्रहेण यतते भारतीयैस्तस्याऽऽदर्शविग्रहस्त्वेवेयं प्रतिमूर्तिः।

रीतिगतः सप्तदशशतकाब्दे भेदः स्फुटं हि लक्ष्यते भारतीयवास्तुकलासु। भारतीयविमानां विशेषकं लक्षणं भारतीयेषु चित्रेष्वपि वरीवृत्यते। अत्र प्रतिवादयितारो वास्यति मे सामान्येयमुक्तिः। क्राइष्ट्-सम्भूतेः परतः प्रायेण सप्तशतवर्षाणि भारतीयचित्रकलायाः प्रथमावस्थारूपेण परिगण्यन्ते। अजन्तास्थितानि बौद्धमण्डलोद्कचित्राणि तात्कालिकानां चित्राणां मुख्यानि निदर्शनानि। प्रदर्शयाञ्चक्रुस्तत्र बौद्धचित्रकाराः स्वेषां सम्प्रदायस्याऽऽदर्शभूतानि चित्राणि। लक्ष्येण काल्पनिकान्यपि तत्सम्प्रदायस्य चित्राणि वास्तवान्येवाऽऽसन्। सप्तदशशताब्द्यां जातेनैतिहासिकेन तारानाथेन तानि चित्राण्यधिकृत्य लिखितम्—"तेषां चित्राणां वास्तवता जनानां भ्रान्तिमवोत्पादयद्" इति। तथैव मोगलसम्प्रदायगतेषु चित्रेष्वपि वास्तवत्वस्यैवोत्कर्षो दृश्यते। चित्रविषयीभूतेन वस्तुना चित्रस्यात्यर्थं सादृश्यनिर्माणं प्रधानं चैतस्य (मोगलसम्प्रदायस्य) प्रयत्नः। परं मोगलसम्प्रदायेन तद्वास्तवत्वं पारसिकदेशान्मध्य-एशियातश्च लब्धम्। अतस्तद् भारतखण्डजातत्वेन ग्रहीतुं नैव शक्यते। मोगलसम्प्रदायेन सममेव विवृद्धिं गते प्रत्युत भारतीयसम्प्रदायाज्जाते राजपुतसम्प्रदायेऽप्यवतिष्ठते विशुद्धा काल्पनिकता। अनेकशो देवत्वं प्रापितानां पशूनां चित्रेष्वेव सा काल्पनिकता विशेषेण प्राकट्यं दधौ। भारतीयकर्षकस्य दैनन्दिनजीवितस्य चित्राङ्कणे निपुणोऽपि राजपुतचित्रकारः [illegible] धर्म्याभ्यां महाकाव्याभ्यां रामायण-महाभारताभ्यां तात्कालिककथाः शैववैष्णवमतयोरुपाख्यानम्यापि प्रेरणालाभायास[illegible] प्रयेते। अति हि नाम गूढार्थं तस्य शिल्पम्। न चैतदेव सर्वम्।

भारतीयकलायां विशिष्टतया परिलक्ष्यमाणस्य व्यञ्जकत्वस्य [illegible] [illegible]नानां राजपुतसम्प्रदायगतचित्राणां कामं [illegible]करतलगतामिवाऽऽसते। गुणवान् ग्रन्थेव कलानां गुणागुण-

विवेचनायालम्। द्रष्टरि स्थिता गुणा दृश्ये वस्तुन्यपि संक्रमिता भवन्तीति मन्यन्ते भारतीयाः। मदधीनेषु चित्रेषु कानिचिद् रमणीय उद्याने समवेतानां विभिन्नावस्थया स्थितानां नरनारीणां विचित्राणि चित्राणि। कानिचित् पुनः सुचारुजलप्रवा स्रोतस्ततो विच्छिन्नेषु शाद्वलेषूपवनेषु वा विराजमानानां मनोहराणां पटमण्डपाना अलिन्दान् समुन्नता वेदिकाश्च संश्रितानां स्त्रीपुरुषाणां प्रतिरूपाणि। परिस्फुटो हि व र्णकविन्यासः। प्रतीच्यदृष्ट्याऽस्वाभाविक्योऽसुगमा अपि तास्ता मूर्तयो भारतीयविध्यनुरूपा उल्लासभावोद्बोधिकाश्च। न मया बुद्धानि तानि चित्राणि। पर तानि येन प्रकारेण विलिखितान्यासंस्त तिरिक्तं किमपि व्यञ्जकत्वं तेषां न खलु मया समनुभूतम्। अनुभूयत एव तेभ्यश्चित्रेभ्यो भारतीयैः कलाविद्भिस्तथाविधः कश्चन भावो यस्तावद् अस्माभिर्नैव बुध्यते। तेषां यस्य कस्यापि वैकतमस्य दर्शनाद् हिन्दुकलापरीक्षकस्य मनसि नूनं जायेत विशिष्टः कश्चिन्माधुर्यरसः। चित्रं स मूर्तिमत् सङ्गीतकं मन्यते। सर्वाण्येव चित्राणि स्वेषां वर्णकैराकारैश्च माधुर्यविशेषमेव द्योतयन्ति। सुस्वरं सङ्गीतमाकर्णयता मनसि लिख्यते तेन तत् सङ्गीतस्य चित्रम्। सङ्गीतेन चित्रस्यैतादृक् सम्मिश्रणं भारतीयैरेव भारतीयकलायाः समुद्देश्यतया स्वीकृतस्य वस्त्वन्तःस्थितभावप्रकाशनस्य, अमूर्तविषयकाभिव्यञ्जनस्य वा निदर्शनमेव समुपस्थापयति। भावाः, न तु प्राणिनो द्रव्यादयो वा शक्नुवन्त्यात्मानं सङ्गीते चित्रे च युगपत् प्रकाशयितुम्। शोपेन्हार्-महोदयेन शिल्पेन सङ्गीतस्य यः सम्बन्धः प्रदर्शितस्तेनैव विषयोऽयं तुलयितुं शक्यते। बाह्याकारैः समभेतयो यो: क [illegible] सम्बन्धो न दृश्यते। पूर्वोक्तो विषयः समयनासम्ब : सन् स्थानविशेषमधि [illegible]। परोक्तो विषयस्तु स्थानविशेषेणासम्बद्धः सन् समयाव [illegible] एव विद्यते। परं तावत्, समतैक-

भावाश्रितत्वञ्च द्वयोरेव मुख्यभावेन परिल न्यन्त। तथोरैकयोान-जत्वाद् एफ् भन् शेगल-महोदयेन स्थाने खलु शिल्पं पिथंड ता-सङ्गीतत्वेन वर्णितम्।

भारतीया मनावृत्तिर तेषु न पुनर्मूर्तेषु, भावेषु न नर्वस्तुषु समन्विष्यति सत्यमिति आकबरस्य सभायां स्थितस्य विश्रुत-सङ्गीतज्ञस्य तानसेनस्य प्रख्यातया कथयैव विशेषेण विशदीक्रियते। मध्याह्ने आकबरस्तं गायकं रात्र्यां गेयं कञ्चिद् रागं गा मादिदेश, विभिन्नेन भावेन, ऋतुना कालेन च सम्बद्धो विभिन्नो रागो गेयः खलु समुचिते काले समुचितायामवस्थायाञ्च। राजादेशं शिरसि निधाय स एव रागः समारब्धस्तानसेनेन। अथ समुत्थिते गायकस्य सङ्गीतघोषे तद्ध्वनिमुखरे भूभागे समवततारान्धकारः। सङ्गीत-माधुर्येण दिवैव समागता रजनी, अथवा रागमुग्धाः श्रोतारो दिवसमपि रात्रित्वेनामन्य । भावविशेषाणां गायिकात्मक-विषयकेषूपाख्यानेष्विदं खल्वेकम्। सत्यमेतेन सुशृङ्खलितस्यापि प्राकृतिकनियमस्य विरोधो जायते।

त्रयोद[illegible]ल्लासः

धर्मस्य यौनप्रतीकतावा[illegible] :

पूर्वतन उल्लासे व्याख्याता[illegible]नि मया भारतीयकलानां वैशिष्ट्यानि, प्रतो[illegible]व्यव[illegible]या स्वाभाविकतया प्रतीयमानानां प्रतिमूर्तीनां तथात्वे कार[illegible]णि च। [illegible]रोपीयावस्कन्दात् परं कियन्तं कालं विषयान्तरेष्वि भारतीयकलास्वपि प्रतीच्यभावस्यैवाभूत् प्राधान्यम्। प्रतीच्यस्याऽऽदर्शा गुणागुणविवेचितानि च तदानीं स्वी[illegible] भारतीयैः। व्यापारान्तरेष्विवात्रापि जाता काचित् प्रतिकूला प्रतिक्रिया। साम्प्रतं स[illegible]त्थित एव कश्चिल्लेखकवर्गो येन प्रत्याख्याय वैदेशिकमतानुगं समालोचितं स्वदेशस्य प्रत्नः सम्प्रदायः समर्थ्यते। भारतीयकलानाम् अभिनवेनानेन दिग्विजयेन सममतीतकालस्य मतादिभ्यो लब्धप्रणोदनः समुदितो भारतीयचित्रस्याऽऽधुनिकः सम्प्रदायः। साहित्यजगति डक्टर्-आनन्दकुमारस्वामी, चित्रजगति च कलाविद्वर्गेणानुगतौ डक्टर्-अवनीन्द्रनाथठाकुर-गगनेन्द्रनाथठा[illegible]र-महोदयौ चैतस्य समान्दोलनद्वयस्य प्रधानाः प्रतिनिधयः।

प्रथमतो भारतीयकलाः समाश्रित्य युरोपीयैः कृतेन समालोचितेन द्वन्द्वम्, द्वितीयतश्च प्रतीच्याकर्षं त्यक्त्वा स्वदेशस्य पुरातनादर्शस्वीकरणाय भारतीयानां सविधे प्रार्थनम् इति विषयद्वयमेव लक्षीकृतं डक्टर्-[illegible]मारस्वामिनो लिखितैः। भारतीयधर्म्मसाहित्यस्य यौ[illegible]नप्रतीकतावा[illegible]: स्वत एव [illegible]तीव्रसमालोचनाविषयतां गतोऽपि [illegible]रपीयसमालोचकैर्न याथार्थ्येन बुद्धः। भारतीयमन[illegible]स्या

सम्बन्धमभिलषतां प्रतीच्य-जनानां जनानां भारतीयसा... भावस्तावत् प्रबलः प्रतिबन्धः। केषुचिद् हिन्दूनां धर्म... देवानामपि मानवोचितमदनविकारादेर्दर्शनात् तान्यन्यसुबोधत्वमेव प्रयान्ति। स्थानान्तरे मया लिखितपूर्वा राधा ... शृङ्गार-वर्णनात्मिकाः कथा ... कल्पन्ते। पूर्वविश्वासो... न-ऽसमर्थान्यपि डक्टर् कुमारस्वामिनोऽन्यचाऽऽस्तद्विषयकाणि व्याख्या-नान्यत्र भृशमेवोपकारकाणि भविष्यन्ति।

तन्मते दिव्यो र...स्यविशेषा हि सर्वं प्रेम। भारते पवित्रा पवित्रभेदेन प्रेम्णो विभागः सर्वथा निरर्थक एव। कस्याञ्चि-त्स्त्रियास्त... प्रेमवशगस्य जनस्य समीप आत्मनिवेदन... परमात्मना जीवात्मनो म...त्वेन गृह्यते। "भारते यौनसम्बन्धो ... तयैव न तु कदाप्यसङ्गतानामश्लीलानां वा भावानां द्योतकत्वेना...क्रियते" इति सार्-मणियर-विलियम्-महोदयस्य वचनं स...र्णतया स्वीकृत्यैव तेनास्योपन्यसनं कृतम्। भारतीयानां धर्मो न हि तेषां दैनन्दिनजीवितस्याऽऽचरितेभ्यो विच्छिन्नः कोऽपि पदार्थविशेषः, परं क्षुद्रात् क्षुद्रतरस्यापि तेषां दैनन्दिनजीवितस्याऽऽचर...स्याऽऽत्त एव कश्चन धर्म्यो भाव इत्येव तदीयं मतम्। यथा जलं विभज्य यथेच्छं पात्रद्वये रक्षितुमभिलषितसमयेऽवपातयितुञ्च शक्यते, न हि तथा धर्मो जीविताद् विभिद्याऽऽधारान्तरे निधाय प्रतिसमर्...नं तस्मान्नि-र्गमय्य ...नर्जीवितेन योजयितुं पार्यते।

भारतीयधर्म्यसाहित्यविशेषस्य यौनप्रतीकताविषये व्याख्यानं शङ्के नैव सुगमं भवेद् युरोपीयानां विद्यार्थिनाम्। ... गतको...कास्थितस्य विशाल...धर्ममन्दिरस्यान्येषाञ्च मन्दिराणां गोपुरस्थाः ... मूर्तीर्दृष्ट्वा रोमसाम्राज्यस्य चरमे भागे जातस्य तक्षणकर्मणो वैशिष्ट्यञ्चेत् स्मर्यते तेन युरोपीयविद्यार्थिना, तदा न हि स निन्दनीयः। व...तस्त्वन्यासां जातीनामिव भारतीयानाम्

अप्याध्यात्मिकजीविते धीविषयकजीविते च समजन्यत तावत् स[illegible] अल्पधनत्यादिकम्। परं सुदीर्घसमयाश्रयणाद् भारतस्योन्नत्य-वनत्यादिकं समधिकं स्फुटतां जगाहे। बुद्धधर्म[illegible]न समं जनानामाध्यात्मिकजीविते समलक्ष्यत कश्चिदवसादः। तदानीं रहस्यात्मकं तान्त्रिकमतं तत्सदृशान्यपराणि च धर्ममतानि सुबद्ध-मूलानि सन्ति परां विवृद्धिं भेजिरे। एतेन समाजस्य नैतिक-चरित्रस्य च सुमहान् समजायतापकर्ष इति राय-बाहादुर-दीनेश-चन्द्रसेनेन प्रदर्शितम्। तथाविधानां धर्ममतानां धर्माचाराणाञ्च प्रतिपाद[illegible] रहस्यमये तात्पर्यभारतीया लेखकाः स्वत एव गौरवं दधिरे। मानुषोचितप्रवृत्तीनामपरिहार्यं फलम[illegible]पेक्षितुमुन्मुखास्ते समजायन्त। दिव्यं प्रेमावलम्ब्य जिगासवो भक्ताः स्वोद्देश्यसाधनाय जागतिकरागव्यञ्जनार्थं मानुषैः प्रयुज्यमानां गिरमेव युक्तियुक्तां मत्वा तामेव गृह्णन्तीति—साधारण्येन सर्वेषां भक्तानां भक्तिविषयकमुन्म-मनमधिकृत्य ब्रुवाणेन स्वामि-विवेकानन्देनाभिहितम्। दाम्पत्य-प्रेमाप्युत्कटभक्तस्य सविधे नैव गौरवविशेषं गाहते इत्यपि तेनैवा-भ्युपगतम्। परकीयाप्रेमैवाऽऽदर्शत्वेन परिगृहीतं तेन। यतस्तत्रैव खलु रागस्योत्कटता परिलक्ष्यते। व्याख्यातञ्च तेन—"न च तस्यावैधस्य प्रेम्णोऽनौचित्यमत्र मया लक्ष्यीक्रियते, परं गाढतेति। उत्कटमा[illegible]षिकरागस्याभिव्यञ्जकैरक्षरैर्दिव्यस्य प्रेम्णः प्रकाशनेऽ-[illegible]विश्वास[illegible] [illegible] जनेषु सावज्ञ इव खल्वासी[illegible] स महात्मा। "जागतिकदृष्ट्या पश्यन्तो मूर्खा इदं न बुध्यन्ते नैव भोत्स्यन्ते चेति" तेनैवाभाषि।

दुर्भाग्यतया मानुषनिष्ठत्वान्मा[illegible]नधर्मस्य शारीरिकवृत्तयो बला-देवाऽऽत्मानं प्रकाशयेयुः। बुद्धधर्मस्याप[illegible]चयसमयेऽभ्युदयं गतः "सहजिया" धर्मस्त[illegible] समयजातानां धर्माणामेकतमः। "दिव्य-प्रेमावाप्ति[illegible]स[illegible]यको विषय एव कश्चन गुणः सुरतरसे, अतस्तेनैवा-

र्जनीयं तत् प्रेम"—इतीदं तत्त्वमाश्रित्य प्रवर्तते स धर्मः। जागतिक-बुद्ध्या "प्रेम"पदेन यदवगम्यते तस्मादपरम् "उपासनम्" यथानुशिष्टं तेन धर्मेण। परं रूपवतीषु युवतीषु प्रमदासु विचित्रायां तस्या-उपासनायामुपास्यत्वं गतासु, स्वकीयभार्योपासनेन नैवावाप्तुं शक्यते परमं लक्ष्यमिति विषये च प्रतीतिविषयतां गते, तद्धर्म-मतस्य विपदः सुव्यक्ता बभूवुः। तस्मादेव धर्ममताल्लब्धानि शृङ्गाररसात्मकानि पद्यानि। दशमशताब्द्याश्चरमे भागे बौद्ध-पण्डितेन कानुभट्टेन विरचितानि पद्यान्यश्लीलतापूर्णान्येवेत्यत्र नास्ति विस्मयस्यावकाशः।

पञ्चदशशताब्द्या ब्राह्मणकविना चण्डिदासेन "सहजिया" धर्मस्य तत्सजातीयस्य वैष्णवपरमार्थविद्याया जातस्य "परकीया-रस"धर्मस्य चाऽऽध्यात्मिकभावः सुदृढं संस्थापितः। "जितेन्द्रियो जन एव सहजियाधर्मस्य सारं बोद्धुं शक्नुयात्" इति तेनो-द्घोषि। सुप्रसिद्धं हि "रामी" रजक्यां विचित्रस्य प्रेम्ण उपा-ख्यानम्। तस्य प्रेम्णः कृते जातिपरित्यागोऽपि तेन स्वीकृतः। साधारणेन जनेनास्य धर्ममतस्य परिपालनं दुष्करमितीदमपि न च नाऽऽसीत् तस्य सुविदितम्। अस्य धर्ममतस्यानुवर्तनोचितस्याऽऽ-त्मसंयमनस्याभावं प्रतिपादयितुमपि नैव स दोलायमानगति-र्बभूव। सुमेरुपर्वतस्योच्चतमं शिखरं सूत्रेणोत्तोलयितुं क्षमेण वा मत्तहस्तिनं लूतातन्तुभिर्बन्धुं समर्थेनैव वा जनेन प्रेमेदं लभ्यते। "सर्पस्य वदने भेकं नर्तयितुं क्षमः स्याद् यथार्थः प्रेमोपासकः" इत्यस्य वचनस्य व्याख्यानावसरे रायबाहादुर-दिनेशचन्द्रसेने-नोक्तम्—दारुणैरिन्द्रियग्रामै र्विध्वंसस्याभिमुखं गतो वा सत्यः प्रेमोपासकोऽक्षतविग्रहेण प्रत्यावर्तितुं सर्वथैव विजितेन्द्रियो भवे-दिति। एतद्धर्मविषयकग्रन्थानां सुबहुलप्रचारदर्शनाद् धर्मस्याऽऽदरोऽनुमीयते। पुरातनवङ्गसाहित्याद् रायबाहादुरदिनेश-

चन्द्रसेनेन ... जियामतावलम्बिनां त्रिंशत्संख्यकानां ग्रन्थनिर्मातृणां नामतः समुल्लेखः कृतः, प्रायेण चत्वा... संख्याकानां पुस्तकानां नामान्यपि प्रदत्तानि। ख्रीष्टागमनस्य द्विशतवर्षेभ्यः पूर्वं खल्वेतानि पुस्तकानि विरचितानि। नेपालप्रदेशस्य राजकीयपुस्तकालयस्यान्वेषणाभिरेतैः सह ...नामपरेषामपि पुस्तकानां विद्यमानता विद्योतिता।

वैष्णवधर्मशास्त्रेषु दृ...दृश्यमाना राधाकृष्णप्रेमकथा "परकीयारस"धर्मस्य प्रकृष्टं निदर्शनम्। राधाकृष्णयो रहः प्रणयकेलिवृत्तमेव कथायास्तस्या बाह्याकृतिः। राजपुत्री राधा कस्यचिद् गोपालबालकस्य प्रेमवशगा जाता। उत्कटप्रणयिरूपेण वर्णितस्तत्र श्रीकृष्णः। परमवैष्णवास्तस्याः प्रेमकथाया रहस्यं प्रदर्शयन्ति। श्रीकृष्णो हि भगवतोऽवतारः राधा च जीवात्मा। स्थूलदृष्ट्या जागतिकीत्वेन प्रतीयमानाऽपि सा राधा ...प्रेमकथा वैष्णवानां मनसि—"भगवद्भक्त्यैव मुक्तिरासादनीयेति" भावं जनयति। "...कीयारस"धर्मस्य "सहजिया"धर्मस्य चायमेवाऽऽसीदादर्शः। परं कदापि तत्तद्धर्मावलम्बिभिर्नाधिगतः स आदर्शः। निर्मलचरित्रेषु जनेषु सञ्जाते तादृशे प्रेमभावे, प्रबलतया विराज...ष्वपि च नैतिकीषु सामाजिकीषु च बाधासु विचित्रतमः स आदर्शस्तत्र तत्रापरिहार्यफलरूपेण प्रकटतामुपैति। तास्तावत् समुपस्थापिता बाधा अ...रागात्मकं काव्यमेव...साहयन्तीत्यस्माभिस्तदानीं दृश्यते। अस्याऽऽदर्शभूतस्य प्रेम्णः स...भततमायां वे...कायां किमपि ...तादृशस्य प्रणयिजनस्य। ईश्वराप्तये ...कानामात्मनि पुष्टस्य निगूढस्यौत्सुक्यस्याऽऽसक्तताप्रदकं हि साधारणजीवितस्यैवंविधं प्रेम। भावस्य ...तथा भक्तेः सामर्थ्येन, आत्मत्यागेन चाऽऽदर्शः स आध्यात्मिकतायाः सन्निकर्षं प्राप्नोति। परं नैतिक...साधना...तानां जनानां विषये तथा-

विधो धर्मो नियतमाध्यात्मिकभावावेक्ष्य एव किञ्चन फलमुत्पादयेत्। मुक्तिम् अभीप्सवो बहवस्तन्त्रास्तदा सुन्दरीं युवतीं ललनां परिपूज्य लम्पटतां प्राप्ताः—त्यकथितोऽपि ज्ञायत एव। एतेन वैष्णवसमाजस्य स्तत्पवि[illegible]स्य भृशं प्रमाथो जातः। पञ्च शशताब्द्यां लब्धोदयाश्चैतन्यप्रमुखा वैष्णवसम्प्रदायस्य नेतारस्तीव्रं निनिन्दुस्तद्धर्ममतम्। विशेषतश्चैतन्येन स्वमता[illegible]सारिणः स्त्रीसंसर्गो दृढं निषिद्धः। तन्त्रशास्त्रं विना भारतीयधर्मशास्त्राणां नैकमप्येभिर्दोषैर्दूषितम्। युरोपदेशस्यार्वाचीनानां तन्त्रशास्त्रवि[illegible]मग्रेसरेण सार्-जन्-उड्रफ्-महोदयेन तन्त्रशास्त्रस्य प्रतिकूलतयोत्थापितस्य लाम्पट्यादिदोषस्य कृतः सरोषं प्रतिवादः। "असम्पूर्णेन ज्ञानेनोपलक्षितैर्यैस्तन्त्रशास्त्रस्यांशविशेषमुद्धृत्यैव तद्दूष्यते, यैश्च [illegible]नस्तत्तन्त्रशास्त्रेणैव प्रदर्शिताः शारीरिकमानसिकाध्यात्मिकोऽग्रमनेन सत्यावाप्तेरुपाया न दृश्यन्ते, तैरेव सुरतार्थिता भण्डतैन्द्रजालिकत्वञ्च तन्त्रशास्त्रेण समर्थ्यन्त इत्यसंयतमुदीर्यते" इति यद् रोषवशा[illegible] कथितम् उड्रफ् महोदयेन तत् तु सत्यमेव। परं तन्त्रोक्ता बहुश्रमसाध्या पूजापद्धतिः सुरतमपि क्रोडीकरोतीति सर्वैरेव ज्ञायते। सत्यं वामाचारदशां गतानां [illegible] कृते वर्तते खलु तादृशः कश्चित् सुरतविधिः। उदयलाभयोग्यैः सर्वैरेव तान्त्रिकैरुपासकैः स हि तावन्मार्गः श्रयणीयः। ब्रह्मणा संश्लेषमिच्छतो जीवात्मनश्चरमतमे विकाशे जाते अयमेव तावन्मार्गः प्रथमसोपानत्वेन तेन ग्रहणीयः। तादृशावस्थागतेनापि जनेन लक्ष्याप्तये तथाविधः कश्चिद् गुरुः श्रयणीयः, यस्त्वां विषेण विषमिवेन्द्रियैरिन्द्रियाणि संयमयितुं, तानीन्द्रियाणि कथं जीवात्[illegible]नः सांसारिकबन्धनं छित्त्वा तस्य परमात्मलाभस[illegible]थकर्तां प्रयान्तीति दर्शयितुञ्च समर्थः स्यात्। एतादृश उपासनामार्गे स्थितश्चेन्मिथ्याचारो भवेत्, तदा तस्य महानेव विपत्पातः स्या[illegible]त्यपि भूयो भूय-

स्तेनैव शास्त्रेणोद्घोषि। सत्यं न सर्वथा सर्वैरेव प्रतिपालितानि तान्यनुशासनानि। तन्त्रशास्त्रगतं दर्शनं प्रक्रियाविकञ्च शंसित्वाऽपि सार् जन् उड्रफ् महोदयेन न च न स्वीकृतम् अनेन शास्त्रेण समुत्पादितास्ते ते दोषा इति। स्वतन्त्रस्याद्वैतवाददीक्षितस्य जनवर्गस्य कृते लब्धसमुद्भवोऽत्यर्थं सुगुप्तश्च वीराचारधर्मः केषाञ्चिच्छिष्टानां जनानां सङ्गं प्राप्य विकृतो बभूवेति स मन्यते [illegible]ः। अथ कालवशाद् विवर्धमानास्ते दोषास्तन्त्रशास्त्रस्यापरान् विषयान् प्रच्छादयामासुः। एतेन तन्त्रशास्त्रं यथोचितमभिनिवेशमपि जनानां नैव प्रत्यपद्यत

भारतीयधर्मसाहित्यान्तर्गतस्य यौनधर्मवादस्याभिप्रेताशयविषयिणी डक्टर्-कुमारस्वामिन उक्तिश्चेद् गृह्यते, तदा पूर्वं लिखितं विषयमेवानुसृत्य—ये तावत् प्रभावा भारतीयकलायाः परिदृश्यमानस्याऽऽकारविशेषस्य हेतुतया प्रष्टव्यास्ते सम्पूर्णरूपेणाऽऽध्यात्मिकाः—इति तात्पर्यस्य ग्रहणं सुदुष्करमेव स्यात्।

चतुर्द ॥ल्लासः

भारतीयानामामेनोऽभ्युदयः

क्लेशकरो भारतीयकलाकलापानां दुर्बोधताया अस्वीकारो मां कश्चिदप्र...तविषयमधिकृत्य वक्तुं व्यापारयति। विजातीयकलानां विरोधितयाऽवस्थितेषु स्वदेशीयकलाकलापेषु भारतीयानां जातीय-वैशिष्ट्यस्य परीक्षायां पुनरहं दक्षहस्त एव। भारतीयकलानाम-दर्शवादेन सह वर्तमान-युरोपदेशीयकलानां वास्तवतावादस्य तुलना कृता खलु डक्टर्-...मारस्वामिना। तेन हि वास्तवतावा...स्य प्रतीच्यभाव...रूपता निरूपिता। तथाहि प्राच्यापेक्षया प्रतीच्याः खलु बहिर्विषयगतायाः पूर्णताया विशेषेण ग्रहणप्रयासिनो भवन्ति। कियतां भारतीयचारुशिल्पिनां प्रतीच्यभावग्रहणविषयमधिकृत्य विवृण्वता तेन भारतीयचारुशिल्पोद्देश्यस्य स्वरूपनिर्वचनव्यापारे उपायतया प्रतीच्यभावग्रहणस्यानुकरत्वं विशेषेण वक्तुमवकाशो गृहीतः। ...हरणस्वरूपेण हि तेन विश्लेषणं कृतं स्वर्गत 'राजा'-रविवर्मणा चित्रितस्य सुप्रसिद्धस्य सरस्वतीचित्रस्य। दिव्यलोको-द्भूतत्वस्य प्रकृष्टं लिङ्गं हि चित्रगतं कमलासनम्। प्रतीच्यकला...सरसिरुहाणां यथाविधं विलिखनं समर्थ्यते, तथैवाऽऽसीद् विलि-खितं तत् कमलासनम्। "कथमियं पूर्णावयवा स्त्री कमल-...नाले-नोह्यत इति, का वा पुनरस्य ...नालखण्डस्य ...कियती च चिन्ता चिन्...शनमात्रेणैव दर्शकानां चेतांस्या...न विदधाति।"

...रोपीयकलाया आकृति...कल्पनामपि क्रमायां प्रमाणेन प्रमा-

विताया भा॰ ॰यरुच्या ॰ रवस्यामवलम्ब्य दुःखमेव प्रकाशितं तेन म॰ात्मना। "लगडनीयर्ग॰ ॰पस्कपविक्रायमिर्येषां प्रासादा निर्मीयन्ते, अथवा युरोपीय-सौधानुगुणा येषां प्रासादा प्रा॰॰॰॰-रशान्तिदैर्वैभवैश्च विशोभितास्तेभ्यो भारतीयराजेभ्यः समारभ्य अद्भुतैरर्थहीनवर्णरञ्जितैर्माञ्चेष्टरनिर्मितपटैर्विशोभितान् कर्षकान् याव॰ र्वाचीनभारतस्य सर्वेषां जनानां या नाम रुचिगता ॰ नातर्जाता, तस्या अधिकतरं नास्ति साम्प्रतं किञ्चिदपि दुःखकारण॰।" प्रतीच्याधीनत्वमेवैतादृश्या दुरवस्थायाः कारणम् इत्यपि तेनैव कथितम्। ऊनविंशशताब्द्याः प्रथमे भागे यः पटनिर्मा॰॰व्यवसायप्रवाहो भारताद् युरोपदेशं प्रति प्रावहत्, बृटीशस्य व्यवसायनीत्या न केवलं तस्य प्रवाहस्य परिवर्तनं साधितम्, परं रञ्जितैर्विचित्रैश्च पटैर्भारतीयानां रुचिरपि तया दूषिता। शैलस्खलितविशाल॰ भार-स्तूपैरिव द्विचक्रयानादीनां (बाइसाइकेल्) निरर्थकैश्चित्रैश्चितैर्यन्त्रनिर्मितैर्माञ्चेष्टरस्य पटैः कथाशेषतां प्रापितं मान्द्राजप्रदेशस्य रमणीयं पटकर्म। शिल्पकर्मस्वपि तेषां स्वकीयां रीतिं प्रसभं प्रयुज्य भृशदारुणं फलमेव तैरुदपादि। कारागारेषु सुखक्रेया अनुत्तमाश्च कुथा निर्माय गुणवत्कुथाविरचनस्य तैरप्रतिविधेया क्षतिः समनुष्ठिता। तैः प्रतिष्ठापितानां कलाविद्यालयानां समुद्देशो नासीद्विनाशकादपर इति सर्वथैव वक्तुं शक्यते। बृटीशशासनस्य प्रभावादधिकतरा गुर्वर्था खलु शताब्दीं यावद् वितीर्यमाणा रीतितो लक्ष्यतश्च सम्पूर्णरूपेण मिथ्या काचिच्छिक्षा, यया खलु भारतीयानां रुचीनाम॰ श॰नाञ्च परिवर्तनं सम्पादित॰। नाधुना परिपाल्यन्ते देशीयै राजभिः शिल्पिसम्प्रदायाः। स्थापत्यस्याऽऽदर्शतया गृहीतं सम्प्रति भारतीयैर॰ ॰देशीयनगरोपकण्ठगताना॰ धानवाटिकानां चित्रम्। भारतीयत॰ वापनिर्मिताः कुथा अद्यत्य क्रियन्त इदानीं "ब्रासेल्"देशस्य कुथाः। अपा॰ ॰यन्ते साम्प्रतिके काले भारतीया

वेशाः, सादरं परिधीयन्ते च भारतीयैर्युरोपीया वेशाः। किञ्चा-पाश्चात्येषु च सजातीयेषु च ग्रन्थेषु च शताब्द्याद्यावद् यस्य कारु-कार्यस्य विन्यासोऽदृश्यत, तद् वर्जयित्वा शिल्पिभिः साम्प्रतं क्रीयते प्रायः विदेशीयं कारुकार्यम्। "कस्याश्चिद् विदेशीयजातेरनुकरणफल-त्वात् [illegible] भारतीयानां परिहीयते वैशिष्ट्यम्"—इति सि-आर-दाश-महोदयस्य [illegible] वाऽऽसीत् तस्योक्तिः। "स्वदेशस्य [illegible] चेष्टमानस्य विशिष्टजातित्वं गाहमानस्य च भारतस्य हृदयं [illegible]ः पार्थिवैरादर्शैर्वशीकृतं स्यादिति न युक्तियुक्तमिद-मिति मन्यन्ते चिन्ताशीला मानवाः। जीवितस्य प्रकृततत्त्वेन [illegible] भारतीयधीशक्तेश्चेन्नैव जायेत काचिदभिनवविकाशाशा, तदा जातीयान्दोलनस्य सार्थकता कथं नाम प्रतिपादिता स्यात्"। अत्रापराण्यपि वचनान्युद्धर्तुं शक्यन्ते, परमेतद्विषयमध्येतुकामा विद्यार्थिनो मूलग्रन्थेष्वेव समादरविशेषं दध्युः। यो हि खलु सिद्धान्तो डक्टर्-कुमारस्वामिना समुपस्थापितस्तस्मात् [illegible]रः कोऽपि सिद्धान्तो ग्रन्थानां पाठान्नैव जायेतेति सर्वथैवास्माभिर्वक्तुं शक्यते। अतः खलु वैदेशिकाद् [illegible]धीनत्वमवधूय मानसिकमाध्यात्मिकञ्च स्वातन्त्र्यं लब्धुमेव यतमानेषु शिक्षितेषु भारतीयेषु दृश्यते काचना-शान्तिः। न त्वैहिकपराधीनता, परं मनुष्यत्वनाशिनी नैतिक्या-ध्यात्मिकी वा पराधीनतैव भारतीयसभ्यतायास्तादृश्या दुर-वस्थाया हेतुः।

यया नाम शक्त्या समुद्धृतानि वचनानि प्रणोदितानि, तयैव शक्त्या समुत्पादितः खलु साम्प्रतिको वङ्गीयचित्रकलासम्प्रदायः। स हि तावद् वङ्गीयचित्रकलासम्प्रदाय एकस्मिन्नेव वङ्गीयेऽन्वये जाताभ्यां भ्रातृभ्याम्, विश्वविश्रुत-वङ्गीय-लेखकप्रवरस्य भ्रातु-ष्पुत्राभ्यां गगनेन्द्रनाथ-ठाकुर—डक्टर्-अवनीन्द्रनाथ-ठाकुर-सि-आइ-इ-महोदयाभ्यां संप्रवर्तितः। कलाविदावेतौ साम्प्रतं वङ्गीय-

...स... थमवतकतया साधारणेन ...विदितापि तद्-कालेऽनभिज्ञानेवाऽऽस्तां भारतीय...स्येति ... तदाऽहं कथित इति कौतुकावहोऽयं विषयः। केनचित्... ...सकेनो...न ...ताभ्यां ताभ्यां प्रारब्धं तद्चिरफलप्रसवधर्मं कर्म। अन्ये प्राचीनचित्र...णां मतानि संस्का...पे पुनः प्रकाशलाभाय निगूढा-न्येवाऽऽसंस्तयोश्चेतसि। यस्यां पारिपार्श्विकावस्थायां स्थिताभ्यां ताभ्याम् एतत् कर्म कृतम्, कस्यचि... सूक्ष्मदर्शिनो वर्णनादेव सा प्रकटिता भवति। संस्कृतसा...त्यस्य ...राणादिपाठेन स्वोत्-हर्षेण चोत्साहिताभ्यां ताभ्यां लक्षीकृतमासीत् स्वदेशीयकल्पना-मूलकचित्रस्य समुन्नयनम्। कलिकातायां द्वारकानाथ-ठाकुर-लेनस्थे ठाकुरवंशीयानां वासभवने आधुनिकभारतीयचित्रकलायां निपुणतया साम्प्रतं प्रतिष्ठां गता नन्दलालवसु-ओसिगांगुली-...शैलेन्द्रनाथम...मदार-असित...मारहालदार-सुरेन्द्रनाथकर-मुकुल-चन्द्रदे-प्रमुखाः शिल्पिनस्ताभ्यां संगृहीताः। यस्मिंश्चित्रकर्मगृहे मिलिते सा मनोहरा गोष्ठी, तत् तु ...

...समन, सौन्दर्यज्ञानचर्चायां रमणीयद्रव्यप्रीतौ, विशेषतो भार-तीयमान...स्य प्रकाशकेषु सुचारुषु वस्तुष्वेव गौरवविशेषं दधाविति तेनैव वर्णितं सूक्ष्मदर्शिना।

...शासनबहिःस्थितत्वाद् वङ्गीयविप्लववादिनां शर्मदं प्रियञ्च वासस्थानं चन्दननगरमधिवसता केनचिद् राजनीति...केनैतस्य नवांनस्या...वयस्याऽ...यश्चापि ...दुर्घाटतः। यथा भारतस्य ...दोषीयत्वापादनस्य प्रति...लतयोत्थापितया प्रतिक्रियया देशभक्ता भारतीयाः समुद्...ध्यन्त, सा तु साहित्ये कलास्वपि च साम्प्रतं ...प्रवेशेति स्वमत...दाहर्तुं ठा...सम्प्रदायप्रवर्तकस्य...कोऽपि तेनैव विहितः। वङ्गेषु ...ायतासावः ...स्मात्मान प्रका-शयितुं चेष्टते। मोगलानां नाशात् परं विवर्धते ...

कश्चिद् आतीर्थचित्रकलासम्प्रदायः। अवनीन्द्रनाथ एव हि तस्य प्रवर्तकः शिक्षकश्च।

एतेषामनुवृत्तानां व्याख्यानाय नास्ति प्रयोजनं कस्यचित्। चित्रकारस्य। अभ्यर्थं कञ्चन अनन्तप्रवर्तितचित्रसम्प्रदायस्य वैपुल्यविकल्पस्य च प्रेरणालाभो... कार्यकारणान्यथि... तदा तेषाम् उद्भवस्थानमेकमेवेति नूनं स विलोकयेत्। एकस्मात् च भावाज्जातयोस्तयोरेकं निन्दनमपरं च प्र...सावशेषं लभत इति लुब्धकमेव।

यद्यप्येतत् सर्वं मया लिखितं येन चैष ...सम्प्रदायो मे प्रियः सञ्जातस्तत् सर्वं विहायापि सम्प्रदायस्यैतस्य कार्यजातमेव सर्वस्य दृष्टिं प्रसभं समाकर्षति। सप्ताधिकोनविंशतिशततमे ख्रीष्टीये वर्षे कलिकातायां नगर्यां युरोपीयैर्भारतीयैश्च सुजनैः प्रतिष्ठापिता "इण्डियान् सोसाइटि अफ् ओरियेण्टाल् आर्ट"-समाख्या काचित् सभा। साधारणानां जनानां समितिसदस्यानाञ्च मध्येऽर्वाचीनायाः प्राचीनायाश्च प्राच्यकलाया विस्तारसाधनेन तस्याः स...सम्पादनमेवास्याः समितेरभूल्लक्ष्यम्। अस्या एव समितेस्तत्त्वाव...गनेन प्रतिवर्षं ठाकुरसम्प्रदायस्य कार्यजातस्य प्र...शनमजायत। एवंवि...सभानां कर्माणीवास्या अपि सभायाः कार्याणि महासमरारम्भेण मन्दीभूतानि। परं युद्धावसाने समितेरस्याः सुमहानुत्कर्षसाधनस्यावसरः समायातः। तद...साऽऽलोचितं मया समितेर्नेतृत्वं गतैः सदस्यैः। अथ समितेः स्थैर्योत्पादनाय तदीयकार्यजातस्य विस्तारसम्पादनाय च गृहीता अभवन्नुपायाः। शासकवर्गसाहाय्यं लब्ध्वा विद्यालयस्य कृते एकं चित्रकर्म...अध्यापकाश्चैकः स्थिरीकृते। ...सम्प्रदायस्य विशिष्टा व्याख्यातारः ...त्वेन नियुक्ताः। दरिद्राणां ...र्थिनां ...वृत्तिव्यवस्था च जाता। निर्मीता ...

विषयाः। "रूपम्" समाख्याता काचित् कलाविषयिणी पत्रिका च विनिर्गता। ऊनविंशत्यधिकोनविंशतिशततमेऽब्दे डिसेम्बर-मासस्य चतुर्थेऽहनि समितेः पुनः प्रतिष्ठापनस्य व्याख्यानाय शासकप्रासादे सञ्जातायां सभायां नवीनसम्प्रदायस्य कलाविदाम् अभिनवानि कर्माणि प्रदर्शितान्यासन्। कलासमालोचनकुशलेन कलाविदा। ओ-सि-गांगुलीमहोदयेन नवीनसमान्दोलनस्य वर्णन-समालोचनात्मकं तत्र पठितम् अभिभाषणम्।

यतः समान्दोलनेन समधिगतं साम्प्रतं किञ्चिन्निर्दिष्टं स्थानम्, सुस्थिरञ्च यतस्तदद्य प्रतिष्ठितम्, ततो गांगुलीमहोदयेन दत्तः समा-न्दोलनस्योद्भवस्य कार्यजातस्य च संक्षेपो विशिष्टमेवेदानीं गौरवम् अर्हति। ग्रीसीय-रोमीयसम्प्रदायावलम्बिनां युरोपीयकलाविष-यकनियमानां पूर्णताया अभिमानस्य जापानदेशीयकलया समनु-ष्ठितात् सापहासात् प्रतिवादाज्जाते, साम्प्रतिक-युरोपीय-सौन्दर्य-विचारनियमान् विशेषयन्त्यौ साहित्यतादात्म्यं प्रति सर्वेषां दृष्टिं समाकृष्यैव प्रारब्धं तेन वाचस्पत्यम्। जापानदेशीयचित्रकलासम्प्र-दायेन जगतश्चित्रकलासम्प्रदायेषु विशिष्टमेव स्थानमधिक्रियत इति विषयस्य युरोपीयैरन्यदेशीयैश्च कलासमालोचकैराविष्कारः कथं तान् भारतीयकलाया विचिन्तितचरस्य गौरवस्य पुनः परीक्षणे न्ययुङ्क्त, तदपि तेन ततः प्रदर्शितम्। वस्तूनां यथार्थतया चित्रे विनिवेशनादेव न केवलं जायते भावानामभिव्यक्तिः, परमसम्बन्धा अवास्तवा अपि शिल्पशास्त्रानुयायिन आकारा उच्चकैः समहताश्च भावानामभिव्यञ्जनायालमित्यस्य विषयस्य स्वीकार एव भारतीय-दृष्ट्या प्रतीच्यकलासमालोचकानां मतपरिवर्तनस्य मुख्यं फलम्। भारतीयया कलया स्वेच्छया सनिश्चयञ्च दीयते वस्तुषु स्वभाव-विरुद्धं रूपम्। निरर्थकैर्वर्णविन्यासै रेखाप्रवाहैश्च निर्मीयते तया चित्रात्मिकम्, आपणस्था विषया वक्रैर्विकटैराकारैर्युज्यन्ते चेति

यदा तासाकमभहोदयेनोक्त , तस्मात् कालान्नियतमेव साम्प्रतं किञ्चन मतपरिवर्तनं जातम्।

तमभ्रातेहतश्च प्रचो ानन सन्देशा ।नभ्रवानव्यापारस्य सौकर्य- ोपलब्धितेऽस्मिन् साम्प्रतिके काले जगतः कस्मिंश्चिदप्यंशे कश्चि- दपि कार्यविशेषं समनुतिष्ठतः कस्यापि जनस्य ब जगतो भाव- प्रवाहवेगस्याननुभवनं नैव भवितुं पार्यते—इति प्रतीच्यकलाक ा- रदानां परिवर्तितेन मतेन नवीनसम्प्रदायस्याऽऽनुकूल्यमेव सम्पा- दितम्। नवीनसम्प्र ायस्तावद् कामतः समुद्देशतश्चाऽऽदर्शवाद्येव। आलेख्ये बाह्ये [illegible] विहाय दर्शकान् पार्थिव- वस्तुतः समाकृष्यापार्थिवस्य सौन्दर्यस्याभिनवत्वस्य च क्षेत्रे नेतुं क्षमं ते न्तरालकनोचिता [illegible] सम्प्रदायस्यास्य कार्याणामभीप्सितमासीत् समुद्देश्यम्। इन्द्रियविषया ां वस्तूनां बाह्या- कारानविगणय्य गभीरतरेणोद्देश्येन, निगूढतरेणोपक्षेपेण चोपलक्षि- तैस्तैः [illegible]व्यक्तादिन्द्रियग्राह्याद्बहिर्वस्तुनो मनो वियोजयितुम्, प्रकृते- र्याथातथ्येनानुकरणं निन्दितुम्, साकारस्य वा जगतोऽन्तःस्थितस्य निरा ारस्यानन्तस्य द्योतनाय गूढार्थप्रकाशन ाचितानामाकाराणां निर्माणाय चेष्टितुञ्च प्रान्तम्। अतो यतितं खलु तैः प्राचीनाया भारतीयकलाया [illegible]दकं मौलिकं वैशिष्ट्यं संरक्षितुम्। तेषां प्रयोगस्य मूलतया भारतीयचित्रकलायाः साम्प्रदायिकीं रीतिमनुसृत्य तैर्न्याय्यमेवानुष्ठितमिति गांगुली-महोदयो मन्यते। समा ्लनस्य प्रथमे भागे मौलिकताया यः खल्वभावोऽदृश्यत, तत्र साम्प्रदायिककलाया [illegible]णानामध्ययनमायत्तीकरण ाऽऽस्तां प्रष्टव्ये। प्राचीनकलायाः, इतिहासस्य कल्पनाशक्तेश्चाविर ामवि- च्छिन्नाञ्च नवीनां रीतिमाश्रित्य तस्या एव प्राचीनकलायाः समु- न्नतिसाधनो चेतायाः शक्तेर्जना पूर्वम्, अ करणेन न पुनः प्रकल्पनेन विशेषितस्य काला ावधेपस्य व्ययोऽपरिहार्य एवेति

तैर्नैतुभिः [illegible] । न च तैर्विवुध्यत भावस्य [illegible] प्रसारस्य गौरवम् त्वतीतकालस्याऽऽदर्शेन तैरात्मानः संस्कृताः। [illegible] सम्प्रत्यपि [illegible] मन्यते [illegible] हृदयेन। जातीय[illegible]तिभ्य एवासन्दिग्धं लब्धाऽनया प्रणोदना। परं साम्प्रतिक्य उच्चाशाः कथमपि क्षीणतयाऽस्यां स्पन्दन्त एव। भारतीयजीवितं व्याप्य स्थितेभ्य आधुनिकविषयेभ्यः प्रायेण सर्व एव कलाविदः साम्प्रतमात्मनो दूर एव संस्थापयन्ति। नवीनभारतीयजीवितस्य भावेभ्यो वा व्यापारेभ्यो वा पारि[illegible]वस्थाभ्यो वा सन्निवेशेभ्यो वाजीवेभ्यो वा तैर्नैव लभ्यते काचित् प्रणोदना। [illegible] दृश्यानि जातीयमहाकाव्यानां प्रथितानां कथाग्रामंशविशेषाश्च चित्रितव्यविषयतया तान् प्रथममाचक्रुः। प्राचीनभारतीयसम्प्रदायमनु[illegible]स्मिन्नेव विषये तैर्नाधिगतं साफल्यम्। विशुद्धस[illegible]उज्ज्वलवर्णकविन्यासरूपं राजपुतसम्प्रदायस्य मोगलसम्प्रदायस्य च सुस्पष्टं विशेषकं भावं संश्रयितुम् असमर्थैस्तैर्भारतीयचित्रकलाया मुख्येषु वैशिष्ट्येष्वेकतमावसंशयमभ्रंशि। परमनाहत्य तानि समालोचिताने सानन्दम् अभ्युपगतं तेन "प्रभूततरमेवासाफल्यमनया समित्या [illegible]"ति। साधारणानां जनानां रुचावपि समान्दोलनेन स[illegible]त्पादितमात्यन्तिकं परिवर्तनम्। भारतीयेभ्यो भावेभ्योऽभिप्रायेभ्यश्च सम्प्रदायस्यास्य कर्मभिर्लब्धा प्रणोदनेति, भारतीयां चिन्तां विनिवेशनप्रक[illegible]ऽऽश्रित्य भारतीया विषयाः ससाफल्यं तदानीं विलि[illegible]ता अभवन् इति च प्रायेण सर्व एव [illegible]मालोचका अमन्यन्त। न केवलं [illegible] तेन प्राचीनाया भा[illegible]या भावः [illegible]तथतया [illegible], परं तस्या वि[illegible]छ्विरपं तेन सम्पादिता। [illegible] बहुत्वाद् वैचित्र्याच्च सम्बद्[illegible] कृतेभ्यः कार्येभ्यः कारेभ्य[illegible] कार्यसमधिक[illegible]।

भारतीयस्याभ्युदयस्य मङ्गलाकाङ्क्षिणस्तस्मिन् विश्वासवन्तश्चा-संशयमेव समान्दोलनस्य भविष्यद्विषयं चिरप्रचीयमानया सहानु-भूत्या समवलोकयेयुः। तथाविधेषु जनेषु बहव एव विद्यन्त आङ्गल-देशवासिनः। असन्दिग्धस्वदेशप्रीतिभिर्बहुभिरेव भारतीयैः सुजनैस्तैः समं निर्व्यलीकसहयोगितामभीप्सव आङ्गलदेशमधिवसन्तोऽपि जनाः यत् सादरं समाहूतास्तेनामित एव आनन्दो मयाऽद्य समनु-भूयते। तथापि प्राच्यप्रतीच्ययोर्मध्ये सद्भावसंस्थापनाभिलाषिण आङ्गलदेशीयस्य जनस्य कर्म न हि सुकरं प्रोत्साहनीयश्चेति मयाऽ-वश्यमेव स्वीकरणीयम्। आस्ते खलु स्वदेशविषयकगर्वप्रीत्यादि-पापपतितो दुरन्ताभिमानी आङ्गलदेशीयानां जनानां समुद्देश्येषु सर्वथैव सन्दिहानः कश्चन भारतीयानां वर्गः। एतस्याः समिते-र्विद्यालयस्य प्रतिष्ठापनायाऽऽर्थिकसाहाय्यदाने यदा मया प्रवर्तितः शासकपक्षस्तदैवास्य विषयस्य निदर्शनं किञ्चिदभूत् समुद्भूतम्। समान्दोलनस्योपरि कश्चिदधिकारविशेषं रक्षितुकामेन शासकेनाऽऽ-र्थिकं साहाय्यं समनुष्ठीयत इति जना मा तावन्मन्यन्तामित्यभि-प्रायेणैव सनियमं न कृतं मया शासकसाहाय्यम्।

तथापि सन्देहभाजनमभून्ममैतत् कर्म। नातिचिरात् वङ्गेषु तद्बहिश्च सादरं पठ्यमानायां "मडार्णरिभिउ" समाख्यातायां पत्रिकायां सम्पादकमन्तव्यरूपेण प्रकाशं लेभे स एव खलु सन्देह-भावः। भ्रम एव कृतः कर्तृपक्षीयैः परिगृह्य शासकसाहाय्य-मित्येवं क्रमेण लिखितमासीत् तत् समालोचितम्। शासक-साहाय्यस्य नियमपुरःसरत्वाभावं स्वीकृत्यापि तद्ग्रहणेनैव राज-पुरुषाणां युरोपीयाणां वाऽभिमतविरुद्धाचरणाऽनिच्छमाणया बाधया जातया तेन चोपायेन विकृतं करिष्यते भारतीयसंस्कृतेः स्वरूपम् इत्येतदेव तेनाऽऽशङ्कितम्। चिन्तितञ्च तेन, शासकसाहाय्यग्राहिणो नूनं राजपुरुषाणां युरोपीयप्रभावस्य चोल्लिखितप्रकारमप्यधीनत्वं

यास्यन्तीति। सर्वथैव वयं युरोपीयाणामधीनाः, अतः खलु-भारतीयानामनुग्रहेण प्रभावेण चापरामृष्टे कस्मिंश्चित् कुटीरेऽप्येतस्य विद्यालयस्य प्रतिष्ठापनं शोभनं जायेतेति नः प्रतिभातीति वाचा समुपसंहृतं तेन तत् समालोचितम्। आदर्शद्वयस्य सङ्घर्षजाततया विरोधितया कथं सुदृढमधिक्रियन्ते केषाञ्चिज्जनानां चेतांसि, तदेवैतद्भावसन्दर्शनेनास्माभिर्विज्ञायते। दीर्घकालव्यापिनीं चेष्टां दुर्दमनीयं धैर्यञ्च विना किमपि नैतादृशस्य भावस्य दूरीकरणायालम्।

पञ्चदशोल्लासः

भारतीयाद्वैतवादः

येन खलु वाह्यवस्तुनो मिथ्यात्ववादेन व्याप्यते भारतीया कला, प्रतिरूपो हि स मिथ्यात्ववादो भारतीयायाश्चिन्ताधारायाः। यो हि नाम विषयो भारतीयैर्मनीषिभिर्ग्रन्थेषु निबद्धः, स एव तावद्विषयो भारतीयैस्तत्तत्कैश्चित्रकरैश्च यथाक्रमम् आकारप्रदानेन वर्णक-सन्निवेशेन च प्रकाशितः। कलासु दर्शनेषु च भारतस्यैकैव सा दृश्यते विश्वविषयावगाहिणी प्रहेलिका। सर्वो वाह्यशून्यवादीव भारतीयो जनोऽपीन्द्रियग्राह्याणां विषयाणां सत्यत्वं नैव स्वीकरोति, मूलतत्त्वान्वेषणाय वस्तूनामन्तरेव दृष्टिं निक्षिपति। प्रपञ्चात्मकं हि परिदृश्यमानं जगदतस्तदसत्यम् इति पक्षात् स साधारणानां प्रतीच्यदेशजानां दुर्बोधया रीत्या सुस्पष्टं मिथ्यात्वेनानुभूताद् अस्मा-ज्जगतः स व्यपवर्तत इति विरुद्धतापादके निर्विशङ्के सिद्धान्ते समुपैति।

वस्तुतस्तु जीवो ब्रह्मैव नापर इत्युद्वेगकरः खलु सिद्धान्तः। न च सगुणेश्वरवादिभिः प्रतिपादितं साकारमेव तद् ब्रह्म, परम् अचिन्तनीयं, निरुपाधि, निर्गुणं, व्यापकं, सत्, असत्, "नेति नेती"त्यक्षरैर्निरूप्यमाणं, अद्वितीयं, सर्वगतं, सनातनं, स्वतन्त्रं ज्ञानमयमपि दुर्विज्ञेयं, द्रष्टृ अपि न चक्षुरिन्द्रियग्राह्यं, सर्वसत्तानां समष्टिभूतमेकं सत्यमेव निर्गुणेश्वरवादिनां तद् ब्रह्म। काल-सनातनत्व-महाकाशानन्तताद्रीनाम् अमूर्तानां विषयाणां परिकल्पनमत्यर्थं हि

दुस्साध्यं नराणाम्। भारतीयाद्वैतवादेन निरूपितस्यानन्तस्य ब्रह्मणः प्रत्यक्षीकरणस्यासम्भवता[illegible] नैवात्र किञ्चिद्विवदामि, तथापि ब्रह्मविषयकमिदं मतं बोद्धुं सर्वथैवास्माभिर्यतितव्यम्। यतोऽस्यैव ग्रन्थस्य प्रस्तावनायां वि-सि-पाल-महोदयस्य यद् वचनं मयाऽवतारितम्, तदाश्रित्य चेदुच्यते, तदा तदेव बुद्धेर्विमूढतापादकं ब्रह्मविषयकं मतम् "हिन्दूनां जातीयेतिवृत्ते प्रागैतिहासिकं चिरन्तन[illegible]ति" नवानाया[illegible]रतीयजातिभित्तिपाषाणायमान[illegible] इति च वक्तुं शक्यते।

तथैव खलु वस्तूनि यथैव तान्यनुभूयन्तेऽस्माभिरिन्द्रियैरिति—प्र[illegible]दिनां मतस्य निरसनं क्रोडीकृत्य स्थितस्य, सर्वेषां सत्यानामकत्वप्रतिपा[illegible]नरूपस्य, भारतीयचिन्तायाः सुमहतः केन्द्रीभूतस्य भावस्य प्रथमं सूचनं भारतीयार्यजातेः प्राचीनतमे ग्रन्थे ऋग्वेद एव दृश्यते। एक एव स नामभेदमुत्पाद्य स्तूयते कविभिरिति तत्रैव वर्णितमास्ते वेदे। उत्तरकाले, परं बुद्धस्य जन्मनः प्राक्, अतः खृष्टीयशताब्दीप्रवर्तनसमया[illegible] पञ्चशतवर्षेभ्यः पूर्वं जाते वैदिकसाहित्यस्यापनिषद्[illegible] आध्यात्मिके भागे ववृधे खलु परोक्षार्थं समुपस्थापितोऽयं समुल्लिखितो भावः। दुरवगाहा एवोपनिषदस्त[illegible] स्थितानां भावानां विचित्रतया परस्परविरुद्धतया च सम[illegible]धविशेषस्य व्यक्तिविशेषस्य वा मतगर्भिताः साधारणा निबन्धा इव न भवन्ति। परं तास्तावत् कस्याश्चिच्चिन्ता[illegible]स्य क्रमिका उपचया एव। खृष्टीयशताब्द्याः प्रवर्तनकालस्य पूर्वं गतात् पञ्चशततमवर्षात् समारभ्य, देशत्यागिनामार्याणां गङ्गोपत्यकाश्रयणेन

[illegible]स्या[illegible]दयेनोपल[illegible]तास्तत्पूर्वस्थिताः पञ्चशतसं[illegible] एव तासा[illegible]पनिषदामाविर्भावकालतया परिगण्यन्ते। एतासां चिन्तानां[illegible]वाचनेन "सर्वं सत्[illegible]" इति तासां केन्द्रीभूतस्य भावस्य विकाशः प्रकटीभूयते।

मानवानां चिन्तायाः केवुर्लभं फलमिदम्, न तु विनैव प्रयत्नं समुद्गतम्। प्रत्यक्षविरुद्धोऽयं भावो यदस्य प्रतिपक्ष एवाभविष्यत, तदा सत्यं विचित्रमेव तदभविष्यत्। जागतिकवस्तुभिः समं दैनन्दिनात् संस्पर्शाज्जातेन प्रत्यक्षवादेनान्तरा प्रभावितान्यभवन् अतिसूक्ष्माण्यपि तेषां प्राचीनानां मनीषिणां मनांसि। प्रत्यक्षवादेनाध्यात्मवादस्याऽऽसोच्छाश्वतिको विरोधः। नराणां मनांस्यधिकर्तुं परस्परजयैषिणोरेतयोर्वादयोः सङ्घर्षाद् जात आधुनिकभारतीयानां बहुभिः सेव्यमानो विश्वदेवतावादः। [illegible]मस्तावदयं धर्मवादः। [illegible]प्रतिपादितं ब्रह्म चेदेकमेव सत्यं वस्तु, यदि पुनर्विश्वमिदं शाश्वतं स्पर्शवेद्यं काल्पनिकमित्यप्रत्याख्येयश्चेति स्यात्, तदा ब्रह्मणा जगतस्तादात्म्यमपि सर्वथैव स्वीकरणीयम्। जगत् तदानीं ब्रह्मणो रूपविशेषत्वेनैव ग्रहणीयम्। अन्यैरेवाक्षरैश्चेदुच्यते, तदा एकस्यैव वस्तुनो नाममात्रभेद एव तत्र विभावनीयः।

परस्परविरुद्धा अप्येते खलु भावास्तावद् उपनिषदां निर्माणे हेतुः। न केवलं विषयाणां स्वभावः, परं तेषामाकृतिरप्युपनिषत्सु तत्परवर्तिसूत्रग्रन्थेषु च प्रवेशे क्लेशं संजनयति। भावानाम् आकारं दातुं निर्मिता खलु मानवैर्भाषा। चिन्ताप्रणालीभेदाद् भाषाया आकारस्यापि भेदो जायते। स्वदेशीयपरिच्छदैर्वर्जिता विदेशीयवसनैर्विशोभिता कस्याञ्चिज्जाते र्शनिकी चिन्ता कामपि विकृतिं न यायादिति तु न न्याय्याशंसा। यो हि नाम भावस्त्रिसहस्रवर्षेभ्यः पूर्वं [illegible]दपादि प्राचीनानामार्याणां मनसि कस्यचिदार्षस्य सं[illegible]तात्मकस्य वाक्यस्य श्रवणेन, सर्वा[illegible]ऽपि तस्यैव वाक्यस्या[illegible]थाऽनुवादो नैव तम् एव भावं समुत्पादयति साम्प्रतं मदीये मानसे। तदानीन्तनस्य प्राचीनस्य [illegible]स्य स्मृतिसहाय[illegible]त्वाद् विमूढिमेवाप्नुते इदमसौकर्यं। वाचिक-

मासीत् वा-कालिकं साहित्यं न तु लिखितम्। [illegible] निबन्धानां कण्ठस्थीकरणीयतया वाचिकसाहित्य तन्मतापा-न-चेष्टा समानीता। सूत्रसाहित्यं हि तस्या एव चेष्टायाः फलम्। [illegible] किमपि नाऽऽसीत् [illegible]साहित्यस्यापारत्याज्यम्। भारतस्य विभिन्नप्रदेशेषु चतुष्पाठीषु पठ्यमानं पाणिनव्याकरणमेव सूत्रसाहित्यस्य प्रकृष्टं निदर्शनम्। विषयीकृतसमग्रसंस्कृतसाहित्य-मप्येतद् व्याकरणम् एतादृगेव संक्षिप्तम् यत् क्षुद्रेषु पञ्चत्रिंशत्-संख्यकेषु पत्रेष्वेव तन्मुद्रापयितुं शक्यते।

उत्तरमीमांसा, बादरायणस्य वेदान्तसूत्राणि वेति नाम्ना यथा-पद्धति विनिवेशितान्युपनिषदां दार्शनिकमतान्यनयैव रीत्या प्रथमं विनिर्गतानि। कृतावस्यां संक्षिप्ततःपादनस्य तथाविधो दृश्यते कश्चित् प्रयत्नो यथा भाष्यभूताऽपीयं प्रहेलिकतयैव वर्ण्यते। तेषां सूत्राणामनुवादकस्य डक्टर् थिव-महोदयस्य मते यथा वाक्येषु कर्तृपदानां क्रियापदानाञ्च प्रायेणाप्रयोगो दृश्यते, तथैव तेषु सूत्रेषु नितान्तप्रयोजनीयानामपि पदानां प्रायेण सर्वदैवाभावो दृग्गोचरीभवति। अतः खलु तेषां बहवो व्याख्यातारः। खृष्टीयाष्टमशताब्द्यां जातस्य महतोऽध्यात्मवादिनः शङ्करस्यैव भाष्ये भारतीयाद्वैतवादः प्रथमं पदं लेभे। एतानि तावदुत्तरमीमांसायाः प्रारम्भकाणि सूत्राणि :—

१। अथातो ब्रह्मजिज्ञासा।

२। जन्माद्यस्य यतः।

३। शास्त्रयोनित्वात्।

४। तत्तु समन्वयात्।

५। ईक्षतेर्नाशब्दम्।

ष[illegible]नामेतेषां [illegible]स्यात्मकानां सूत्राणां शङ्करकृतभाष्यस्याऽऽ-[illegible]भाषात्मकाऽ[illegible] चत्वारिंशत्संख्यकेषु पत्रेषु [illegible]प्राप्यते

शक्यते। सूत्रव्याख्यातॄणामेकतमोऽभूच्छङ्कर इति सूत्राणामर्थविषयेऽपि तद्व्याख्यातॄणां मतभेद आसीदिति च न विस्मयाव । हि विषयः। शङ्करस्य व्याख्यानं युक्तिसिद्धं न वेति विषयो न च मेऽत्र चिन्तनीयः। भारतीयचिन्ताया आध्यात्मिको-ःखताया अनुगुणतया बहुभिरेव हिन्दुभिः शङ्करमतमाद्रियत इति दर्शनाच्छङ्कर एव ग्राह्यवाग् इत्यसंशयं वक्तुं शक्यते।

शङ्करेण तदीयैः शिष्यसम्प्रदायैश्च कृतव्याख्यानः को हि नामासावद्वैतवादः? "तत् त्वमसि" "नेति नेती" ति चोपनिषत्सु कृतपदयोः प्र ख्यातयोः सूत्रयोर्व्याख्यानमेव सः। "स य एषोऽणिमैतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो।" तच्छब्दो ब्रह्मबोधकः। तत् त्वमसि; त्वं ब्रह्मासि। अथ किं तद् ब्रह्म? अपि नाम मादृशानामवधारणयोग्यतां लभते ब्रह्म? कदापि केनाप्यदृष्टत्वाद् ब्रह्मणो दृष्ट्यविषयता प्रतिपाद्यते खृष्टधर्मेण। न केवलं दृष्ट्यविषयतां परमविज्ञेयरूपत्वमपि ब्रह्मणः स्वीकुर्वन्ति वेदान्तिकाः। नास्माभिरवधारणीयं हि ब्रह्म, यतस्तदेव चेदस्माकम् आत्मनः सारोऽस्माकमात्मा परमं कारणञ्च, तदा नैव प्रतिपादयितुं शक्यते तस्य ब्रह्मणः कार्यत्वम्। परमकारणस्यापि तस्य कार्यत्वे प्रतिपन्ने कस्यापि कार्यस्य कारणं नैव व्यवतिष्ठेत। ब्रह्म चेन्नैव कार्यम्, त्वदन्तर्गत आत्मा चेत् तद् ब्रह्म, तदा कथं नाम त्वमात्मनः कार्यत्वं प्रतिपादयितुं शक्नुयाः। मृतमिवाऽऽत्मानं विचिन्तय। किं त्वया दृश्यते? शरीरन्ते -तमवतिष्ठते? सत्यं; परमात्मन एव तच्छरीरम्? तथा सति, कोऽसौ यस्तव मनसि स्थित्वा शरीरं मृतं बुध्यते? किं न हि स ते आत्मा? आत्मनः कार्यत्वं प्रतिपादयि- चेन्नैव शक्नोसि, तदा कथं मृतेन तेन शरीरेण समम् आत्मानमपि मृतं विभावयसि। "न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुयान्न विज्ञातेर्विज्ञातारं

अमीथाः, एष त आत्मा सर्वान्तरः"। "तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृ, अश्रुतं श्रोतृ, अविज्ञातं विज्ञातृ। नान्यदतोऽस्ति द्रष्टृ, नान्यदतोऽस्ति श्रोतृ, नान्यदतोऽस्ति विज्ञातृ।".

वस्तुतस्तु पूर्णोऽद्वैतवादी कठोरेण ...किवादेनोपलक्षितः सन् एतस्मादन्यधिकं किञ्चिद् विवक्षति। एकमेवाद्वितीयं परमं सत्यम्, तद्वा नास्ति नूनं तदतिरिक्तं किमप्यपरं वस्तु; तस्य स्वीकारात् द्वैतभावस्य प्रहणापत्तेः। एकमेव तत् कार्यं कारणञ्चेति। कार्यकारणयोरेकतरस्याभावाद् अन्यतरस्य सम्भवो नैव युज्यते, ज्ञातृपदेनैव ज्ञेयपदार्थस्य द्योतितत्वात्।

वस्तुतस्तु कार्यकारणयोरभावेन... किं नाभ्युपगम्यते वेदान्तिकैः शून्यं निर्वाणमभिलषताम्, सर्वेषां जागतिकवस्तूनां पृष्ठतः स्थितं महाशून्यं प्रतिपादयतां बौद्धानां शून्यवादः? सत्यम् आपातदृष्ट्या तत् तथैव प्रतिभाति। परं शङ्करेण बादरायणसूत्राणां द्वितीयाध्यायस्य द्वितीयपादस्य "नासतोऽदृष्टत्वात्" इति षड्विंशं सूत्रं समाश्रित्यैवास्य कृतः प्रतिवादः। न च शून्यं न वा कश्चन ज्ञाता, परं ज्ञानमेव वेदान्तिकानां परमं सत्यम्। अस्यायमाशयः, वेदान्तिकानां मते न तु ज्ञानसम्पन्नः कश्चिदास्ते कर्ता, परमास्ते ज्ञानमेव। सत्पदेन सत्यस्य द्योतितत्वाद् ब्रह्मापि सदेव। आनन्दमयं हि पुनस्तद् ब्रह्म। अस्य तावदानन्दपदस्यांशोऽत्र दुरवगाह एव। कामैः कामावाप्तिचेष्टाभिश्च सम्यगपराभृष्टा साऽवस्था सुषुप्त्यवस्थां गतस्य जनस्याऽऽत्मना प्रत्यक्षीकृतावस्थाविशेषस्थानीयरूपा। ...कथायाः सुषुप्त्यवस्थायाः प्रत्यक्षत्वाभावान्नैव शक्यते सा स्मर्तुं जाग्रता जनेन। अनेनैव हेतुना चेदस्माभिरस्या दुर्विज्ञेयत्वं प्रतिपाद्यते, तदाऽस्माभिः शून्यवादिनां शून्यमेव प्रायेण गृहीतं भवति। सच्चिदानन्दं हि ब्रह्म—इत्येतावदेव ...निर्वचनीयं वक्तुं शक्यते। उल्लिखितैः कारणैर्यतो निर्गुणं किञ्चित्

प्रतिपाद्यते, तत उपनिषदां "नेति नेती"ति सूत्रेण निषेधमुखेन कथ्यते ब्रह्म वेदान्तवादिभिः।

एभ्यः पक्षेभ्यो बहव एव लभ्यन्ते सिद्धान्ताः।

अनन्तश्च कालाका[illegible]थकार्यभावातिरिक्तस्य विषयस्य कालाकाश-कार्यकार[illegible]भावान्तर्गतविषयतया परिकल्पनम्। परं कालाकाश-कार्यकार[illegible]भावान्तर्गतत्वाज्जनानां मनसोऽलं ता[illegible] [illegible]प्रयासेन, अतोऽद्वैतवादिनो वेदान्तिकस्य जगत् स्वप्नानुभूतो वस्तुविशेष इव। सुस्पष्टे स्वप्ने नरः स्वप्नदृष्टं जगत् सत्यतया गृह्णाति विचरति च तत्र जागतिक्यैव रीत्या। रज्जुभङ्गे नष्टाश्च स्वप्नद्[illegible]ः सकाशोऽवि-तथत्वेनैव तदा प्रतिभाति। अनुभवनसमाद् अस्माकं [illegible] तत् किञ्चिदतिरिक्तं वस्तु, यदस्माभिः स्वप्ने दृश्यते इति तु स्वापा-वसान एवास्माभिर्विज्ञायते। साम्प्रतं पर[illegible]त्वेनैकमेव चेतनं चेतस्त्वेव, स्वप्नद[illegible]त्वेनैव चेदं परिद[illegible]मानं जगद् विचिन्तय। तेनाद्वैतवादिभिर्वेदान्तिकैर्जगतो र[illegible]स्वप्नवल्लभ्य यदुक्तम्, प्रायेण तत् सर्वमेव ते प्रतिभास्यति। वर्जयित्वा तच्चेतनं चेतस्त[illegible]तिरिक्तस्या-परवस्तुनः स्वतन्त्रसत्ताया अभावात् स्वप्नदर्शिनस्तस्यैवैकस्य चेतसो [illegible]स्थानमिदं जगद् विलीयत इ[illegible]ल्लिखित-वस्तुन सादृश्यस्यास्य निपुणतयाऽनुधावनेनैव प्रतिपाद्यते। यस्तु स्वप्नोऽस्माभिरनुभूयते, स तु स्वप्नान्तर्गतोऽपरः स्वप्न एव। एतदेव समासतो वे[illegible]न्तस्य मतम्। "तत् त्वमसि" इति श्रुतेर्वयमेव तत् चेतनं चेतः। अविद्यान्धी[illegible]तलोचनैः सत्यं नास्माभिर्नि[illegible]पयितुं शक्यते। अस्मास्वयातथ्य[illegible] दुर्निवारसंसारचक्रे बंभ्रम्य-मा[illegible]ऽप्यासादित एव क्लेशबहा जीवेतपर[illegible]। [illegible]भीकितेऽ-स्माकं नेत्रे [illegible]रीभूतायाश्चाविद्यायां परममा[illegible] कि[illegible] नाद्वितीयं सत्य-मिति, वयमेव तदिति, मायात्वेनास्माकं पुरतः [illegible]तेनानेन [illegible]सह समं प्रलयं यास्यतो द्यावापृथिव्याविति चास्माभिर्[illegible]यन्ते।

उच्चकैर्भ्रमाम ... , धरित्री, ... गतं जलम्, अन्यच्च द्रव्यजातम्, इत्यादिरूपाणि विस्मयोत्पादकानि कार्याण्यविद्यामात्रेण्यैव तिष्ठन्ति। तस्या अविद्यायाः किं नाम स्वरूपं कथं वा सा समुद्गच्छतीति प्रश्नोऽत्र स्वत एव जायते। अविद्यां त... कारणञ्च बोधयितुं "माये"ति पदं व्यवहृतं शङ्करेण। "माया"पदं साधारणेन "इल्युशन्" पदेनानूद्यत आङ्गलभाषायाम्। मायापदस्यास्मिन्नाशयविशेषे अस्त्येव खलु काचिद् विप्रतिपत्तिः। केचन वैदान्तिकास्तद् ... भ्रान्त्युत्पादकं मन्यन्ते। अर्वाचीनानाम् अद्वैतवा... व्याख्यातॄणां प्रधानेन स्वामिविवेकानन्देन प्रदर्शित एव तस्याऽऽशयस्य दोषः। ये वयं यच्चास्माभिः परितः समवलोक्यते इत्यादितत्त्वानां निर्देश एव तन्मते माया। अपरथा चेदुच्यते, तदा नेयं माया ... तस्य विश्वस्य तात्पर्यं द्योतयति, परं सा हि प्रत्यक्षेणानुभूतस्य जगतो वा प्रकृतेर्वा कालाकाशकार्यकारणभावैर्नियमितानां विषयाणां वा नाम। वैदान्तिकदृष्ट्या तु तुल्य एवैतेषाम... इति वक्तुं शक्यते। मिथ्यागृहीतानु...तित्वेन चेदुच्यते माया, तदा—अन्यथा व्याख्यातं परमतत्त्वं हि प्रत्यक्षदृष्टं जगद्—इति वदद्भिर्वैदान्तिकैः समं विवादस्यावसर एव न स्यात्। आपातदृष्ट्या ब्रह्मणो विक... तयैव प्रतिभातीदं विश्वम् इति मायापदमधिकृत्यैव कथितं स्वयमेव स्वामिना। सर्पे रज्जुभ्रमः इति ... प्रसिद्धमुदाहरणमपि तत्र तेन प्रदत्तम्। यस्य रज्जौ सर्पभ्रमो जायते, स तु सर्पबुद्ध्यैव तां रज्जुं पश्यति। उक्तञ्च स्वामिना "तथापि र... पातितः सर्पतयैव प्रतीयते। परं भ्रमापनोदनेन समं नश्यति स सर्पः।" भ्रमापनोदनपदं मयैव योजितं पूर्वगते वाक्ये। विश्वरूपेण परमात्मानं प्रकटयतीति व्यक्तित्वमृगतृष्णिकया प्रतार्यामहे वयमिति च तेनैवोक्ते। चक्षुष्मद्भिरस्माभिर्दृश्यते बाह्याकृतिरेव। तिरस्करिणीव बाह्या ... तिर... विनश्वर

परमात्मानं निगूहते। अपसारितायां तिरस्कारे वा नाऽऽसीदु बाह्याकृतिर्यथार्थतया कदाचिदित्यस्माभि[illegible]ते। परिदृश्यमानं जगच्चेत् कदापि नाऽऽसीत्, परमस्माभिः केवलं परिचिन्तिता चेत् तस्य सत्ता, तदा तन्मायेति वक्तुमसंशयमेवास्माभिः पार्यते। स हि तावदेवं मन्यते,—साधारणेन सर्वेषामेवाद्वैतवादिनां वै[illegible]न्तिकानां मनसि मायापदं जनयति किञ्चन चित्रं प्रत्यक्षतां गा[illegible]मानस्यास्य जगतः। आपेक्षिकं किमपि सत्यम् अस्ति एवास्मिन् बाह्यजगति। सारांशेन विवर्जित आकारोऽयं खलु बा[illegible]जगतः। परमात्मना जीवात्मनस्तादात्म्यज्ञानादु विलीयते खल्विदं जगत्। तदानीं सत्ताविशेषोऽस्य कदाचिदासीदित्यपि नैव बुध्यते। निपुणं चेद्विचार्यते, तदा सेयट्पल् महोदयोक्तं खृष्टीयं मतमप्येतत्सदृशमेव स्यात्। नश्वरेऽस्मिन् विश्वे विद्यत एवाऽऽपेक्षिकं किञ्चन सत्यम्। अदृश्यमानं वस्त्वेव सनातनं परमं सत्यञ्च।

ससारत्वेन साधारणैर्गृहीतमिदं जगदसारमेवेति विश्वविषयकमनुमानमेतस्मादेव वचनाल्लभ्यते। एतावन्मात्रं वेदान्तक[illegible]नाम[illegible]सरणं न दुष्करम्। परं जगदिदमसारं मायामयं मायान्तर्गतैरस्माभिरयाथातथ्येन व्याख्यातमित्यनुभवितुं वयमसमर्था एव। तथापि बुद्ध्या तथात्वेनैतदवधारयितुं कथमपि शक्यत एव। ब्रह्म चेत् परमं सत्यम्, तदा कथमियं भ्रान्तिर्जायत इत्यस्य सुमहतः प्रश्नस्य समाधानमवा[illegible]करम्। स्वतन्त्रं परमं सत्यं ब्रह्म चेदहम्, तदा कथं मया स्वस्य ब्रह्मत्वं कदापि नैव स्मर्यते? कथमिदमविद्यातिमि[illegible] अस्माकं बुद्धौ समायाति। कथं वेदं जातम्? परमगौरवास्प[illegible] ह्यस्य प्रश्नस्योत्तरम्। अस्य प्रश्नस्य भारतीयचिन्ताप्रसूतमुत्तरं लब्धुं साम्प्रतं यतिष्ये।

षोडशोल्लासः

पण्डितानां विवादविषयः

पूर्वतनोल्लासस्य चरमे भागे निवेशितः प्रश्नः कदाचित् समुपस्थापितो मया पूर्ववक्तॄणां पण्डितानां सविधे। ब्रह्म चेत् परमं सत्यम्, कुतः खल्वियं सम्पजायतेऽविद्येति मया समनुभूयते किञ्चनासौकर्यं [illegible]। सत्यं मायाख्यामभावकामेन ब्रह्मणा द्वैतीयीकमिदं जगत् प्रविश्यत इति मन्ये पठितं मया मैत्रायणोपनिषदि। अनन्तस्य ब्रह्मणोऽसीमत्वम। नाज्ञायत यथात्र नूनं कश्चन विरोधः। समकालमेवैतेनैकस्यैव विषयस्य ग्रहणं प्रत्याख्यानञ्च जायेते। निर्गुणेन ब्रह्मणा समं युज्यतेऽत्र त्वया वासनाभावः। कथमविद्यात्मकं सञ्जातमिदं बाह्यं जगदित्यस्यैव प्रश्नस्य मृग्यतेऽत्र मया समाधानम्।

अस्य प्रश्नस्य लब्धानि मया बहून्येवोत्तराणि। [illegible]जनेऽसमाधायपि तानि भारतीयानां मनसां दार्शनिकचिन्तासिलत्वमपूर्वां [illegible] पिशुनयन्ति। मायाऽविद्यादिपदानि भारतीयैर्बहुधा व्याख्यातानीत्यपि तेभ्यः प्रकटतां जगाहे।

ब्रह्म [illegible] मत्वा स्वमहिमस्यप्रकाशनाय [illegible] मायां ससर्ज—इत्यादिरूपं [illegible] यन्मया मैत्रायण्युपनिषदः समुद्धृतम्, विद्यतेऽथवाऽन्यासूपनिषत्सु, तत् [illegible]जनानां प्रतिबोधनायैव निदर्शनत्वेन परिकल्पितम्।

एतावत्पर्यन्तं साधारणमेवाऽऽसीत् सर्वम्। [illegible]तत्राऽऽसन्

मद्वितीयं हि ब्रह्मेति, ब्रह्मणः सत्यत्वान्मिथ्या हीदं दृश्यमानं जगदिति, मायया विद्यया वा जगदिदं सत्यत्वेन प्रतीयते इति, मूढता मिथ्याज्ञानं वाऽविद्येति, ज्ञानेनैवाविद्या नाश्यते मिथ्यात्वेन ज्ञायमानं सत् प्रविलीयते च जगदिति, व्यक्तिगतदृष्ट्या जगत्प्रपञ्चमिथ्याज्ञानादेव मोक्षो जन्मबन्धविमुक्तिर्वा जायते इति चाद्वैतप्रतिष्ठितसम्बद्धा सिद्धान्ता संश्रयन्तः केचन मनीषिणः। शङ्करेणैवाऽऽसादितस्त्वासीच्छेषोक्तः सिद्धान्तः। परं दुष्टतर्केणैव शङ्करेण स सिद्धान्तोऽधिगत इति कैश्चिद्विपश्चिद्भिः पुष्यमाणं मतं साम्प्रतमेव मया स्पष्टीकरिष्यते।

एतेभ्यः स्वीकृतेभ्यस्तत्त्वेभ्यः सद्भूतेनैतत्प्रश्नविषयकेण वितर्केण विचित्राया भारतीयधीशक्तेरनुगुणोऽवसरो दत्तः। समधिगतानि मया निबन्धाकारेणैवास्य प्रश्नस्योत्तराणि। विभिन्नेनाऽऽकारेणोपस्थापिताः साधारणा अपि विषयास्तेषां केषुचित् प्रबन्धेषु विरेजिरे। संकथाकारेण तेषां निबन्धानां सारांशोऽधस्तान्मया निबध्यते। निबन्धकान् "पण्डित" पदेनाऽऽत्मानञ्च "प्रष्टृ" पदेन तस्यां संकथायां प्रकाशयिष्यामि।

पण्डितः—अपि नाम बाह्यस्य जगतः कारणभूता मायाऽविद्या वा कथं जायत इति पृच्छा? अनादिः सा न जायत इति मया कल्प्यते तस्या उत्तरम्।

प्रष्टा—किं मायाऽनादिरिति त्वयोच्यते? ततः सनातन्यनन्ता च सा नैव नाशयितुं शक्यते। तथा सति कथं मुक्तिरवाप्यते?

पण्डितः—मायाऽनादिरिति मयोक्तम्, परं नाभिहितं मया मायाऽनन्तेति। वस्तुतस्तु सा सान्तैव।

प्रष्टा—अनादि किमपि वस्तु किं कदाचित् सान्तं भवति? अपि शक्नोति भवान् अनाद्यपि किञ्चन सान्तं वस्तु मां प्रदर्शयितुम्?

पण्डितः—नैतद् दुष्करम्। घटपटादिकं किञ्चन साधारणं वस्तु स्वयं चिन्तय।

प्रष्टा—भवतु, तथैव क्रियते।

पण्डितः—घटोत्पत्त्या किं न नाशितो घटस्य प्रागभावः ?

प्रष्टा—सत्यं तथैवैतत्।

पण्डितः—अत्र घटस्य प्रागभावः किं नाऽऽसीदनादिः ?

प्रष्टा—अभ्युपगम्यत एव मयैतत्।

पण्डितः—ततः किं न शक्यतेऽस्माभिर्वक्तुं सृष्टवस्तूनां प्रागभावोऽनादिः सान्तश्चेति ?

प्रष्टा—मोघीकृत-मदीय-समालोचनया त्वदीय-कल्पनाशक्त्या मूकीकृतोऽपि सविशेषमेतद्विषयं ज्ञातुमिच्छामि। ब्रह्म चेदद्वितीयमेकं सत्यम्, तदा कथं मायाया अस्तित्वं स्वीक्रियताम् ? मायायाः सत्यत्वे प्रतिपन्ने ब्रह्मातिरिक्तस्य विषयान्तरस्य स्वीकारो किमु नैव जायते ?

पण्डितः—न च माया सत्याऽसत्या वा।

प्रष्टा—ज्ञानद्वयस्य पारस्परिकविरोधोऽनेन स[illegible]त्पाद्यते। सङ्क्षेपं व्याख्यायतां सर्वम्।

पण्डितः—विनाशा[illegible] पूर्वं विनष्टव[illegible]नः स्थितिरपिनाम त्वया स्वीक्रियते ?

प्रष्टा—कोऽत्र संशयः ?

पण्डितः—किम[illegible]पगम्यत त्वया—नाश्यते ज्ञानेनाविद्येति ?

प्रष्टा—अथ किम्।

पण्डितः—ज्ञानेन माया नाश्यत इत्यनेनैव मायाया अस्तित्वं ज्ञायते।

प्रष्टा—स्वतःसिद्धस्ताव[illegible]यं विषयः। न च मया क[illegible]प-विद्यारूपस्य कस्यचिद् विषयस्यास्तित्वमस्तित्वसम्भावनं वा

कृतम्। यस्तु विषयो नाऽऽसीन्नास्ति न भविष्यति वा, स कथं चिन्तनीयः। स्वास्तित्वविषये स्वास्तित्वसम्भावनाविषये वा स्वतः-सिद्धं वस्त्वेवास्माभिश्चिन्तितुं पार्यत इति किं सत्यं नैतत्।

पण्डितः—न हि कथञ्चिदपि तत् सत्यम्। तस्य सत्यत्वे स्वीकृते त्वया मनसि समुद्भावितस्य शशविषाणस्य वन्ध्यासुत-स्यापि वा सत्यत्वं प्रतिपादितं स्यात्।

प्रष्टा—अविद्याया मायाया वाऽस्तित्वमस्माभिः स्वीक्रियते। [illegible]द्वितीयं ब्रह्मेति स्वीकरणेन किं मायया ब्रह्मणस्तादात्म्यं नैव द्योत्यते?

पण्डितः—तादृशी बुद्धिर्नैव लालनीया, यतस्तथा सति ज्ञानेन मायाया विनाशो ब्रह्मणोऽपि विनाशं क्रोडीकुर्यात्। असम्भवमेतद् यतो ब्रह्मज्ञानमेव मायाया विनाशकम्।

प्रष्टा—मायाया अस्तित्वं ब्रह्माश्रितत्वञ्चाभ्युपगम्यापि कथं तस्या ब्रह्मणा तादात्म्यं नैव स्वीकुर्वीय। तर्क[illegible]मिवै-तन्मे सर्वं प्रतिभाति। अप्यस्य रहस्यस्योद्घाटने भवान् समर्थः?

पण्डितः—अपि कदाचिन्मरुस्थल्यां परिभ्रमता भवता प्रत्यक्षी-कृतं सूर्यालोके परिस्फुरद् गभीरं शीतलं श्रान्तिहरं विततं सलिलम्?

प्रष्टा—दृष्टम्। जलत्वेन व्यक्तं प्रतीयमानम् अपि तद् वस्तु मरीचिकेति मया ज्ञातम्।

पण्डितः—अपिनाम प्रतिश्रूयते मरीचिकाया अस्तित्वम्?

प्रष्टा—स्वीक्रियत एव।

पण्डितः—मरुस्थलमेव सत्यं वस्त्विति प्रतीतिविषयं गते मरीचिका विलीयते। अपरथा चेदुच्यते तदा मरुस्थलाश्रयिणी मरीचिका मरुस्थलज्ञानेनैव ध्वंसं गच्छति।

प्रष्टा—अभ्युपगच्छाम्येतत्।

पण्डितः—मरीचिकायाः स्थित्या किं कश्चिदपि विकारो जातो मरुस्थल्याः ।

प्रष्टा—न तथा वक्तुं शक्यते ।

पण्डितः—माया विद्यते इति, ब्रह्मैव तस्या आश्रय इति, ब्रह्मज्ञानेन सा न भवतीति, तटस्थं ब्रह्म तयाऽनुपहतमिति, एकमेवाद्वितीयं ब्रह्मेति च सर्वमेवातः कथं न चिन्तनक्षमम् ?

प्रष्टा—मरीचिकाया मरुस्थल्याश्च सादृश्येन सर्वं तथैवेति प्रतिभाति। परं यथा मरीचिकायाः पारमार्थिकसत्ता नास्ति, तथा किं मायाया अपि पारमार्थिकसत्ताया अभावो नैतस्माद् गम्यते ?

पण्डितः—विचारमुखेनैव स्वीकृतं त्वया मायायाः सत्ता। साम्प्रतं तस्याः पारमार्थिकसत्ताया अभावोऽपि त्वयैवाभ्युपगतः। अतो माया न सत्या, नवाऽसत्येति यन्मयोक्तम्, तत् त्वया गृहीतमेव। मरीचिकाया अलीकत्वं तद्विपरीतं सत्यत्वेन बोधश्चाऽऽश्रित्य तस्या अनिर्वचनीयत्वं यत् त्वयोक्तम्, तत् सत्यमेव। तथापि तादृशी प्रतीतिरपि सत्यैवेति वचनमनिन्दनीयम्। सत्यमापेक्षिकं स्वतन्त्रञ्चेति वदतां हिन्दूनां बुद्धेरेतस्मात्तव ते ज्ञानं भविष्यति। नह्यापेक्षिकं सत्यमेव समग्रं सत्यम्, परं तत्रैवाऽऽस्ते सत्यस्य सार इति।

दृग्विषयीभूतस्य विश्वस्य माया अनादिः कारणम् नान्या चेति—समासतोऽत्र दत्तं तैर्मदीयस्य प्रश्नस्योत्तरम्। एतेन मायाया अद्वितीयस्य ब्रह्मणः समरूपता समसनातनत्वञ्च प्रतिपादिते भवतः—इत्यस्याः दुरपह्नवाया आपत्तेः—न तथेदम्, यतो यथा मरीचिका मरुस्थल्या मिथ्याबोधस्तथैव बाह्यमिदं जगदपि ब्रह्मणो विषये मिथ्याबोधः—इत्यमुत्तरम्। मिथ्याबोधस्य योनिं जिज्ञासुनोऽविद्यायाः स (मिथ्याबोधः) जायते इति कथितो भवतीति, मायया

अविद्यायास्ताद्दात्म्यं चेन्नैव स्वीक्रियते, तदा मायैव तस्या हेतुरिति च वाक्याभ्याम् जनस्य स्वत एवैषा प्रतीतिर्जायते, यज्जिज्ञासुस्तैरेभिः पदैरलीकृता अतो निवृत्तिमेव पुनः पुनः प्राप्नोतीति। निरर्थकं मार्गान्तरमाश्रयितुकामे मयि सदयं मदीयं करं धृत्वा सुस्निग्धं निर्भर्त्सयित्वा च माम्, तैरभिहितम्—कठोरेण तपसा निष्कामोपासनया च यैर्महात्मभिः कालाकाशवासनादीनां बन्धनमतिक्रान्तम्, तैरेवैते विषयाः सम्यग् बुध्यन्ते। समुज्ज्वलेनाऽऽलोकेनान्धकारस्य स्वरूपमाविष्कर्तुमिच्छोरिव परिमितया बुद्ध्याऽविद्याया दुर्विज्ञेयं रहस्यं ज्ञातुकामस्य चेष्टा। बाह्यस्य जगतो मायेयं कथं जायते—इति प्रश्नस्योत्तरं तानावाप्तैरेव समभिनन्दनीया, न तु निन्दनीया मयेत्यहं तै रभिहितः। अथवाऽन्यैरेवान्तरैश्चेदुदीर्यते, तदा कथमनन्यसम्बद्धं ब्रह्मान्यसम्बद्धं जायत इति? तथैव चेदहमकरिष्यम्, तदा तदनन्तमाद्यन्तं च ब्रह्म ससीमया मानवबुद्ध्या विज्ञेयं सान्तञ्चाभविष्यत्। जानीयाम वयञ्चेदस्य प्रश्नस्योत्तरं, अपिनाम तदा तत्परमं वस्तु तिष्ठेत्। प्रश्नं तदानीं तत्रैव तिष्ठेत्। तथा सति तदन्यसम्बद्धं स्यात्। साधारणबुद्ध्या किं तावज्ज्ञानपदं लभ्यते? अस्माकं मनसा परिमितं वस्त्वेवास्माभिर्विज्ञायते, परं यत्तु परिच्छेत्तुं नैव शक्यतेऽस्माकं मनसा, तन्नैवास्माभिरवधारयितुं पार्यते। सावधिके सति परमे ब्रह्मणि तस्यासीमत्वं विलीयते समुत्पद्यते च ससीमत्वम्। मनसा समर्थीकृतानि सर्वाण्येव वस्तूनि सान्तानि भवन्ति। अतः परमवस्तुनो ज्ञानमसम्भवमेव। अनेनैव हेतुना खल्वस्य प्रश्नस्य कदाचिदपि न जातमुत्तरम्। समभविष्यच्चेदस्य प्रश्नस्योत्तरम्, तदा केवलस्य ब्रह्मणः कैवल्यं नैवास्थास्यत्।

अथातपादपद्मा हि समुल्लिखितस्य व्याख्यानस्य चरमसिद्धान्तस्य च धुरीकृताः। पुरतश्च तस्य व्याख्यानस्य सर्वा-

श्चेतराश्चिन्ता अकिञ्चि-करतया प्रविलीयन्ते। हिन्दूनां सविधे वेदान्तदर्शनं हि युक्तिवादात् किञ्चनाधिकतरं गौरवास्पदं वस्तु। भारते धर्मदर्शनयोर्मध्ये सुस्पष्टा पारस्परिकाविघटनसम्पा- नङ्गमा नास्ति काचित् सीमा। न तु युक्तिवादात्, परमेशोन्मेषरूपा- दकस्मादेवोद्गतिस्थानात् समधिगता ताभ्यां धर्म-दर्शनाभ्यां प्रणोदना। उपनिषदां वस्तुविषये यथा तथा वा भवतु नामास्माकं मतम्, भारतीयास्तु तदीश्वरप्रेरितत्वेनैव गृह्णन्ति। ऋषिभिः श्रुतत्वा- दृशोन्मेषलब्धत्वाच्च भारतीयैः श्रुतित्वेन गृह्यते मन्त्रब्राह्मणारण्य- कोपनिषदात्मको वेदः। अविचार्या हि दर्शनानां मूलं श्रुतिः। श्रुतिस्थितानां विषयाणां व्याख्यानं भारतीयानां दार्शनिकानां कर्म। तद्व्याख्यानसमये पुनस्तेषां चिन्ताप्रवाहे ऽत्यावश्यकानां समाधानविषये श्रुतेरेव प्रामाण्यं पर्यलक्षत। प्रथमतस्तावद् ब्रह्मणः परमार्थत्वे केवलत्वे चास्त्युपनिषत्सु दृढः प्रत्ययः। एवं प्राप्ते ब्रूमो यद् व्यावहारिकस्य जगतः सांवृतं सत्यत्वं कथमपि निराकर्तुं न शक्यते, द्रष्टुर्जीवस्य बुद्धौ तस्य भानं प्रसह्य बोभूयत एव। एतेन केवलाद्वैतवादस्य शाश्वतिकविरोधो दुष्परिहरः, परमार्थवादेऽपि प्रसिद्धोपनिषन्महावाक्येषु प्रतिष्ठितः।

प्रत्यक्षेण जगन्मिथ्यात्वं नाऽऽयातम्। अनुमानेनापि तत् साध- यितुं न युज्यते। स्वभावेन दुर्बलं खलु मानवं चित्तं जगन्मिथ्येति कल्पयितुं न शक्तम्। तस्य आशा, भयम्, तज्जन्या उपासना, तस्य प्रार्थनामन्त्राः, दृश्यजगतोऽकर्तृकजडयन्त्रत्वेन विकृतचित्तस्य मायिककल्पनारूपेण वा निर्धारणे विरागः—सर्वाण्येतानि जग- न्मिथ्यात्वविरोधीनि। ततः पुनः शास्त्राणां परस्परविरोधोऽ- नन्तश्च। एतेभ्यः खलु कारणेभ्यो विस्पष्टस्य सगुणेश्वरवाद- स्योत्पत्तिः सञ्जाता। यः खलु वादो भारतीयदर्शनेषु प्रसिद्धस्य तत्त्वाद्वैतवादस्य सहगामिपक्ष इव विराजते, प्राक् सगुणवादाऽसौ

तत्त्वाद्वैतवादस्य विरोधेन समुत्पन्नोऽपि कालेन तद्विरोधं परिहृत्य तस्य परिपूरकरूपेण समजायतेत्येवात्र दुर्बोधं वैचित्र्यम्।

कस्तावत् साकारः परमेश्वर इत्यपृच्छत् स्वामिविवेकानन्दः। हिन्दूनां धर्मग्रन्थाद् वचनं समुद्धृत्यैव तेनोक्तम्—"स हि सनातनः, शुद्धः, सर्वशक्तिमान्, सर्वज्ञः, परमकारुणिको विश्वप्रेमस्वरूपश्चेति।" दार्शनिकानां सच्चिदानन्दो भक्तानां प्रेममयः परमकारुणिकश्चेति किमास्ते परमेश्वरद्वयमित्याशङ्कायां तेनोक्तम्—ब्रह्मणोऽभिन्न एव साकारः परमेश्वर इति। सर्वमेव तदद्वितीयं । केवलत्वेन परमार्थत्वेन च तस्य विचिन्तनं दुष्करमिति भक्तैः साकारस्येश्वरस्य परिकल्पनं कृतम्। मानुषबुद्ध्या सम्पूर्णतयाऽधिगतस्य ब्रह्मविषयकस्य ज्ञानस्य सम्पूर्णो विकाशो हि साकारे परमेश्वरे जायत इति तेनैव व्याख्यानमुखेनाभाणि।

अद्वैतवादरूपपवित्रदुग्धपिपासुभिर्वादरायणसूत्रावलम्बिशङ्करकृतभाष्यमेव श्रयणीयम्। पूजाप्रार्थनादीनां व्यावर्तकं दर्शनं कथं धर्म्यं स्यादिति जिज्ञासुनाऽर्वाचीना वेदान्तमतानुसारिण एव द्रष्टव्याः।

सप्तद ।।ल्लासः

वेदान्तस्य वाणी

स्वरचिते विश्वविश्रुते वेदान्तसूत्रभाष्ये यो हि नाम विषयः प्रधानत्वेनोपन्यस्तः शङ्करेण, तस्य स्थूलं वर्णनं सुविपुलाया विप्रतिपत्तेः प्रति ,लतया वर्तमानमपि सर्वथा प्रधानतयैव चकास्ति। पूर्वतन उल्लासे तास्तावद् विप्रतिपत्तयो मया निवे ।ता एव। केवलं निर्गुणं ज्ञानमयं ब्रह्मैव परमं सत्यम्। सर्वमन्यद् आपेक्षिकं सत्यत्वं समुद्वहति। आत्मबोधे जाते जीवात्मा ब्रह्मणात्मनस्ता ।त्म्यं विजानाति। समर्यादत्वसंसर्गादेव जीवात्म ' र-मात्मनोर्भेदः प्रतीयते। समर्यादत्वेन शकलीकृतादेव मन्ये परमात्मनो जीवात्म ः ष्ठिर्जायते। जीवात्माऽयं न तु सत्यः, परं सत्याभास एव, समर्यादत्वस्याविर ।ातत्वाद् ब्रह्मबोधस्यासाध्यत्वा. वा। भाष्यस्य मूलस्य चाऽऽङ्गलभाषात्मका. वादेन परिपूर्णेषु त्रिपञ्चाशदधिकाष्टशतसंख्यकेषु बृहदाकारपत्रे : दरीदृश्यत एवायं खलु भावः। संख्यातीतैरात्मभिर्विचित्रैः रचे ।।ार-र्वे ,भिरुपलक्षितस्यास्य दृग्विषयीभूतस्य विश्वस्यापि कारणं किञ्चन परिचिन्तनीयः इति कृत्वा, ब्रह्मणः परमार्थत्व ीकाराच्च तदेवास्य कारणम्। "यथा स्वयं प्रसारितया मायया मायावी त्रिष्वपि कालेषु न संस्पृश्यते, अवस्तुत्वात्, एवं परमात्माऽपि संसारमायया न संस्पृश्यत इति।"

अविद्यया भ्र ,लतानामस्माकं सविधे सत्यत्वेन प्रतीयमानाम्

मायामयं जगत् सत्य अस्माभिश्चिन्तापथान्निष्काशितमपि दृढमेवा-स्माकं मनसि लग्नं तिष्ठति। स्वगतस्यानाथ शङ्करेण यो हि खल्वनुलोम प्रतिलोमो वा वितर्कः संश्रितस्तस्य पठनसमये चित्तवैक्लव्या विरोधाभासेभ्यश्च जायमानस्तौकर्यैरितरैश्च वैषम्यै-र्दोधूयत एव जनस्य मौलो बोधः। परिदृश्यमानस्य विश्वस्य मिथ्यात्वप्रतिपादनक्षम ब्रह्मज्ञाने नास्ति शूद्राणामधिकार इति कुत्र-चित् सयुक्तिकं शङ्करेण प्रतिपादितम्। अस्मात् सिद्धान्तात् कानि-चनाऽऽनुषङ्गिकफलानि प्रवर्तन्ते, येषु शङ्करेण दृष्टिर्न निक्षिप्ता। तद्यथा, शूद्रः खलु शूद्रत्वेन रूपेण व्यावहारिकं जगदेव सत्यतयाऽव-गच्छति। शङ्करमतरीत्या तस्य तु पारमार्थिकसत्यस्य भानं न सम्भवति। अतस्तद्दृष्ट्या पारमार्थिकं सत्यं नाम किमपि कदापि न वर्तते।

विश्वेऽस्मिन् ईश्वरैर्नरापेक्षया समुन्नततरं स्थानमधिक्रियत इति श्रुवाणस्य शङ्करस्यानुशासनवाक्येनैतत्सदृशस्यापरस्य व्यभि-चारविशेषस्यावसरो दत्तः। ईश्वरवादिनामीश्वरस्यानुरूपः कश्च-नाऽऽस्ते विश्वस्येश्वरः। तस्मिन्नेवेश्वरे सम्भवति ब्रह्मज्ञानम्। सर्व-दैवाऽऽत्मनो ब्रह्मणा तादात्म्यं बोद्धुं क्षमः स दृश्यविषयीभूताद् विश्वात् प्रलीयते। वस्तुतस्तु नैतत् सम्पद्यते, यतः कल्पात् कल्पान्तरं यावद् विश्वस्येश्वर एव स्थिरमवतिष्ठते। अनन्ता हि कल्पपरम्परा, जीवजगतो विवर्तनस्य सनातनत्वात्। यद्यपि साधारणा जीवाः पूर्वजन्मगतामस्य योनिं सर्वथैव न प्रतिपद्यन्ते, तथापि साधारण-जीवत्वेनेश्वरस्य परिकल्पनं नैव युज्यते। अनारतं प्रस्तुतया वित-ण्डया पारमार्थिकसत्यत्वेन ब्रह्मविषयकं ज्ञानं दूरमेवापसर्पति, अनश्च दृग्विषयीभूतेनानेन विचित्रेण आलोकारेण जगता विशेषेण संसक्तो भवति। अपौरुषेयत्वात् हिन्दूनां मते सनातनः खलु वेदः। विद्यमानायामप्येतस्मिन् मते विप्रतिपत्त्यां शङ्करस्तु कदापि

नैवात्र विप्रतिपद्येत। कल्पारम्भेषु विश्वस्य पुनः प्रकाशसमये वा ऋषीणां सकाशे प्रकाशतां यन्त्येते वेदाः। विवर्तमाना जगत आविर्भावा अनन्तकालं व्याप्य एकरूपा एव स्युः—इत्यादयो बहव [illegible] एतस्मा [illegible] न्यन्ते। शङ्करेणैतन्मतं गृह्यते। तन्मते तु प्रकाशं प्राप्य विश्वं चरमवितर्ति लभते; ततस्तज्जटिलतां गाहते; ततश्च परमे ब्रह्मणि विलीयते। एष एव तावत् क्रमश्चिराय चलति। स्थिरमेव हि विश्वस्य स्वरूपम्। नवीनायां कस्याञ्चित् सृष्टौ षष्ठं किञ्चनेन्द्रियं तस्य विषयश्च जनिष्येते इति चिन्तितुमपि नालम्। मिथ्या चेत् सर्वमिदमविद्योद्भावितं जगत्, तदैतादृश्या दृढतयैतस्य विषयस्य प्रतिपादनं निरर्थकमेव स्यात्। विगलित[illegible]ध्याबाधं किञ्चिज्जगत् [illegible] वचनानां एकमस्माभिरत्र प्र[illegible]तीक्रियते। सूर्यचन्द्रादिभिः सकलस्य ज्योतिष्कमण्डलस्य नरैः पशुभिश्च सममपरेषां चेतनपदार्थानाञ्च विस्मया[illegible] तताऽऽस्ते वर्णितम्। हृद्यन्त्रस्याऽऽकुञ्चन-प्रसारणादिकमनुसरत् तालबद्धं स[illegible]तकमिवानन्तं कालमाकाशञ्च व्याप्य विवर्तमानं नरैरनुभूयमानं चेतनाचेतनात्मकमिदं जगद् अपि विस्तारं जटिलता[illegible] समाप्नोति। कल्पात् कल्पान्तरं यावत् स्थिति[illegible]लैरीश्वरैः शिष्यत इदं जगत्। नैतिकभावप्रधाना, धर्म्यैः कर्तव्यैरुपेता, सुखलाभाय क्लेशपरिहाराय च पापैर्वर्जिता, पूर्वजन्मार्जितपाप[illegible]गयानुगुणपरजन्मप्र[illegible]प्तिप्रतिपादयित्री काचिदस्त्येव व[illegible]विषयिणी परिकल्पना। अनन्तस्य [illegible] च दिवसरजनीनां काचिद् यात्रेयम्। यात्राभिरतानां सर्वेषामेव विषये सत्यत्वेन निर्विवादस्वीकृतं वस्तुगतन्तावदि[illegible] कल्पनम्। कल्पनायामस्यामास्ते कश्चनेश्वरः यो हि स[illegible]पासनीयः, अदृष्टलाभाय च यमेवोद्दिश्योपासकः कर्म कुर्यात्। अविद्यालब्धं मायाम[illegible]दं जगदिति यच्छङ्करेण ग्रन्थस्य [illegible]भागेन प्रतिपादितम्, तस्य विरुद्धं खल्वेतत् परिकल्प[illegible]। कालक्रमेण

[illegible]न प्रतीच्यदेशजानां दार्शनिकानां चूडामणिविशेष-बार्क्‌ले-महोदयस्य सङ्गो लब्धस्तस्याप्यध्यात्मवादस्य प्रत्याख्याने ऽपि कदाचिद् बद्धपरिकर इव सोऽलक्ष्यत। चेतनातिरिक्तं किमपि बाह्यं वस्तु नैव विद्यत इति वदतां बौद्धानां विचारविषयो यतस्तेन निन्दितः। सुदीर्घस्य विचारग्रन्थस्योपसंहार एव वस्तु तद्विषयकं ज्ञानं च स्वतन्त्रे भवत इति दृश्यते प्रतिपादितम्। तादृशस्य विचारग्रन्थस्याग्येतुर्विशिष्टेन प्रत्यक्षमात्रवादिना वस्तुनः सत्ता प्रतिपाद्यत एवात्र ग्रन्थे इत्यादिरूपो भ्रमो दुरपनेय एव। हठग्रहं गृहीत्वापि मौलं बोधं यदि तादृशानां वाक्यानाम् एकमपि कश्चित् पाठकः पठति, नूनं जायेतैव तदा तस्य बुद्धेर्व्यामोहः। द्वितीयाध्यायस्य प्रथमपादस्य द्वाविंश-सूत्रस्य शङ्करकृतं भाष्यं पठता केनचित् पाठकेन कथं नामोल्लिखितस्य भावस्य विरोधोऽपनीयेत ? "अपि च यदा तत्त्वमसीत्येवंजातीयकेनाभेदनिर्देशेनाभेदः प्रतिबोधितो भवति, अपगतं भवति तदा जीवस्य संसारित्वं ब्रह्मणश्च स्रष्टृत्वम्; समस्तस्य मिथ्याज्ञानविजृम्भितस्य भेदव्यवहारस्य सम्यग् ज्ञानेन बाधितत्वात्। तत्र कुत एव सृष्टिः ? कुतो वा हिताकरणादयो दोषाः ? अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसंघातोपाध्यविवेककृता हि भ्रान्तिर्हिताकरणादिलक्षणः संसारो न तु परमार्थतोऽस्तीत्यसकृदवोचाम।" विचित्रविश्वरूपेण प्रतीयमानस्य ब्रह्मणो विषयेऽस्माभिः पुष्यमाणमन्यथाबोधमङ्गीकृत्याऽप्यस्माकं चेतनारिक्तवस्तुतया सनातनस्य जगतः सत्तां स्वीकुर्वता शङ्करेण ब्रह्मत्वेनैव जगदिदं परिचिन्तितम्। मायात्वेन जगतो व्याख्यानावसरे नूनं ब्रह्मविषयकमन्यथाभानमेवाऽऽसीत् तस्य मनसि।

मायारूपेणैन्द्रजालिकदण्डेन समुद्भाव्यते ब्रह्मणा छायात्मकमिदं जगदित्यस्मादनाद्यनन्तान्मिथ्याज्ञानजन्याद्सौकर्याद् अनेनापि

ध्या ऽ्यानेन नास्माकं निस्तारो जातः। शङ्करस्य वचनमिदमस्मा- सविधे दुर्भेद्यं विकल्पमेकं समुपस्थापयति। ऐन्द्रजालिकं ब्रह्म, तदधिष्ठितेनेन्द्रजालेन समुत्पादितं परिदृश्यमानमिदं जगदिति सना- तनवस्तुद्वयस्य स्वीकारो जायत एवैतादृशाद् वचनात्। सत्यम् औदासीन्येनोत्पाद्यमानया मायया ब्रह्म न संस्पृश्यते, इन्द्रियग्राह्यं जगद् वर्जयित्वा ब्रह्मावाप्तिश्च जीवात्मनोऽप्यमवेति, तथापि माया चेत् सनातनी तदा तस्या मिथ्यात्वप्रतिपादनं निरर्थकमेव।

परिदृश्यमानस्य जगतोऽनाद्यनन्तताया जीवात्मनो मुक्तेश्च पार- स्परिकविरोधमपाचिकीर्षुर्विद्यार्थी एतस्मादप्यधिकतरमसांकर्यं प्रत्य- क्षीकरोति। पुरुषस्य ब्रह्माहमित्यन्तर्ज्ञानसापेक्षो बोधो मुक्तिरिति श्रुतेर्लक्षणनिर्वचनावसरे शङ्करेणैवोक्तम्। अन्तर्ज्ञानसापेक्षे जात एवास्मिन् बोधे प्रत्यक्षतां गतस्य जगतो मिथ्यात्वं प्रतीतिपथमायाति। एकस्यापि जनस्य यदि तदन्तर्ज्ञानं भवेत् तदा सर्वेष्वेव जनेषु तदस्माभिः सम्भावयितुं शक्यते। शङ्कायामेव केवलं तन्न भवति। सर्वेषामेव चेज्जनानां मुक्तिर्जायेत, तदाऽस्या अनाद्यनन्ताया मायायाः किं स्यात्? यतः सुकर्मणां फलेन शूद्रोऽपि कदाचिन्मुक्तिं प्राप्नुयादेव।

एतेषामसुगमार्थानां केषाञ्चिद् विषये न च नाऽऽसीच्चेतनः शङ्करः। एतेभ्यो दुर्भेद्येभ्यो विषयेभ्योऽपसर्तुं स्वीकृतं तेनाऽनतः मत- भेदेन ज्ञानस्य द्वैविध्यम्। समुन्नतेन ज्ञानेन ब्रह्मणो बोधो जायते। अपेक्षिकत्वादनुन्नतं ज्ञानं न शुद्धम्, न च पुनस्तेन शुद्धं ब्रह्म ज्ञातुं पार्यते, परं विश्वस्येश्वरस्य भानजननं एव तद् अलम्। यद्यप्ये- तन्मतमुल्लिखितस्यासौकर्यस्यापनयनेऽक्षमन्तथापि चिन्तायाः प्राये- णासीममेव क्षेत्रमनेन दीयते। एतन्मतात् ज्ञानाद् अधिकमवाप्तुमन- भिलाषी वैदान्तिको धर्मानुरागप्रदर्शनस्य विपुल एवावसरोऽवाप्यते। अनुन्नतज्ञानपराणां मतावलम्बिनां इष्टं ब्रह्म सगुणोऽथवाऽभिन्नः ईश्वर-

त्वेन विश्वदेवतावादिनां सर्वगतात्मरूपेण वा प्रतिभाति। ब्याता-मेवात्रोपयोगिनौ जनप्रियः कर्मवादो जन्मान्तरवादश्च। अनुमत-ज्ञानाधिकारे स्थितयोरेतयोस्तत्रैव प्राधान्यं स्वीकृतं शङ्करेण। ब्रह्मणि जगतः कारणत्वं नास्ति, यतस्तथा सति नरैरनुभूयमानेन परस्पर-वैषम्यजनितेन क्लेशेन ब्रह्मणः पक्षपातित्व-स्वैरवृत्तता-न्यायविरोधि-तादि दोषा भवेयुः, परं निर्गुणत्वेनैव ब्रह्म पूर्वं स्वीकृतमिति स्वप्रतिकूलतयात्थापितस्य पक्षस्य निरसनायैव शङ्करेणैतत् कृतम्। न तथेत्यासीत्तस्योत्तरम्। सृष्ट्यवस्थाम् ईश्वरेण स्वेच्छयैव चेत् समुत्पादितमिदं वैषम्यम्, तदा स दूषणीय एव। सुकृतं दुष्कृतञ्च विचार्य सर्जनीयं हि तेनेदं विश्वम्। प्राणिनां स्वस्वाचरित-दुष्कृतजन्यत्वात् सृष्टौ परिलक्ष्यमाणस्य वैषम्यस्य, न हि तत्कृते गर्हणीयो विश्वकर्ता। मन्येऽसुबोधतमं खल्विदं वचनं शङ्करस्य। परमं ब्रह्म केवलं शुद्धञ्चेत्यादिवाक्येन समारब्धं ब्रह्मवर्णनम्। आपेक्षिकतयाऽसत्यस्य जगतः, आपेक्षिकतयाऽसत्यानां प्राणिनाम्, आपेक्षिकतयाऽसत्येन पुण्यपापादिना परमं ब्रह्म बद्धमिति परस्पर-विरुद्धान्येतानि खलु वाक्यानि। अपरञ्च, व्याक्षेपोऽयं न तूत्तरं प्रश्नस्येत्यपि दोषोऽत्र प्रसह्यैव प्रसज्यते। सुकृत-दुष्कृते चेद् वैषम्यस्य बीजम्, तयोः सुकृत-दुष्कृतयोः का तावद् योनिरिति प्रश्नस्य तथाऽप्यवकाशो विद्यत एव। पश्चात् कीर्त्यमाने सूत्रेऽयं तावत् प्रश्नः पूर्वमेव निरूपितः। "अतो विभागादूर्ध्वं कर्मापेक्ष ईश्वरः प्रवर्ततां नाम, प्राग् विभागाद् वैचित्र्यनिमित्तस्य कर्मणोऽ-भावात्तुल्यैवाऽऽद्या सृष्टिः प्राप्नोतीति चेत्, नैष दोषः? अनादि-त्वात् संसारस्य।" अस्यैव सूत्रस्य व्याख्यानावसरे शङ्करेणैव पुनरुक्तम्—"भवेदेष दोषो यद्यादिमान् संसारः स्यात्। अनादौ तु संसारे बीजाङ्कुरवद् हेतुमद्भावेन कर्मणः सर्गवैषम्यस्य च प्रवृत्तिर्न विरुध्यते।" सर्वेष्वेव प्रश्नेषु यो हि नाम प्रश्नः सनिर्बन्धं

नराणां चेतःसु विराजते, तस्यैव प्रश्नस्योत्तरमिदम् अति हि नाम निराशाजनकः।

परिदृश्यमानस्य विश्वस्य केवलसत्यत्वाभावात् तस्माज्ज्ञातेन विषयेण ब्रह्म कथं बद्धं स्याद्—असौकर्यापनयनाय समालोचकमुखमुद्रणाय चास्माभिरिदमेवोत्तरं परिकल्पयितुं शक्यते। अज्ञानावरणमध्या- समीक्षितस्य ब्रह्मणस्तथात्वमेव प्रतीयत इति त्वेतावतैवोक्तं स्यात्। तादृशं ब्रह्मैव विश्वकर्तृ। अ- ..त..न..्ये नैतिकभावराशिभिरनुभूयमानं प्राधान्यमेव विशेषेण परिलक्षणीयम्।

न्यायव..ते तावद् विषयाः श..भाष्यस्याऽऽयतनवृद्धावेव हेतवः। धर्मप्रव..नां हिन्दूनां मनसि वेदान्तेन यो हि नाम भावः स..त्पाद्यते, प्रतीच्यानां मनांसि उक्तादेव कारणात् तं भावं ग्रहीतुं नैव पारयन्ति। वैदान्तिकानां सविधे वेदान्तो हि धर्मो दर्शनञ्चेति विषये ..असंशयोऽस्मि जातः। ..नां विस्मय..पादकं यद्यि नाम वेदान्तदर्शनमतं मयैतेषु पत्रेषु निवेशि.., तेन तेषामन्यथाबोधो मा भूदिति मया साम्प्रतिकानां भारतीयानां निर्माणे वेदान्तदर्शनस्य धर्म्येण भावेन यत् साहाय्यं कृतम्, तदेव स्पष्टीकरिष्यते।

अष्टाद[illegible]ाल्लासः

वेदान्तस्य तत्त्वम्

अर्वाचीना भारतीया [illegible] कीदृशं भावं पुष्यन्तीति जिज्ञासुर्जनो भारतीयानां चित्तस्य वैशिष्ट्यद्वयमवश्यमेव जानीयात्। तत्र प्रथमतस्ताव[illegible] स्वप्रकाशशब्दात्मिकायां श्रुतौ विश्वासः। द्वितीयतस्ताव[illegible] कौतुकावहं किञ्चन विरुद्धभावपोषणसामर्थ्यम्। परस्परवि[illegible]भिः क्रियाभिश्चिन्ताभिश्च युक्ता अपि भारतीयास्ताभिरसंस्[illegible]ष्टत्वेनावस्था[illegible] बिभ्रत्येव शक्तिविशेषम्। भारतीयानां भाववैशिष्ट्यमिदं भारतशासकानां मनसि व्यामोहमेव कञ्चन सर्वथा समुत्पादयति। पश्चात् कीर्त्यमाने वाक्ये शङ्करेणैव हिन्दूनां वैशिष्ट्यभूतस्यास्य भावस्य लक्षणं कृतम्। "यद्यपि श्रवणव्यतिरेके[illegible] मननं विदधच्छब्द एव तर्कमप्यादर्तव्यं दर्शयतीत्युक्तम्, नानेन मिषेण शुष्कतर्कस्यात्राऽऽत्मलाभः सम्भवति। [illegible]त्यनुगृहीत एव ह्यत्र तर्कोऽनुभवाङ्गत्वेनाऽऽश्रीयते।" ततश्च तेनैवोक्तम्—"वेदस्य तु नित्यत्वे विज्ञानोत्पत्ति[illegible]त्वे च सति त[illegible] ज्ञानस्य सम्यक्त्वम् अतीतानागतवर्तमानैः सर्वैरपि तार्किकैरपह्[illegible]म्।"

जनानां दैनन्दिनजीवितेषु प्रत्यक्षी[illegible]तमेव मया तद् द्वितीयं वैशिष्ट्यम्। एतद्विषये मया बहुभिरेवाऽऽलापः कृतः। ते त्वेतस्यास्तित्वं स्वीकृत्यापि नैतस्य व्याख्याने समर्था अभवन्। वेदान्तस्य परस्परविरो[illegible]धवचनेन क[illegible]श्चिदपि न व्या[illegible]कुलीक्रियन्ते हिन्दव

इत्यहं केनचिद् भारतीयेन सुजनेन कथितः। ईशोपनिषदः समुद्धृतं तेन किञ्चिद् वाक्यम्—

पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥

इति। तत् तु तेनैव वक्ष्यमाणरीत्या व्याख्यातम्। "दशभ्यो दशानां व्यवकलने कृते दशैवावतिष्ठत इत्येतादृक् किञ्चिद् वस्त्वपि-नाम पूर्वं भवता श्रुतम्? वेदान्तोऽस्मान् एतदेव शिक्षयति, वयञ्च एतस्मिन्नेव विश्वासवन्तः।" सत्स्वपि परस्परविरोधिवचनेष्वसामञ्जस्येषु च वेदान्ते, चिन्ताशीलानां मानवानां चिरन्तनीं रीतिमाश्रित्य शिक्षितैर्हिन्दुभिरैहिकामुष्मिकरहस्यानि परिचिन्त्य परा शान्तिरवाप्यते वेदान्तेनेत्यत्र नास्ति मे संशयावकाशः।

न च सर्वे वैदान्तिका अद्वैतवादिनः। दूरे तावदास्तामेतत्, सन्ति खलु केचन जनाः, ये बादरायणसूत्राणां शङ्करप्रदर्शितरीत्या व्याख्यानं न सहन्ते। शङ्करस्य तुलनया टीकाकारो रामानुजो द्वितीयं स्थानमधिकुरुते। द्वादशशताब्द्यां जातो वैष्णवः स शङ्करप्रोक्ताद् द्वैतवादाद् अकठोरं विशिष्टाद्वैतवादाभिधं स्वमतं प्रचारयाम्बभूव। रामानुजटीकायाः पूर्वतनेऽपि काले विशिष्टाद्वैतवादिसम्प्रदायस्य सत्ताऽस्माभिरुपलभ्यते। वङ्गेष्वर्वाचीन-टीकाकृतः श्रीबलदेवस्य मतमेव प्रबलतया विराजते। "नदीया" प्रदेशस्य विश्रुतस्य धर्मप्रचारकस्य श्रीचैतन्यस्य मतावलम्बिना परमवैष्णवेन तेन वृन्दावने श्रीकृष्णस्य भगवतोऽनुज्ञां प्राप्य "गोविन्दभाष्य"-समाख्यं निरमायि किञ्चन वेदान्तसूत्रभाष्यम्। वेदान्तसूत्राणां सेश्वरवादानुमोदितं किञ्चन व्याख्यानम् एतेन भाष्येण प्रदर्शितम्। रहस्यस्य स्वरूपमाश्रित्य यन्मया पूर्वमेवोक्तम् एतेषां व्याख्यानानां नानारूपत्वेनोत्पादितस्य विस्मयस्य तेनैव मन्ये निरसनं स्यात्। सूत्रेष्वेतेषु सार्वलौकिकधर्मस्य दर्शनस्य च मतानि

विनि‌ तानि वर्तन्त इति, न च कस्यचि विशेषस्य कृते, परं सार्वलौकिकप्रयोगायैव वि चितानि तानि सूत्राणि बादरायणेनेति च गोविन्दभाष्यानुवादकेन रायबाहादुर-श्रीशचन्द्रवसु-महोदयेन स्वं मतं प्रकाशितम्। वेदानां सार इत्यर्थे व्यवहृतोऽयं वेदान्त-शब्दः सुवितते धर्म्ये त्वाविषयक त्रेत्रमधिकृत्यैव तिष्ठति। साम्प्रतिके काले यदि नाम कश्चन जनो वेदान्तस्य किञ्चन तत्त्वम् आविष्कर्तु तदा वेदान्तपदस्य व्यापकं तमर्थविशेष-मवलम्ब्यैव तेन तच्चिन्तनीयम्, न तु सम्प्रदायविशेषगतं व्याख्यानं तेन समाश्रयितव्यम्।

कस्यचिद् भारतीयस्य सुजनस्य तपोवनं मया वारद्वयमासा-दितमिति मे मनसि सुस्पष्टं विराजते। इंलण्डदेशीयानां भूस्वामिनां व्यक्तिगतेन धर्ममन्दिरेण तत् तुलयितुं शक्यते। समुन्नतेन प्राकारेण चतुष्पार्श्वस्थितभूमिवनादिभ्यः परिच्छिन्नं चतुष्कोणमासीत् तत्तपो-वनम्। रहस्यपूर्णेन भारतीयानामानन्दजनेन विश्वदेवतावादेन परिपूरितमिवाऽऽसीत् तस्य तपोवनस्य वातमण्डलम्। ज्ञाना-तीतोऽपि परमेश्वरोऽन्तरस्थ एवास्य त सहसैवात्र मनसि जायते। अत्युच्छ्रितस्य कस्यचित् पर्णबहुलस्य पादपस्य मूले ध्यानाय निर्मितासी काचन क्षुद्रा वेदिका। प्रतिप्रत्यूषे, कर्म-जगतः कोलाहले प्रकृतेर्ध्वनीनां निमज्जनात् पूर्वं तस्य तपोवन-स्याधिकारी सनातनस्य वेदान्तरहस्यस्य परिचिन्तनाय शान्तिपूर्णं तत् स्थानमभ्येति। तपोवनपरिसरस्थितस्य प्राकारस्योपरि उत्-कीर्णान्यास उपनिषदां वचनानि। उद्यानस्यैकस्मिन् प्रान्ते सरो-वरतीरे शुशुभिरे देवायतनानि। तेष्वेकस्मिन् देवायतने प्रतिष्ठितासीद् रम्या बुद्धस्य प्रतिमूर्तिः। बुद्ध समादरणीयपावना-त र्तिस्तपोवनाधिकारिणः प्रियतमैव समजायत। अपरेषु देवा-

सर्गस्थित्यन्तरहस्यस्य प्रतिरूपं योनि त्मकं शैवानां

दैवतम् आसीत् प्रतिष्ठितः। "ओम्" इति स्वात्मकेनाक्षरेण सर्वमप्येतन्मर्मोपलम्भनानि संस्कृतान्यक्षराणि सौवर्णेन वर्णकेन भूषितानि सन्ति चकास्ताञ्चकुः ... अस्तरनिर्मिते द्वारदेशे। "ओमित्येतदक्षरमुद्गीथमुपासीत" इति हि छान्दोग्योपनिषदः प्रारम्भकं वाक्यम्। ... भक्तानां मनसि यो यो भावो जायते, स स भावो "मोक्षमूलार" महोदयेन सविशेषं प्रकटीकृतः। तैत्तिरीयकोपनिषदः स भावोऽत्र समुद्ध्रियते—"यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत् प्रयन्त्यभिसंविशन्ति। तद् विजिज्ञासस्व। तद् ब्रह्मेति।"

उल्लिखितस्य ब्रह्मणो लक्षणस्य व्याख्यानाय किञ्चित्प्रस्तुतानुसन्धानमत्रानुमन्तव्यमेव पाठकमहाभागैः। तैत्तिरीयकोपनिषदो यस्माद् वाक्याद् अयमंशः समुद्धृतः, स हि खल्वंशो भविष्यद्विज्ञानस्य, नराणाम् उत्कर्षचिन्ताया मार्गस्य वा प्रकृष्टनिदर्शनत्वेनाऽऽधुनिकैर्वैदान्तिकैरुपन्यस्यते।

"भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तस्मा एतत् प्रोवाच। अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति। तं होवाच। यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत् प्रयन्त्यभिसंविशन्ति। तद् विजिज्ञासस्व। तद् ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा अन्नं ब्रह्मेति व्यजानात्। अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्यभिसंविशन्तीति।" चार्लेस-डार्विन्-महोदयमतस्य फलत्वेन यो हि नामात्मवादः साम्प्रतं प्रकाशतां गतः, स एव हि मतवादस्तैत्तिरीयकोपनिषदो वचनेन सूच्यते। ... स्वनेन सिद्धान्तेन नैव सन्तोषं लेभे। "स तपस्तप्त्वा प्राणो ब्रह्मेति व्यजानात्।" "प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते" इत्यादेर्दर्शनात्। एतेन ...त्मवादः सूचितः। पुनरपि तपस्तप्त्वा

पूर्वमतमवधूय भृगुर्व्यजानाद् मनो ब्रह्मेति। "मनस्" शब्दोऽत्र "माइण्ड्" पदेन मयाऽनूदितः। सर्वेषामिन्द्रियाणां श्रेष्ठं हि मनः, यतः सर्वाणि ज्ञानानि तत्रैव सञ्चितानि भवन्ति तस्मादेव निर्गच्छन्ति च सर्व एव भावाः। न च मनो नराणामात्मा विचारणा...केवलं। अनुभवपरम्परा हीदं विश्वमिति खलु भृगोर्मतस्य निष्कर्षः। भृगोर्नयोऽयम् आध्यात्मिकवा...स्य प्रकारविशेषः संवेदनमात्रवाद एव। परमत्रापि नाभूद् विरतो भृगुः। विपश्चि...यथान्तरं समधिगच्छता तेन मनसोऽपि महत्तरं किञ्चनाऽऽस्ते वस्त्वित्यबोधि। विज्ञानमेव तद्वस्तु। विज्ञानेनैव जगदिदं यथायथं चलति। वक्ष्यमाणं वचनं मन्ये ...गोऽऽधर्मसिद्धान्तात्मकम्, "स तपोऽतप्यत। स तपस्तप्त्वा आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति।" कस्तावदस्याऽऽनन्दशब्दस्याऽऽशयः। स्पष्टतयाऽस्याऽऽनन्दपदस्य व्याख्यानं नैव सम्भवति, कालाकाशकार्यकारणभावातिरिक्तेन मानुषबुद्ध्या दुर्विज्ञेयेन रहस्येन तस्य संयोगसत्त्वात्। भारतीय एवात्र ब्रवीतु। "उपनिषदो हि ...[illegible]" इत्यस्माभिः स्मरणीयमेवैतत्। प्रेमानुरागकर्म...कथा...मयस्य जगतो दृष्ट्याऽस्माभिर्नैव तस्याऽऽनन्दस्य व्याख्या कर्तव्या। पूर्णता सममता वाऽत्राऽऽनन्दपदेन व्यज्यते।...आनन्दाधिगमा...[illegible]...पः सागरः पूर्णोऽगाधस्तट...नः स्थिरः ...द्भुतमेनापि तरङ्गभङ्गेण वर्जितश्च जायते। शुद्धं सत्त्वं तद् ...असत्यनाशत्वेन वा क...श्चिदपि न प...श्यत। अ...नतायां अविद्याया वा क्षीणाऽपि छाया नहि तस्मि...ज्ञानरूपे ब्रह्मणि जा...निपतति। वासनाजन्याऽस्थिरता स्मृतिर्वा पूर्णानन्दस्य तस्याऽऽनन्दं विहन्तुं कथमपि नालम्। सच्चिदानन्दस्वरूपं हि ब्रह्म। आनन्द...स्याऽऽशयमा...चैतावदय क्रमः। एवं नीरवतावि...ताशयं तत्

एवं ...यैवाऽस्माभिर्वाङ्मयेन प्रकाशयितुं यत्यत इति मे प्रतिभाति। उपनिषदामृषिरादर्शमवाप्तुं नैवाऽऽश्रेतवान् आन्वीक्षिकीं चिन्ताम्। कठोरेण तपसा समुच्छ्रिततरश्चिन्तास्तरस्तेन श्रीयते। एवं क्रमेणोच्च-तमं स्थानं संप्राप्य बुध्यते तेन परमात्मनो रहस्यम्। परमात्मरहस्ये लब्धप्रवेशेन तेनाऽऽसाद्यते काचिद् गभीरा चिरन्तनी नीरवता। अनन्तालोकस्यान्धकारेण प्रतिहतं भवति तस्य चक्षुः। विस्मयेनाऽऽ-नन्देन च स विवशो भवति। दुरधिगमः खल्ववाङ्मनसगोचरः स परमेश्वर इत्येव केवलं स तदा ब्रवीति।

वेदान्तव्याख्यायामन्तरार्थं विहाय तेषां तत्त्वं जिज्ञासुर्जनो वैदान्तिकै-र्धृतमर्थमेव गृह्णीयात्। यैस्तावन्महात्मभिर्जगतः समीपे समुपहृतानि तेषां चिन्ताप्रसूनानि, तेषु प्राच्य-प्रतीच्ययोः शिक्षा-संस्कृत्यो-राधारः स्वर्गतोऽध्यापको विनयेन्द्रनाथसेनः, भारतीय-त्यागिना-मादर्शभूतः परमभक्तः श्रीरामकृष्णपरमहंसः, "महत्तमं दुराराध्यञ्च तस्य मनः" इति यमधिकृत्य जीवितवृत्तकारेण लिखितम्, वङ्गानां कविशिरोमणिः स डक्टर्-रवीन्द्रनाथठाकुरश्चेत्येते त्रयस्तावज्जनाः प्रकारतोऽत्यर्थमेव विभिन्नाः।

१

अध्यापको विनयेन्द्रनाथसेनः

उग्रतपसां धीमतामृषीणां चरमोत्कर्षलाभसमये यत् तेषाम् आत्मनि समुदितमभूत्, तदेव श्रुतिरिति हिन्दूनां श्रुतिविषयकमनु-मानमभ्युपगम्यत एवाध्यापकेन सेनेन। ब्रह्मात्मकं हीदं जगदथवा परिदृश्यमानोऽयं जगद् ब्रह्मण आकारविशेष एवेति शङ्करेण सम-मभ्युपगच्छता तेन वेदस्यापौरुषेयत्वमपि स्वीक्रियत एव। नावाप्यत वेद् विश्वात्मना कालरूपे वापद्यदे ...अन्वयी...ऽयं स्वकीयः

परिच्छिन्नः, नाभाव्यम्बे- पेशोन्मेषविशेषात्मकमिदं विम्बम्, तदा नाऽजनिष्यत कदापि नराणां चेतसि ब्रह्मविषयिणीयं चिन्ता। क्लेश-संकुले कालुष्यपूर्णेऽस्मिन् जडजगद्रूपे कारागारे स्थितो नरस्तदा कथमपि नास्मरिष्य- परमात्मान-।

ब्रह्मैव परमं सत्यमिति शङ्करस्याद्वैतवादमभ्युपगत्य, ब्रह्मण आनन्त्यस्य केवल- स्य च स्वीकरणानन्तरं कथं तदतिरिक्तविषयस्य कल्पनं सम्भवतीति, कथं वा सच्चिदानन्दात्मकाद् ब्रह्मणः समुद्गतमिदं विम्बं दुःखैः पापैश्च परामृश्यत इति च प्रश्नद्वयं तेन समालोचितम्। शङ्करस्य मायावादाल्लब्धं तेनास्य प्रश्नस्योत्तरम्। यथा नाम शक्त्या अनन्तो मायावी कालाक।।लपाथां व्यूत्याम् अनन्तस्य केवलस्य च स्वस्य तत्त्वस्य वपनं कृतवान्, सैव तावन्मायेति। स- प्रदर्शितं मायाया वै।।श्चद्वयमवाधिकृत्य व्याख्याता तेन माया। नाम्नाकारेण चाऽऽत्मप्रकाशनम् तयोर्वैशिष्ट्ययोरेकम्, सत्तयाऽसत्तया वाऽनिर्धारणीयत्वं तावद् द्वितीयम्।

एतयोर्वै।।ष्ट्ययोः प्रथमेन स- तूपाद्यत एव किञ्चनासौकर्यम्। यन्नाम्नाकारेण वाऽस्माकमिन्द्रियग्रामस्य विषयीभूतं न भवति, वित-तेऽस्मिन् विम्बे तथाविधं किञ्चिदपि वस्त्वस्माभिर्नैव ज्ञातुं शक्यते। द्वितीयस्य वैशिष्ट्यस्य सुनिश्चितार्थं आपातदृष्ट्या न सुगमः। सत्तयाऽसत्तया वाऽनिर्धारणीयं किञ्चन वस्त्विति प्रोक्ते किं ताव-दस्माभिर्बुध्यते ?

उक्तञ्चाध्यापकेन सेनेन—सर्वेषामेव आगतिकज्ञानानामिदमेव तावद् वैशिष्ट्यं यत् तानि स्वसत्तायाः सत्यत्वप्रकाशने चेष्टमानानाम् अपि तस्मिन् कर्मणयसमर्थानां वस्तूनां कल्पनाया अधिरोपणाम् एव संश्रयन्त इति। अतः स- तरस्य वस्तुनो बोधेन समं प्रथमा कल्पना वर्जनीया। ततोऽपरस्याः कल्पनायाः सम्भावनायां जातायां प्रथमेव द्वितीयाऽपि वर्जनीया। एवं क्रमेणैकमधिरोपणमधिरोपणान्तराय

कल्पिष्यते, वस्तुनः सत्यसत्ताया लाभविरहात्। यदि प्रकाशतां गतानां वस्तूनां स्वरूपं बोद्धुम् अस्माभिर्यत्येत तदाऽस्य वाक्यस्याऽऽशयः सम्यक् स्फुटतां गाहेत। अपिनाम वस्तूनामाकृतिः संज्ञा वा स्थिरेति प्रश्नोऽस्माभिरेवात्र वयं प्रष्टव्याः।

यानि तावत् पार्थिवानि वस्तून्यस्माभिः परितः समवलोक्यन्ते, तानि तावच्चेतनानि जडानि च; विद्यन्ते पुनस्तेषां यथोपयुक्तानि नामधेयानि। जडविज्ञानस्य केभ्यश्चिद् अर्वाचीनेभ्य आविष्कारेभ्यः पूर्वम्—इमा आकृतयः संज्ञाश्चास्तित्व[illegible]सम्पन्नाः—इति वचनम् न च नाऽऽसीदग्राह्यम्। तथाहि—यैर्यैः पदार्थैः समभवंस्ते त आकृतिसंज्ञादयः सम्बद्धास्ते तु सत्या एव। घनाचेतन-जागतिकवस्तूनां सूक्ष्मतमोऽप्यंशोऽतिसूक्ष्मं किञ्चन विश्वमिव प्रबलेन वेगेन भ्रमति। एतस्मादाविष्कारा[illegible]निकानां वैज्ञानिक-[illegible]कानां पुस्तकविरचनस्यावसरो जातः। आलबार्ट्-आइन्ष्टिन्-[illegible] पदार्थविज्ञानस्य मनोहारि-व्याख्यानावसरे वक्ष्यमाणो विषयो डक्टर्-सि-जडेमानेन व्याख्यातः। तद् यथा—"जगत्यस्मिन् नास्ति कश्चित् पदार्थः। केवला वैद्युतिकी काचन [illegible]क्रियैवात्र विद्यते। नरैरनादिकालं यावज्जडत्वेन गृहीतस्य विषयस्य तथात्वबोधजननरूपा भ्रमात्मिका बुद्धिः पारिपार्श्विकावस्थायाः प्रतिक्रियया प्रभावितया तयैव शक्त्या समुत्पाद्यते।" अस्याभिनवज्ञानस्य विषये तेन या नाम टिप्पनी कृता, सा तु हृदयग्राहिण्येव। "चित्रम् आधुनिकेन पदार्थविज्ञानेन अद्भुत आध्यात्मिको वा भाव एव साम्प्रतं श्रीयते।" यानि तावद् जागतिकानि वस्तूनि सत्यतयैवास्माभिर्विज्ञातान्यासन् तान्येव साम्प्रतिककाललब्धज्ञानदृष्ट्या मिथ्यात्वेनैव प्रतीतानि स्युः। आपेक्षिकं सत्यमेव परमसत्यत्वेनास्माभिर्गृहीत इति परमं सत्यं कालाका[illegible]तिरिक्तम् इति बोद्धिञ्चितं विषयं चिन्तयद्भिरेवास्माभिरनुभूयते।

इंग्लण्डदेशे स्थित्वा नभोमण्डले नक्षत्राणि विलोकयतो मे प्रतिभाति, ऊर्द्ध्व एव मे दृष्टिर्निबद्धेति। तस्मिन्नेव समये मद्दृष्ट्याश्रितदिग्विभाग एव दृष्टिं निक्षिपन् निउजिलाण्ड देशे स्थितो जन आत्मानमधोमुखत्वेनावस्थितं मन्यते। [illegible]? अहं निउजिलाण्डदेशीयो वा? मद्विषये "ऊर्द्ध्वमुखोऽयम्" इति पदं सत्यम्, निउजिलाण्डदेशीयस्य विषये तु तद् विपरीतमेव। अस्माकमनुभूतेः शीतमुष्णमित्यादि नामास्माभिः परिकल्प्यते, अन्यस्त्वेतेषां नाम्नां यथार्थं सत्यत्वम्। उष्णताऽभाव एव किं न शैत्यम्? कुत्र चैतयोः परस्परविभेदिनी रेखा? किं [illegible]तेऽस्माभिस्तापमानयन्त्रे निवेशयितुं तापस्यास्तित्वानस्तित्व[illegible], किञ्चन चिह्नम्? एतद्विषये म[illegible]प्रदे[illegible]सिनः कि[illegible]मण्डलवासिभिरैकमत्यं वहेयुः?

न केवलमेतेन मतेन पदार्थस्य स्वरूपविषयेऽस्माभिर्धृतपूर्वस्य ज्ञानस्य विपर्यासः साधितः, परं यद्यापि परमसत्यतयाऽस्माभिर्गृह्यते, तस्यापि परिवर्तोऽनेन प्रकल्पितः। अचलमचलं मत्वा यमेवास्माभिर्गृहमूलत्वेन समासाद्य विनिर्मितो विशालः सौधः, स साम्प्रतं प्रसरणशीलं वालुकाकणत्वं श्रयति। द्रष्टृज्ञानस्य दृष्टपदार्थानाञ्च यद्धि नाम निरूपितं स्वरूपमध्यापकेन आइन्ष्टिन्-महोदयेन, तेन निउटन्प्रवर्तित-माध्याकर्षणनियम—इउक्लिड्विरचित-[illegible] यावद् वि[illegible]नजगति परमसत्यतया गृहीतान्यपि मतानि साम्प्रतम् आपेक्षिकसत्यतया विशिष्टैव वैज्ञानिकै[illegible]क्ष्यन्ते। जडवस्तूनां विषये सानुगेन [illegible]दयेन यद्धि मतं प्रचारितम्, तत् तु भारतीयानां [illegible]णामाध्यात्मिकमतरत्नमेव साम्य समुद्वहति।

वैज्ञानिकं जगद् विहाय साम्प्रतं नैतिकं जगद् विशामः। तत्र किमस्माभिः सदस[illegible]विषयाणां मध्ये परस्परविभे[illegible]द्योतिनी शक्यतेऽङ्कितुं काचिद् रेखा। अभ्रान्तेन निर्पक्ष[illegible]पक्ष[illegible]ण विवेकेन तद्

कर्तुं पार्यते। "कस्य स विवेकः" इति तु प्रष्टव्यमथवा । पक्षीहृदयस्य युगपत् पार्श्वपीडनं न सहते खगप्रतिपालकानां विवेकः। महम्मदस्य भक्तानामनुगानामपि विवेकः किं तादृश एव? विप्रतिपत्तिस्त्वत्राऽस्त्येव एव। सामाजिकी रीतिरियं न तु नैतिकी रीतिः। गुणदोषयोः किं तावत् तदा स्याल्लिङ्गम्? अपिनामापरस्य प्राणघातनं कश्चिद् गुणविशेषः? अपरप्राणघातनं नैव निन्द्यते मानवसमाजैः, सुसभ्यानामपि जातीनां नीतिशास्त्रेऽपराधिनां प्राणदण्डविधिदर्शनात्। यदि मूलतो नरघातनं न दोषाय कल्पते, तदाऽवस्थाविशेषेषु तदनुष्ठान एव विद्यते मतभेद इति वक्तुं शक्यते। वङ्गीयवैप्लविकदलस्य केचन जना राजपुरुषाणाम् उपांशुहननं कृत्वाऽपि स्वात्मना दोषैरपरामृष्टान् मत्वा मे विस्मयमुदपादयन्, तत् तु मया पूर्वमेव विलिखितम्। राजनीतिकहत्यासु नास्ति दोष इति मतं मानवजातेर्बहुलेनैव भागेन साम्प्रतमनुमन्यते। अर्वाचीने काले भारतेऽपि आयर्लण्डदेशेऽन्येष्वपि च देशेषु दृष्टमेवास्माभिरस्य शोचनीयः परिणामः। एतस्मादेतदेवाऽऽयाति, नास्ति खल्वस्मिन् जगति कश्चिद् गुणदोषनियामकः सार्वलौकिको विधिर्येनायं गुणोऽयं दोष इति सनिश्चयं वक्तुं शक्यम्। "कालकर्मनियन्त्रितं मायामयं खल्विदं जगद्" इति मायावादप्रोक्तं मतमत्रानुरूपं सरलतयैव प्रतिभाति। वयर्यत एतेन कश्चिद् ... यथाविद्यैव प्रभवति; स्वीकरोति च पुनरेतेनैव ज्ञानस्य सुतिवादः। एवं रीत्या वयमेतद् वर्णयामः। अविद्याया आवरणेन सत्यस्य स्वरूपमस्माकं सविधेऽविज्ञातं तिष्ठति। स्फूर्त्या शनैः शनैरपसार्यमाणे तस्मिन्नावरणे स्पष्टात् स्पष्टतरं भवति तत् सत्यस्य स्वरूपम्। अभ्युपगम्यते चेदस्माभिरिदं मतम्, तदा शुद्धब्रह्म साकारेश्वरयोरन्तरा स्थितो वैदान्तिकैर्यो हि नाम भेदः प्रदर्शितस्तस्य विचारश्चाकृताऽनायासेनैव सुगमा स्यात्। मानवजातेर्विं-

नीतावस्थातः समारभ्याद्य यावदुन्नततायाः सभ्यताया अवस्था-विशेषान् ...वन्त ईश्वरविषयकाः परिवर्तमाना बोधा एतेनैव बोधगम्या भवन्ति।

अध्यापकेन विनयेन्द्रनाथसेनेन वेदान्तोक्ताया मायाया अयमेव तावन्मन्ये गृहीत आशयः। कथं सच्चिदानन्दाद् ब्रह्मणः पाप-क्लेशादिसंकुलं जगदिदं प्रवर्तत इति द्वितीयस्य मयोल्लिखितस्य प्रश्नस्या...त्तरम् एतया व्याख्ययैव सम्पाद्यते। यदि दुःखं केवलं दुःखम्, सुखं केवलं सुखमेव जायेयाताम्, तदैव खलु सुखदुःखयोरसमानतया विभजनाद् ईश्वरं पक्षपातित्वदोषः श्रयेत। परं दुःखस्य मूले प्रच्छन्नरूपे...ऽवतिष्ठेत वेदानन्दस्योत्सः, सुखमपि चेद्यद्यपि दुःखमूलं स्यात्, घोरतमेऽपि पापे विद्येत यदि नाम न्याय्यतायाः सम्भावना, तदा कथमीश्वरस्य पक्षपातित्वं प्रतिपादयि...ं शक्येत। उन्नतं वाऽवनतं वा क्षुद्रं वा महद्वा सर्वमेव वस्त्वनन्तस्य सान्तं प्रतिबिम्बम्।

किं तावदत्र तेन वक्तुमिष्यते ? मायायाः स्वरूपे...सङ्गतं शङ्कर-प्रोक्तं जीवात्ममुक्तिवादं प्रत्याचक्षाणेन तेन, जगदिदं सर्वथैव मिथ्येति स्वीकारे श...स्यानन्यशरणत्वमेव हेतुरिति प्रत्यपादि। जीवात्म-...क्तिवादातिरिक्तेषु सर्वेष्वेव विषयेष्वयं ताव...वस्त. प्रचारितमतस्य विरुद्ध एव। नैव शक्यन्तेऽस्माभिर्विज्ञातुं तस्याऽऽशाः श्रद्धा वा, परं तासां विषये तेन याः सूचनाः कृतास्ताभिः शनैः शनैः परमस्य सत्यस्य समवाप्तेराशैव सूच्यते। येशकानावाप्त्याः क्रमोन्नत्या सर्वं दुःखक्लेशाद्याकारेण स्थिता विषयाः क्रमेण स्वरूपतां प्राप्नुवन्ति, चरमे च सर्वे ते अपिजनमात...नु...तानन्तस... जनितानन्दात्मना परमेश्वरे... संमिलन्ते।

वेदान्तस्यासीत् तस्य सविधे ...चन्ता... मनसो निर्विशङ्क-विलासावधिकः, सूक्ष्मतमे आध्यात्मिके जगति बुद्धेर्निर्भीकप्रचारा-

व्यतिरिक्तः, ... धर्मस्य सारभूतः, महत्तत्त्वावाप्तये आत्मनो यस्याऽऽग्रहस्य निराकर्त्तुं बुद्ध्या नैव ... तस्याऽऽग्रहस्य परिपूरणे समर्थो विषयविशेष इति त्वसम्पूर्णरूपेणाधिगत्यापि तस्योपाशाः अद्वाप्यैकेनासन्दिग्धं शक्यत एव वक्तुम्। युक्तिवादे गौरवं समुद्वहतोऽपि तस्य तस्माद्धिकतरे ... ऽसमाख्ये विषय एव समादराधिक्यमवर्तत। अभाणि च तेन "भक्ति-विस्मयौ बुद्धेरादर्शाविति यदुपनिषद्भिरुपदिश्यते, तत् तु सत्यतयैवाहं मन्ये" इति। न च ज्ञानस्य व्ययेन तद्विरोधितया वा भक्ति-विस्मयौ तस्याऽऽस्तामभीष्टौ, परं विज्ञानमेव विश्वस्येश्वर इत्यादिबोधरूपं चरमोत्कर्षं भजमानेऽपि ज्ञाने किञ्चिद् रहस्यमवतिष्ठेतैव। तस्य र...स्यस्यान्तर्विलोकयन्ती बुद्धिरपि तत्रैव निरता भवेत्। न च तर्कात्मकम्, परमनन्तोपलम्भो हि बुद्धेः श्रेष्ठं कार्यम्। तर्कसाध्यं वस्तु व्याकर्तुं ज्ञातुञ्चास्माभिः शक्यते, परमनन्तस्य ...विषये स...तिरिक्तो नास्त्यपरो मार्गः। न च प्राचीना ऋषय आध्यात्मिकप्रणिधानमधिकृत्य वक्तुं वितर्कयितुं वा क्षमा आसन् इति ते पूज्यन्ते, परं पवित्रेण हृदयेन भक्तिपूर्णेनाऽऽत्मना चावाङ्मनसगोचरस्य सङ्गं प्राप्य ते परमानन्दमन्वभवन्निति।

ऊनविं ।।ल्लासः

वेदान्तस्य तत्वम् (धारावाहिकम्)

रामकृष्णपरमहंसः

हुगलीनद्यास्तीरमाश्रित्य कलिकातात उत्तराभिमुखं गच्छता अनेन नद्यास्तीरे समवलोक्यन्त एकमेवाऽऽदर्शमाश्रित्य निर्मितानि विस्मयोद्दीपकानि देवायतनानि। शोभते तत्र नराणां ।।नसौकर्याय नदीजलं यावद् गता विस्तृता सोपानपंक्तिः। धू ।प्रस्तरनिर्मिताया अस्या देवायतनश्रेण्याः स्थापत्येऽद्यापि दृश्यमानं व ।।कुटीरप्रमा- मानतपटलत्वं सुव्यक्तमेव विराजते। तीर्थस्य मूर्धन्यवस्थिते समुन्नते प्रथमे एकपंक्तिगतेषु द्वादशसंख्याकेषु तेषु वर्तन्ते समा- काराः ।प्रस्तरनिर्मिताः ।ङ्गव्यञ्जनसमा योनिलिङ्गात्मिकाः शिवस्य प्रतिमूर्तयः। तेषां देवायतनानां पृष्ठतः स्थितस्य चत्वरस्य मध्ये भागे चकास्ति काल्यधिष्ठितं प्रधानं मन्दिरम्। विस्मापकं खलु मन्दिरस्याऽऽयतनम्। न च न वर्ततेऽस्मिन् विचित्राभिश्चूडाभि- र्विभूषिते मन्दिरे ।टीरप्रमानतपटलत्वम्।

कलिकातातः कतिपयक्रोशार्धदूरे विराजमान ।, मन्दिरोद्यान- स्थितैर्दूरादपि दर्शनीयैः समुच्छ्रितैः पिचुलपादपैरुपलक्षितं दक्षिणे- श्वरमन्दिरं पोतयोगेन नदीवक्षसि प्लवमानेन अनेनानायासेनैव विज्ञायते। पञ्चपञ्चाशदधिकाष्टादशशततमे ।ब्दे धर्मपरायणया "।।ासमणि" समाख्यया कयाचिद् व ।श्यया कुला ।या

प्रतिष्ठापितमि[illegible] मन्दिरम्। अत्रैव च मन्दिरे दक्षिणेश्वरस्य सन्न्यासी स्वर्जी[illegible] तस्य बहुलं भागम् अनैषीत्। इतिहासे श्रीराम-[illegible]रमहस इति नाम्ना प्रथितो गदाधर[illegible]पाध्यायः स्वामि-विवेकान[illegible]नाम्ना परि[illegible]तस्त[illegible]ष्यो नरेन्द्रनाथदत्तश्च मनसि यथा प्रभावं वितेनतुः, अर्वाचीने काले न केनापि पारितं तथाऽ-नुष्ठातुम्। पाश्चात्यभावानां [illegible] कृते समुत्सुकताया-श्चरमपरिणत्या स[illegible]पादिते कालविशेषे प्राचीनानां प्राच्यादर्शानां [illegible]रक्षणाय, अ[illegible]मन्यताया युगे त्यागमन्त्रप्रचाराय, वैज्ञानिकैराविष्कारैर्जटिलीकृते काले [illegible] खलु जनौ।

आ[illegible]षा[illegible]मासस्य कस्मिंश्चिद् दिवसे सूर्यालोकोद्भासिते मन्दिरो-द्याने ते मह्यं स्वर्गतस्य महात्मनः संस्पर्शपूतानि नानाविधानि द्रव्याणि दर्शयामा[illegible]ः। चत्वरस्य वायव्यां दिशि समवस्थिते कस्मिंश्चित् कक्षे व्ययितस्तेन जी[illegible]तस्य बहुलो भागः। [illegible]-त्तरे भागे रामकृ[illegible] रोपिता वट-निम्ब-विल्व-पिप्पलामलकी-समाख्याः पञ्च पादपा मे दृष्टिं समाचकृषुः। अत्रानैषीत् सन्न्यासी ध्यानेन धर्म्यक्रियाभिश्चानल्पः कालः। चत्वरस्य मध्यभागे विल-सतोर्मन्दिरयोरेकमध्यासितमासीद् दिव्यप्रेमावताराभ्यां राधाकृष्णा-भ्याम्, परञ्च विश्वजनन्या काल्या। अनन्तस्य परमेश्वरस्य रूपद्वय-मेतद् रामकृष्णस्याति हि नामाऽऽसीत् प्रियम्।

गुरोरुपदेशजालं तज्जीवित[illegible]च विवक्षुभिस्तदीयैर्भारतीयैः शिष्यैः परिगतो मन्दिरप्रान्ते स्थितोऽहं तेषां स[illegible]त्साहदर्शनेन प्रीतिा[illegible]मेवान्वभवम्। तै[illegible] वृत्तानि श्रृण्वतो मे मनसि स्वत इव विरेजे आत्मसमर्पणेन भक्त्या च [illegible]किरवाप्यत इति मतव्याख्याननिरतस्य शिष्यपा[illegible]तस्य तस्य गुरोश्चित्रम्। प्रत्यक्ष-मिव बभासे तदानीं मत्सविधे तद् हर्म्यम्। तत्कालेऽनायासेनैव सर्वं चिन्तितुमहमासं क्षमः। तत्रैकेन वर्णितम्—"सुशीतले

सन्ध्याकाले अलिन्दे इतस्ततः परिभ्रमन् प्रशान्तः तेषु कमु कमु कुः शिष्यैः संलापाय विरेमे। अवतरति चत्वरस्थलं सन्ध्यान्धकारः मन्दिरेषु प्रज्वलितानां दीपानाम् आलोकैर्भूयस्यैर्दीयमाने धूपगन्धैश्च तद्‌ व्याप्यत। सन्ध्यारात्रिकस्य कांस्यघण्टा शङ्खादीनां निनादो भित्त्वा नीरवतां पवित्राया नद्याः कलकलध्वनिभिदूरमेव प्राधावत्। आविर्भवति च ततो नभोमण्डले भगवति चन्द्रमसि सन्ध्यान्धकारमुक्तं सदेवायतनं तदुद्यानं नक्षत्राकीर्णे गगनतले रमणीयं विरेजे। विलसति तादृशे प्राकृतिकावस्थाविशेषे उपास्यः स सन्न्यासी विश्वजनन्याः पुरतः स्थितः "ब्रह्मन् आत्मन् भगवन्, शरणागतोऽहं शरणागतोऽहम्; ब्रह्मैव शक्तिः शक्तिरेव ब्रह्म" इति स्वजीवितपरिचालकं मन्त्रं सुस्वरं जगौ। ततः क्रमेण समवेतानां शुभ्रवसनोत्तरीयधारिणामेकायनानां व्रतिनश्च शिष्याणां मध्ये स्वासने गुरुस्तैः समं धर्मालोचनं चक्रे।

*   *   *   *

चतुस्त्रिंशदधिकाष्टादशशततमे खृष्टाब्दे फेब्रुयारीमासस्य विंशेऽहनि जातः, आ बाल्याद्‌ धर्म्मजीवितैकशरणो गदाधरचट्टोपाध्यायः पञ्चपञ्चाशदधिकाष्टादशशततमे खृष्टाब्दे प्रतिष्ठितस्य दक्षिणेश्वरमन्दिरस्य प्रतिष्ठापनदिनादेव सहकारिपुरोहितपदं तत्र लेभे। पाण्डित्यभूषणानलंकृतस्यापि तस्य केशवचन्द्रसेन—पण्डित-ईश्वरचन्द्रविद्यासागर—बङ्किमचन्द्रचट्टोपाध्याय—प्रतापचन्द्रमजुमदारप्रमुखाणां विशिष्टानां शिष्टानां नेतृणाञ्च समाकर्षणे आसीदेव महत् सामर्थ्यम्। केशवचन्द्रसेनस्यैकनिष्ठो भक्तश्चरमोक्तो जनः शिक्षितानामपि जनानामुपरि रामकृष्णस्य प्रभावविस्तारनैपुण्यं समवलोक्य विस्मितो व्यामूढश्च जातः। "अस्य स्वामिनोऽस्ति किमपि सादृश्यम्" इति तेन पृष्टम्। "काहं युरोपीयभावापन्नः शिष्टः स्वार्थपरोऽर्थाविश्वासी तथाकथितः शिक्षितो युक्तिवादी, क चासौ

दरिद्रोऽशिक्षितोऽशिष्टोऽर्धपाश्चात्यिको बन्धुहीनो भक्तो हिन्दुः ? येन मया हक्सलेली-फसेट्-ष्टार्लि-मार्टिन्-लावप्रमुखाणां युरोपीय-विदुषां समाकर्णिता कथा, तेन मया कथं नामानेन सह संलापं कुर्वता सुदीर्घः कालो नेतव्यः ?...न केवलं मया परं मत्सदृशै-र्बहुभिरेव तत् समनुष्ठीयते।" यथार्ह-विचारणानन्तरं सिद्धान्तितं तेन "तस्य धर्म एव तत्र कारणम्" इति। परं तस्य धर्म एव तावच्चित्तविभ्रान्तिकरः कश्चिद् विषयः। "हढो वेदान्तिको-ऽपि पूजयति स शिवं कालीं रामं कृष्णञ्च।......पौत्तलिकोऽपि स निराकारस्यानन्तस्य भगवतो ध्याने मग्नः।......हर्षोन्मादस्तस्य धर्मः, सर्वातिशायि ज्ञानं तस्य पूजनम्, अपूर्वयोर्भाव-भक्त्योः पावकेन रात्रिन्दिवं पच्यमानासीत्तस्य समग्रा प्रकृतिः।"

प्रायेण वर्षमेकं मन्दिरेऽवस्थित-"तोतापुरी"सकाशाद् अधीतं तेन वेदान्तशास्त्रम्। भक्तिमार्गेण न पुनर्ज्ञानमार्गेण चेष्टितं तेन विश्वस्य रहस्यं समुद्घाटयितुम्। प्रकृत्या स चाऽऽसीद् गहनो न तु दार्शनिकः। तस्य धर्ममतं जीवितवृत्तञ्च स्मारयतोऽस्मान् प्रेममयं चैतन्यम्। नदीयाप्रदेशस्य साधुरिव सोऽपि नृत्यगीतादिभिर्भावं प्रकाशयामास। तत्प्रियशिष्यैर्गीतानि देवतास्तोत्राणि शृण्वत-स्तस्य नयनाभ्यां सलिलं प्रावहदसकृच्च स मुमोह। बाल्यात् प्रभृत्येवेयं मूर्च्छा तस्याऽऽसीत् सहचरी। एकादशे वर्षे जातस्तस्या-ऽऽद्यो मोहः। क्षेत्रमतिक्रामन् स दृष्ट्वा काञ्चिद् दिव्यां मायां नष्ट-चेतनोऽभूदिति तेनैव वर्णितम्। सहजोपलब्धमासीत् तस्य भगवज्ज्ञानम्, अतस्तस्य नैव समजन्यध्ययनस्य प्रयोजनम्। कदाचित् तच्छिष्यसम्प्रदायमध्ये वेदपठनविषये आलोचना संजाता। तदानीं तेनोक्तम्—"अपि ज्ञायते युष्माभिः किं मयाऽत्र विषये चिन्त्यत इति ? वेदा ब्रह्मैव प्रतिपादयन्ति। ब्रह्मणि चास्मभिर्निर्धारिते जाते किं तेषां पठनेन ?" सन्न्यासिनस्तस्य क्रमप्रचीयमानं यशः श्रुत्वा

पाण्डित्याभिमानी तात्कालिकानां शिक्षितमध्यवित्तजनानामादर्शः [illegible]तः कश्चन तरुणः कदाचित् तमभ्यगात्। अपण्डितस्य तस्य सन्न्यासिनो नाऽऽसीत् प्रयोजनं पुस्तकैरिति श्रुत्वा स समधिकं विस्मय[illegible], प्रतिमापूजनमधिकृत्य तेन समं [illegible]लोचितवांश्च। रामकृष्णेन खण्डितास्तस्य सर्वा एव पण्डितोचिता युक्तयः। "त्वत्तो महतस्त्वयाऽनासादनीयस्य च विषयस्य कृते कथं त्वयात्मा क्लिश्यते?—इत्यसावपृच्छत्। किं न निवसति विश्वेश्वरो मानवदेहमन्दिरे? किं न हि स जानाति नराणां मनोगतं भावम्। अत ईश्वरं ज्ञातुं मानयितुञ्च यतस्व। ईश्वरानुरागी भव। एतदेव ते प्रथमं कर्म।"

आपातविरुद्धा- विषयान् नैव स गणयाञ्चक्रे। शुद्धं केवलं पूर्णं ब्रह्म दार्शनिकानामीश्वरः। परं नह्येतेन दिव्यप्रेममयकृष्णरूपेण विश्वजननीविश्वधात्रीकालीस्वरूपेणेतरैर्वा विभिन्नै रूपैस्तस्याऽऽत्मप्रकाशनं व्याहतं भवति। ईश्वरज्ञाने जात एतादृशानां विषयाणां व्यामोहकत्वमपि विरमति। "महाभाग, किं द्रष्टुं शक्यः स ईश्वर?"—इत्यपृच्छत् स पण्डितः। "निश्चितमेवे"त्यभूदुत्तरम्। "आन्तरिके[illegible]ऽऽग्रहेण तम् आक्रन्द, नूनं तं द्रक्ष्यसि।" हिन्दुभिः "समाधि"पदेन [illegible]यमानमीश्वरज्ञानजनितसम्मोहावस्थाविशेषं मुहुर्मुहुरेव स प्राप्तवान् इति [illegible] वचनाद् एवास्माभिर्विज्ञायते। इमं समाधिविषयमवलम्ब्यैवाध्यापकेन वि[illegible]सेनेनोक्तम्—"अनन्तसंयोगाद् ऋषयो [illegible] ब्रह्मानन्दं भेजिरे" इति तु मया प्रागेवाभिहितम्।

भारतीयचिन्तानुगुणोऽयं विश्वदेवतावा[illegible]स्तस्य सहजोपलब्ध इवाऽऽसीत्। बाल्ये देवपूजार्थं प्रत्यहं स [illegible]। एकदा विल्वपत्रस[illegible]यनसमय तद्वृक्षस्य त्वचः कश्चि[illegible]शविशेष[illegible] छिन्नः। स्वान्तर्गतस्येव सर्वान्तर्गतस्य पर-

मात्मनः क्लेशो मया समुत्पादित इति स तदा कुण्ठितोऽभवत्। ईश्वरस्य [illegible]भावस्तस्य मनसि तथासीद् गाढं निखातः, यथा स तद्दिनात् प्रभृति नैव कदापि वृन्तान् पत्राण्यचैषीत्। मा[illegible]पबुद्धयास्थापितान्य[illegible]कर्माणि तेन दूरीकृतानि। युक्त्या निरूपयि[illegible] मर्वाण्या विषयाः श्रद्धयैव तेन व्याख्याताः। अतो विशुद्ध-तर्क[illegible]श्रद्धया तत्कृतानि व्याख्यानानि कदाचिदप्र[illegible]नकान्या-सन्। ईश्वरस्याभिव्यञ्जकानि चेत् सर्वाण्येव वस्तूनि, तदा कथं तेषु कानिचि[illegible] क्षतिकारकाणीत्येवात्र विचारणीयो विषयः। कस्यचि-दापततो हस्तिनो मार्गं त्यक्तुमादिष्टस्यापि तत्रैव स्थितस्य तरुणा-[illegible] कथा, विषयमिममधिकृत्य तेनावतारिता। आधोरणो-[illegible] क्रोशः कृतः, परं हस्त्यपीश्वरस्य प्रकाशविशेष इति मनसि विचिन्त्याविचलितो युवा हस्तिनं तमस्तौषीत्। समुद्धृतो लब्ध-संज्ञश्च स स्वस्यापलायनका[illegible] व्याख्यातवान् गुरुणा वक्ष्यमाणै-रुत्तरैस्तिरस्कृतश्च। "सत्यं सर्वेष्वेव [illegible]षयेष्वीश्वर आत्मानं प्रका-शयति। अतो हस्तिनि स्थित ईश्वरः किं नाऽऽसीदाधोरणेऽपि? तत् कथं त्वयाधोरणस्य वचसि मनो न दत्तम्?"

अगभीरयैव विचारणया प्रत्यादिष्टस्तेन परमेश्वरस्य पक्ष-पातित्वविषयकः प्रश्नः। "अपि नामासामान्य[illegible]रुपलक्षिताः सन्तो वयं भुवनतले जायामह इति मया वि[illegible]वसनीयमेवे"त्य-पृच्छत् पण्डितो विद्यासागरः। "किं केषुचिदेव जनेषु सप[illegible]पातः परमेश्वरः?" "परमेश्वरस्य कर्माणि मानव-बुद्ध्या दुरवगाहान्ये-वेति त्वया याथातथ्येनैव ग्रहणीयं जागतिकं वृत्तमिति"—गुरो रामकृष्णस्यामूदुत्तरम्।

यथाक्रमेणेशप्रेरणायां युक्तिवादे च तेन यद्धि नाम गौरवं दत्तम्, तत्तु कस्मिंश्चि[illegible] पराह्णे मन्दिरसंलग्ने भूमिभागे बहूनां शिष्याणां पुरतः सञ्जातेनैव वृत्तेन स्पष्टीभवति। अतीव्याशि[illegible]ङ्ग कश्चित्

स्वानुगं सोऽपृच्छत्—"अन्यस्यां, ाभाषायां ,किंवान्नात्मकः कश्चन ग्रन्थः" इति? बहव एवैतद्विषयका निबन्धा वर्तन्त आङ्गलभाषायामिति स स्वानुगेनाभूद् विज्ञापितः। निदर्शन-प्रदर्शनाय समुद्धृतस्तेन सामान्यसिद्धान्तेभ्यो विशेषसिद्धान्तसमु-न्नयनात्मकस्तर्कशास्त्रस्यांशविशेषः। एतेषु व्याख्यान ौव वृत्त-स्तेनाभिनिवेशविशेष इति कृत्वा अरण्येरुदितानीव तान्यभवन्। दृशं तस्मिन् विनिहितदृष्टिः स तस्य भावी गुरुर्विस्मितो नीरवश्च बभूव। त ्चनमाश्रित्यैव तस्य दृश्यस्य वर्णनं मयाऽत्र विनि-वेश्यते। "स्थाणुरिवाचलं स्थितो गुरुः। न पस्पन्दे तदीयं नयन-युगलम्। क्लेशानुपलब्धेः तदा तस्मिन् उच्छ्वसितः।...... ओष्ठलग्नेन हास्येन द्योतितस्तदा भगवतो दर्शनजन्यः परमानन्दा-धिगमः। स्वप्रभाऽवधीरितकोटीचन्द्रस्याप्रतिरूपरूपस्य कस्यचिद् वस्तुनो नूनं स तदाऽन्वभवद् दर्शनसुखम्। अपिनामैतत् तस्य भगवद्दर्शनम्? तथा सति अपूर्वा हि तस्य श्रद्धाया भक्तेः संयमस्य तपसश्च प्रगाढता, यया मरणशीलस्य मानुषस्यापि तस्य प्रत्यक्षतां नीतः परमेश्वरः।" चित्ते निवेश्य समाधेरिदमद्भुतं चित्रम् चचाल स लेखकः स्वकं मन्दिरम्। पदमिथाय तन्मनसि तदा दिव्य-प्रेमजनितः परमानन्दः। "तस्य प्रेमरसे गाढमवगा स्व रे मदीयं मनः, परमानन्दसंसर्गाद् मत्तताम् उपेहि रे मम मानस।"—इत्यादीनि वाक्यानि प्रतिस्वनितरूपेण विरेजिरे तदीये चेतसि।

अद्वैतवादिभिरनुष्ठिते विश्वस्य व्याख्याने नैवोद्वहद् रामकृष्णा वैमत्यम्। स्वप्रकृतिवशगेनैव तेन साकारोपासनायां प्रदर्शितं समधिकं गौरवम्। पूर्णसमाधावेव ज्ञेयं खलु शङ्करस्य परमं ब्रह्म। स चैकदा सम्मोहावस्थातः समवाप्याथ चैतन्यम्,—"परमब्रह्मणो भिन्नेयं मम माता कालिकेति, षड्भिरपि दर्शनैर्यस्याः स्वरूपं नैव पारितं बोद्धुं सैव से"ति च—व्याजहार। समाधिभङ्गे स

प्राकृत इव जनोऽहंभावापन्नो मायां सत्यतयैवागृह्णात्। कथमेतत् सम्भवति? अहंभावे जाते व्यक्तिविशेषत्वेन स्वस्य सत्यत्वस्य बोधस्तस्य समजायत। अहंभावस्य सत्यत्वे प्रतीतिविषयं गते जगदपि सत्यत्वेन प्रतिभायात्। केवलस्य ब्रह्मणश्च तदापेक्षिकं मिथ्यात्वं जायते।" अत्रैव च विषये तेन चिराय गौरवविशेषः समारोपितः।

समाधिभङ्गे स सन्न्यासी ब्रह्मविषये—किमपि वक्तुं न शक्नोति। "भेदज्ञाने जातेऽभेदनीयविषये स मूकतामुपैति। अन्य-सापेक्षे जगति स्थितः स निरुपाधि-ब्रह्मविषये नीरवतामेव प्रयाति।" साधारणासुलभत्वात् समाधेः साकारः परमेश्वर एव साधारणैः समुपासनीयः, यतः साकारः साकारातिरिक्तं ब्रह्म चिन्तितुं नैव पारयति।

प्रकृत्या रामकृष्णस्त्वासीद् भावप्रवणो न तु गुणागुणज्ञ इति कृत्वा चरमोक्तं वैषम्यम् अनुरागविशेषतयैवासंशयं तस्य जीवने समदृश्यत। "न तु भक्तः कदाचिन्निराकारं बोद्धुमीहत इति, समाधिना तस्याहं-ज्ञानं साकल्येन मा नश्यतु इत्यत्र सकाम एव स" इति च तेन समुद्घोषिते। अत यच्च कारणं तेन प्रदर्शितम्, तत् तु तदीयप्रकृतेरनुरूपमेवाऽऽसीत्। "साकारेश्वरदर्शनसुखानु-भवोचितं समीहितमेवाभवत् तस्याहं-ज्ञानम्। [illegible] न तु [illegible]त्वेन परिणमनम् आसीत् तदीयमीप्सितम्।"

चतुरशीत्यधिकाष्टादशशततमे खृष्टाब्दे एकस्मिन् अपराह्णे कलि-कातायां पण्डितेन शशधरेण तस्य मलनाम्नि नगरे तेनैव तदीयधर्म-मतस्य सारांशः प्रकाशितः। ज्ञानमार्गः कर्ममार्गो भक्तिमार्गश्चेति बहव एव मार्गा वर्तन्त ईश्वरावाप्तौ। दार्शनिकानां श्रयणीयो हि ज्ञानमार्गः। केवलस्य ब्रह्मणो ज्ञानमेव तस्य समुद्देश्यम्। "नेति नेती" तिवचनैः सर्वाण्यसत्यानि वस्तून्यवधूय विगलितसत्यासत्य-

विचारणो कस्मिंश्चिद् विषये स समुपैति। सर्वस्य त्यागेन अगत्यवस्थानं निष्कामकर्म...: सुसम्पादनञ्चेत्यादिरूपः कर्ममार्गो गीतासु ...मनतयैवाऽऽस्ते वर्णितः। साम्प्रतिकः कालो नैकस्याप्येतयोर्मार्गयोर्ग्रहणे योग्यः। अनात्मवादविशेषितेऽस्मिन् काले शरीराद् आत्मनो भिन्नत्वकल्पनं सुदुष्करमेव। कथं तावज्जनः शुद्धेन केवलेन निरुपाधिना परमात्मनात्मनस्तादात्म्यं विजानाति? तथैव कर्ममार्गस्यापि। ऐहिकस्याऽऽमुष्मिकस्य च फलस्य विषये निष्कामः सन् कर्माऽऽचरितुं कृतसङ्कल्पोऽपि जनो ज्ञानतोऽज्ञानतो वा कर्मफलेन संपृक्तो भवत्येव। अत अद्भुततमे भक्तिमार्गे स्थितो जनः प्रेम्णा, पूजयात्मसमर्पणेन चोपलभतां साकारस्य परमेश्वरस्य सङ्गसुखम्। अयं तावन्मार्गो जनान् अनारतप्रार्थनस्य प्रयोजनीयतां शिक्षयति। इदानीन्तने काल ईश्वर... तावत् सुगमो मार्गः।

षडशीत्यधिकाष्टदशशततमे खृष्टाब्दे रामकृष्णो भृशं पीडितोऽभवत्। काशीपुरोद्याने शिष्यैः परिवृतस्य तस्य मरणबाधा करुणं वर्णिताऽध्यापकेन गुप्तेन। द्विपञ्चाश...दिवसात्नातिचिरं स ममार।

...ताब्धा अष्टम्यां दशाब्द्यां दक्षिणेश्वरमन्दिरं संश्रितवद्भिस्तरुणैः साम्प्रतं प्रचार्यन्ते गुरोरुपदेशाः। तदीयादर्शम...त्य स्वीकृतसन्न्यासव्रतैर्निर्मिता मठाः। हुगलीनद्या यस्मिंस्तीरे शोभते दक्षिणेश्वरमन्दिरम्, ... स्तीरे स्थितो "वेलुड"मठस्तेषां प्रधानं केन्द्रम्। वङ्गेऽब्धन्थल, युक्तप्रदेशे, मान्द्राजप्रदेशे च "वेलुड"मठाधीना विद्यन्ते बहव एव शाखामठाः। सन्न्यासिभिर्ब्रह्मचारिभिश्च मुख्येन मठेन सम्बद्ध आस्ते कश्चन धर्मप्रचारकसंघः। त्यागात्मकं कर्मात्मकञ्च भारतस्य जाती... सङ्घस्य लक्ष्यमिति स्वर्गतेन स्वामिविवेकानन्देनैव समुद्घोषितम्। सामाजिका नि दीनभरणरूपाणि शिक्षाविषयकाणि चेति विविधप्रकारतां गतान्येवाऽऽसन्

सङ्घस्य कर्माणि। आध्यात्मिकानुशीलनेन श्रीरामकृष्णपरमहंसस्य जीविते दृश्यमानस्य सुमहत आदर्शस्य व्यापारावल्याश्च स्थैर्यमापादयितुम् एव प्रतिष्ठापिता अभवन्नेते मठाः। शुद्ध-केवल-निराकार-निरुपाधिविश्वकारण-ब्रह्म-विषयकज्ञानसाधकशङ्करप्रोक्ताद्वैतवेदान्तस्याध्ययनार्थमतिगहने हिमालये "आलमोरा"तः पैशान्यां दिशि पञ्चविंशतिक्रोशदूरे संस्थापितो मायावत्याश्रमः शाखामठानामेकतमः।

"वेलुड"मठे मया तेषां केचन जना दृष्टाः। नहि निराकारस्योपासनार्थमेव तैः सन्न्यासः समाश्रित इति तु मया तेषां सङ्गं प्राप्याधिगतम्। सगुणो वा निर्गुणो वा ब्रह्मैव तेषां परमं वस्तु। अद्य वा कालान्तरे वा तत्परमं लक्ष्यं सर्वैरेव समासादनीयम्।

विंशोल्लासः

वेदान्तस्य तत्त्वम् (उपसंहारात्मकम्)

३

डक्टर् रवीन्द्रनाथठाकुरः

नदीस्रयसमाहृतमृत्तिकासम्पादितावन्ध्यत्वस्य त्रिकोणाकारस्य वङ्गदेशस्य पश्चिमे प्रान्ते शालवनावृतो गैरिकरक्तो बन्धुरः कर्षणायोग्यो वितत एवाऽऽस्ते कश्चन भूमिभागः। सागरात् तस्य भूभागस्योच्चता क्वचिच्चतुःशतहस्तपरिमिता, क्वचित् पुनश्चतुस्त्रिंशदधिकपञ्चशतहस्तपरिमिता। त्रिकोणाकारस्य समतलभूमिबहुलस्य वङ्गदेशस्य प्राकृतिकावस्थायास्तद्भूखण्डस्य प्राकृतिकावस्था भिन्नेति तत्स्थानगतैर्युष्माभिरनायासेनैव परिज्ञातं स्यात्। आतपाक्रान्तः शुष्कतरः खलु तद्देशस्य वायुः। शीतसमये भूमिः कठिना धूलिमयी च जायते। ग्रामस्थितैस्तालीवनैराम्रकाननैः कार्पासक्षेत्रैश्च कथञ्चिल्लघूक्रियते प्राकृतिकावस्थाया आतपाक्रान्तता।

ऊनविंशशताब्द्या मध्यभागे ईश्वरानुसन्धानोचितेनैवाऽऽग्रहेणोपलक्षितः कश्चन कठोरो जनो योग्यस्य कस्यचिद् भूखण्डस्याऽऽसादनार्थमेवैतत्प्रदेशेऽनिर्वृतमितस्ततो बभ्राम। सृष्टिरहस्यव्याख्यानायैव समालोडितानां वेदानां बहुले भागे परिलक्षिता तेन वृथा कल्पना। शास्त्रमार्गानुसारेण क्रमप्रचीयमाना पौत्तलिकतेव शङ्करस्य विशुद्धाद्वैतवादोऽपि तेन प्रत्याख्यातः। 'राजा'राममोहनराय-प्रवर्तितस्य धर्म्यसमाजस्य "ब्राह्मसमाज" नाम्ना पुनः प्रतिष्ठापन

विधाय तस्य समाजस्य कृते उपनिषद्भ्यो वस्तु समाहृत्य स्वमतेन "ब्राह्मधर्म"—समाख्यः कश्चन ग्रन्थस्तेन व्यरचि। अत्राऽऽगत्य त्रयाणां समुच्छ्रितानां पादपानां शाखानामधस्तात् सन्निवेशितस्तेन यः खलु पटमण्डपः, सोऽद्यापि कौतूहलिनः पथिकस्य नेत्रपथातिथित्वं समुपैति। अगतः कालाहलस्यातिदूरे स्थितेऽस्मिन् स्थाने कालेन निरमायि तेन "शान्तिनिकेतन"समाह्वं किञ्चन धर्म्योपासनमन्दिरम्। जनैर्महर्षिपदेनाल[illegible]क्रियमाणो देवेन्द्रनाथठाकुरोऽसौ सर्वमेवाऽऽत्मनः समीहितं वस्तु समधिजगाम।

एकाद[illegible]शीयो रवीन्द्रनाथठाकुरः स्वपिता महर्षि-देवेन्द्रनाथठाकुरेण समं [illegible]ह्यसतत्यधिकाष्टाद[illegible] खृष्टाब्दे प्रथमं शान्तिनिकेतनं विवेश। नगरीसंवर्धितस्य तस्य बालकस्य मनसि नवीनस्यास्य प्रदेशस्योन्मुक्ता भूमिरियं नाम भावं जनयामास, स स्वभावासेनैव ज्ञातुं शक्यः। "नीरवताधिष्ठात्री देवी नीलेन नभोवल्कलेनैव तां भूमिं पर्यक्षिपद्" इति [illegible]तत्काल स्वमनोभावप्रका[illegible]स्यावसरं प्राप्य तेनैव लिखित[illegible]। व[illegible]तस्त्वनेन भूमिभागेन समुत्पादितस्तस्य मनसि गभीरश्चिरस्थायी च कश्चन भावः। प्रकृत्याश्चास्ता समधिचकार तस्य मनसोऽन्तस्तममपि कक्षाम्। गङ्गोपत्यकाया वनान्यधिवसतामार्याणां निर्व्याजवर्तनरीत्यां समजायेतां तस्य तदानीं काचिच् श्लाघा सम्मानविशेषश्च। एवंविध एव कस्मिंश्चित् परिसरे भारतस्याऽऽत्मनः प्रबोधसम्पादयित्री कदाचित् समुल्ललास काचित् स्वर्णमयी ऊषा। भारतीयानां पवित्रजीवितस्य निर्व्याजता-ज्ञानयोर्महत्त्वस्य सार्वकालिकं सर्वा[illegible]ति[illegible]यित्वं कथं तेन समुपलब्धम्, तस्यापि तेनैव दत्तं वर्णनम्। सरलजी[illegible] कल्पना, आध्यात्मिकदृष्टेर्विशुद्धता, हृदयस्य पवित्रता, विश्वमैत्र्यम्, सर्वेषु जीवेषु [illegible]श्चेत्येते खलु चरम[illegible]र्णी [illegible]भावस्य तस्य कालवि[illegible]स्याऽऽदर्शाः

संकीर्तिताः। भारतस्य ःभेरन्तरप्यापे प्रवहत्येव तेषाम् शानां प्रवाहः, अतः खलु तं प्रवाहं दैनन्दिनप्रयोजनीयत्वेन पुनरपि भूमेरुपरि प्रवाहयितुकामः स कतिपयविद्यार्थिभिरनुगम्यमानः प्रायेण त्रिंशद्वर्षानन्तरं प्रत्यावर्तत शान्तिनिकेतनम्, संस्थापितवांश्च तत्र विश्वविश्रुतं विद्यालयम्।

* * * *

वाष्पीयशकटावतारस्थानात् को ापरिमितं क्रमोन्नतं मार्गमति-क्रामता मयाऽन्वभूयत एव कश्चनाऽऽनन्दविशेषः सूर्यकिरणसमुज्ज्वले कस्मिंश्चित् फेब्रुयारीमासस्य प्रातः। श्वेतपरिच्छदाच्छादिततनुः कश्चन दीर्घकायः प्रभाववान् जन आश्रमद्वारमलङ्कृत्याऽऽसीद् दण्डायमानः। मधुरेण सौजन्येन ान्तिनिकेतने सोऽस्माकं स्वागतं व्याजहार। कस्मिंश्चिच्छायासुशीतले कुञ्जे स्थिता प्रस्तरवेदिका मदासनायाभूत् परिकल्पिता। वर्तुलाकारो मसृणितः कुट्टिमाय-मानोऽचकासीत् कश्चन ःभिखण्डोऽस्मत्पुरतः। आ ःदेशीय-विद्यालयस्य प्रपाठप्रकोष्ठस्य प्रयोजनमेतेन सम्पाद्यते। मत्पृष्ठतो नातिदूरे वृक्षतलेऽतिष्ठन् श्वेतवेशाः शिक्षकाः। पुरतश्च मे वर्तुलाकारभूखण्डस्य प्रान्तभागेऽर्धचन्द्राकारेणापाविशन् विद्या-र्थिनः। वसन्तकालस्यानुगुणेन पीतवर्णेन परिच्छदेन ते बभासिरे। दक्षिणेन मां बालकैः समं विद्यालये पठन्त्यो बाला विरेजिरे। किञ्चन वैदिकं सूक्तं गायन्तं पण्डितमनु समग्रा सा सभा ःःमगासीत्। प्राचीनभारतीयेतिहासं विजानतो जनस्य सविधे नैव स्वल्पमेतस्य दृश्यस्य गौरवम्। प्रकृत्या समं सुसंश्लिष्टानां वनमध्ये निवसतां प्रज्ञानामार्याणां याभ्योऽवस्थाभ्यः समुद्गतेयं शिक्षिस्तासामेवाव-स्थानां हृस्वेन मानेनात्र दृश्यते समावेशः। आ ानिकवर्तनरीत्या विरोधम्, अतीतकालस्याऽऽदर्शानां सम्प्रदायानाञ्च समागमं समन्तत एवात्र सर्वः पश्येत्।

अध्ययनोपक्रमात् पूर्वे सभामञ्चे आते शा... कस्य कस्यचित् पुरातनस्य तरोर्मूले स्थिता काचित् वेदिकाऽस्माभिरवलोकिता। अनुन्नतस्य कस्यचित् प्रस्तरखण्डस्योपरि मर्मरोपलखण्ड... मासीद् विनिहितम्। अस्मिन्नेवाऽऽसन उपविश्य महर्षिदेवेन्द्रनाथठाकुरेणाध्यायि परमेश्वरस्तत्स्वरूपम्। ततः परिदृष्टान्यस्माभिर्विभिन्नकुञ्जस्थितानि विभिन्नविषयाध्ययनस्थानानि। सर्वेष्वेवाध्ययनस्थानेषु स्वल्पसंख्यकाश्छात्रा मण्डलाकारेण भूमावध्यापकेन सममासन्निषण्णाः। नरेषु स्थितस्य सौन्दर्यविषयकनैसर्गिकबोधस्य ...लनम्, सृष्टावस्यां सर्वगतत्वेनावस्थितस्याविरोधस्य ज्ञानं वा शिक्षापद्धतौ तस्यां सर्वथैव मया समन्वभूयत। अतः खलु तस्यां शिक्षापद्धतौ सङ्गीतं चित्राङ्कणञ्च गौरवास्पदं ...लब्धस्थानम्।

येन समुद्देश्येन प्रणोदितेन रवीन्द्रनाथठाकुरेण प्रतिष्ठापितोऽयं विद्यालयः ये च वा भावास्तस्मिन् प्रयोगे लीना एव वर्तन्ते, तेषां समालोचनेन समुद्घाटितं भवति रवीन्द्रनाथस्य दर्शनम्। अरुन्तुदैवाऽऽसीत् तस्य विद्यालयजीवितस्य स्मृतिः। विद्यालयस्य कार्याणां कठोरैक...पतयाऽति हि नाम सन्तापितमभूत् तस्य चेतः। आत्मोत्कर्षसाधनस्य प्रतिकूलतया स्थिता केवल... लौहशल्यमिव तस्य मनसो रुजमुदपादयत्। सौन्दर्यसं...तामादर्शजगदीश्वरसृष्टमिदं जगत्, तस्मिन् (रवीन्द्रनाथे) अन्धजनोचितां शून्यां दृष्टिं निधाय स्थितेभ्यः का...मयासनेभ्यः, समुच्छ्रितेभ्यः प्राकारेभ्यश्च स्थानं दत्त्वा, स्वयं विलीयत इति स समपश्यत्। अतः खलु ...न्तिनिकेतने काष्ठासनैः स्निग्धाय वसुधोत्सङ्गाय, प्राकारैश्चाऽऽमलकीकुञ्जेभ्यः स्थानं दत्तम्। तत्रत्यैरध्यापकैश्च न केवलं पुस्तकस्थितमेव ज्ञानम्, परं विद्यार्थिनामुत्कर्षविधायकम् इतरदपि ज्ञानं तेषु वितीर्यते। पूर्वपुरुषाणां शारीरिकमानसिकाध्यात्मिकैश्वर्योप-

ऋषितं पूर्वपुरुषाणां वनवासजीवितमेवाऽऽदर्शं आसीद् विद्या-
लयस्य प्रतिष्ठातुः। आधुनिका विद्यालयाः शारीरिकमानसिकोत्कर्ष-
साधनायैव यतन्ते। एतेनास्माकमज्ञातसारेणैव मानवप्रकृतिगत-
स्यैक्यस्य विलयो जायते। एतद्विषयमधिकृत्य प्रवीणेन तेन (रवीन्द्र-
नाथेन) कथितम्—"न त्वेतस्माज्जगतः पृथग्वस्तुतया, परमस्यैव
जगतोऽत्यन्तभूतसत्यतयैवास्ति म आध्यात्मिके जगति विश्वासः।"
वयमीश्वर एव वसाम इति सत्यं प्रतिप्रश्नमस्माभिः संस्मर-
णीयम्। अनन्तरहस्यपूर्णेऽस्मिन् जगति जाता वयम् कथमस्मा-
च्चिरायानिश्चितायां पद्व्यां प्रवहतो जडपदार्थस्याऽऽकस्मिकोऽ.. तथा
जानीयाम। चिरनिद्रितस्य स्वप्नदर्शिनः स्वप्नत्वेन कथं वयम्
अस्माकं जीवितं विजानीयाम, अनन्तव्यक्तित्वोपेतेन केनचिद्विष-
येणासम्बद्धौ शक्ति-जडपदार्थौ व्यक्तित्वसम्पन्नानामस्माकं सविधे
निरर्थकावेव जायेयाताम्। मानुषप्रेम, महतां महत्त्वम्, स्वदेशहिताय
शूराणां स्वजीवितोत्सर्गः, प्रकृतेरप्रतिमं सौन्दर्यम्, इत्येतेषां विष-
याणां केवलजडत्वं नैव सम्भवति, परमस्त्येव तेषु व्यक्तित्वस्य.. कः
कश्चन भावः।

दैनन्दिनोपासनाकार्येऽप्युपनिषद्वचनप्रयोगनिपुणे कुले जातः
स एकमेवाद्वितीयं ब्रह्म प्रतिपादयन्तं वेदान्तमाश्रित्यैव स्वं धर्ममतं
स्थापयेदित्यत्र किमु चित्रम्। साहित्यं सङ्गीतं कलाश्च सहजोप-
लब्धविषयतया गृहीतवतां जनानां मध्ये बाल्ये विवर्धितत्वात्
..मनाथं काव्यं न तु कर्कशं दर्शनशास्त्रं जातं तस्याव-
लम्बनीयमित्यत्रा.. नैव विस्मयः कार्यः।

तत्कृते "साधना" समाख्ये ग्रन्थे सुसम्बद्धतया चकास्ति तदीयं
धर्ममतम्। "समास.. ..नमार्गः" इति तु "साधना" पदस्याऽऽशयः।
न च द.. ..निकनिबन्धानामादर्शेन विरचितः स ग्रन्थः। ग्रन्थोऽयं
..त्वात्मनः कस्या उ.. ..सविशेषः, न तु युक्ति-प्रतिपादिताध्यात्म-

वादात्मकः, दार्शनिकभावपूर्णः न तु दर्शनस्य विशिष्टो मतमेव इति न्याय्यमेवोक्तमध्यापकेन राधाकृष्णेन। सर्वान्तर्गतो हि परमेश्वर इति धर्म्यो भावः साधारणानां भारतीयानां मनःस्विव तस्यापि मनसि पदं लेभे। अनारतमता ऽनेन भावेनानुप्राणितेनैव तेन प्रकृतेः सौन्दर्यस्य वर्णने तथैवाऽऽत्मा विनियोजितः। निदाघसमये "प्रियगीत"पक्षी यथा निरवच्छिन्नं मधुरं गायति, तथैव प्रकृतेश्चारुतयाऽत्यर्थं [illegible]वशीकृतः स यदृच्छया मनोहरं रुतमेव निरन्तरं समुद्गिरति। यथार्थनामा हि तस्य "गीताञ्जलि"समाख्यो ग्रन्थः। जगति प्रीतिमान् विश्वासयुक्तश्च स तत् [illegible]यात्वेन ग्रहीतुं नैव समर्थः। अनभिमतस्तस्याऽऽसीद् धूर्त्तानां जालरूपो द्वैतवादः। सर्वेषु वस्तुषु परमेश्वरस्य सत्तामनुभूय भगवद्भावोन्मत्तः स प्रकृत्या नराणां तादात्म्यं विजानाति, काव्याकारे[illegible] च तस्य स भावः प्रकटता[illegible]पैति। प्रकृत्या अप्रतिरूपं रूपं व्यक्तित्वविशेषस्य व्यञ्जकमिति तस्य निर्णय एव तदीयकल्पनायाः स्वभावं व्यक्तीकरोति। "अनन्त[illegible]गामिनीव गवाक्षपथसंस्थिता निस्तब्धा रजनी" इति, "अनाद्यनन्तकालं नक्षत्राणि प्रत्यक्षीकुर्वन्ति संख्यातीतानि मरणादृश्यानि" इति, "[illegible]वनेन जगतः [illegible]न्तिरपनीयते" इति, "म[illegible]कामालती[illegible]सुमामोदेनोद्यानं सानन्दं व्याप्यते" इति, "क्षुद्रतमेऽपि कुसुमे स्थितस्य सौन्दर्यस्य शक्तिः सचलाग्नेयास्त्रादपि प्रबलतरा" इति, 'करवार्' स्थिता चन्द्रकलाकारा दुरन्तसागरवक्षसि प्रसुता भूमिरनन्तालिङ्गनेप्सुर्जन इव प्रतीयते" इति च [illegible]कुशल[illegible]विशेष एव तेनाधिगम्यते। दृढं स विश्वसिति जगति विसर्पणशील आस्त एव कश्चनाऽऽद[illegible]विशेष इति। न हि कल्पनाप्रसूतेन स्वर्गेण, परं [illegible] लक्ष्यभूतेन चरम[illegible] सम्बद्धः तत्त्वसाक्षात्कारः। सूर्यालोके, श्यामले क्षेत्रे, प्रवहन्त्यां नद्यामिव[illegible], वसन्तस्य सौन्दर्ये, [illegible]तकसमयप्रभातस्य शान्त्याम्, किं बहुना

सर्वमेव [illegible] स तन्मता[illegible] स्वर्गीयं भावम्। वस्तुतस्तु जगति सर्वत्र वरीवर्तमानः कश्चन दिव्यो भावः सर्वथै-वास्मान् परिचालयतीत्यत्र प्रत्ययविशेष एव तेनोह्यते। यथार्थ-सौन्दर्यं हि सत्यं किञ्चन वस्तु, न तु जडपदार्थमात्रम्। अस्त्येव तत्र व्यक्तित्वस्य भावः। [illegible] कारणात् सौन्दर्यं नाना-प्रणाल्या नराणां मनःकक्षासु प्रविशति। [illegible]र्यास्तमनसौन्दर्यस्यान्त-र्येऽपि [illegible]मास्त तदेवाधिकृत्य [illegible]तम कृष्णाब्दे डिसेम्बरमासि कस्यचिन्मित्रस्य सकाशे लिखितं तेन किञ्चन पत्रम्। [illegible] सागरेषु च तदानीं या नीरवता समव-तरति, तां परि[illegible] विवर्धत एव तस्य विस्मयः। यदि कदाचिज्-जायेतास्या नीरवताया विरामः, यदि कदाचिद् [illegible] समयस्याभीप्सितत्वका[illegible]तो भावस्तदा पृथिव्या नक्षत्रलोकं यावद् [illegible]त् [illegible]नातिगम्भीरं द्रुतसञ्चारि सङ्गी-तम्? एवं सति तीव्रयैकायनतया विमृश्य विश्वाच्छादकयोर्वर्णा-लोकयोर्विचित्रमैक्यं सङ्गीतत्वेन परि[illegible]यितुं शक्यते। ततो नेत्रे निमील्य मानसेन श्रोत्रेणानुभवितव्यमस्माभिश्चिरप्रसक्तस्य सङ्गीतस्य स्फुरणम्। नहि सम्पूर्णरूपेणे[illegible]यविषयत्वं गाहते सौन्दर्यम्। ये तावत् सौन्दर्यरसे गभीरं निमङ्क्तुं नैव पारयन्ति, त एव सौन्दर्यस्य केवलेन्द्रियविषयत्वं मन्यन्ते। परं यैरस्य प्रक[illegible]नार्थेम्यत्वं सम्यगुपलब्धम्, तैरेव ज्ञायतेऽस्य नेत्रकर्ण-विषयातिशायित्व[illegible], तैरेव चावगम्यते हृदयमप्यसमर्थमस्य यथार्थ-तत्त्वास[illegible]न इति।

सौन्दर्यपक्षस्याऽऽशये सत्यतायाश्चासकृद् [illegible]रवारोप[illegible]मस्माभि-रतः खलु प्रत्य[illegible]क्ष्यते। ससीमे वस्तुन्यसीमाभासेर[illegible]न्द्-मवलम्ब्यैव निरमायि तेन काव्यजातमिति तद्वचनं समुद्धृत्यै-वास्माभिरुच्यते। सौन्दर्यं हि ससीमासीमयोः सं[illegible]सम्पाद[illegible]।

नहि कल्पनात्मिका [illegible] केव प्रकृतेः सौन्दर्यम्, परं तद्धि प्रतिबिम्बतां गतोऽनन्तस्याऽऽनन्दः। तेनाऽऽनन्देन सम[illegible] [illegible]स्मामि-रात्माऽपि विस्मर्यते। कुसुमस्थितानां वर्णाकारगन्धानां सन्त्येव खलु विशिष्टाः समुद्देशाः। भ्रमरस्य मधुसंग्रहे ते तावन्मार्ग-दर्शकाः। भ्रमरस्य मध्वासक्तेरपि न च नाऽऽस्ते समुद्देशः। मधु सञ्चिन्वता भ्रमरेण वृक्षस्यावन्ध्यत्वं सम्पाद्यते, तेन च जगदिदं न मरुस्थलतामवाप्नोति। [illegible] प्रकृतौ सर्वेषामेवैतेषां गुणाना-मस्त्येव निर्दिष्टः समुपयोगः। एतेषां गुणानां समवाय एव पुष्पस्याविलोपस्य हेतुः। कठोरं नियम[illegible]स्य जन्मवृद्ध्युत्पादन-नाशा यथाक्रमं प्रवर्तन्ते। व[illegible]कारगन्धादयो विधिसारांशभूतानां कारणपरम्पराणां संयोगकारकाः। अना[illegible]मवा[illegible]नां दृष्ट्या विज्ञान-प्रोक्तं व्याख्यानमेव पर्याप्तं स्यात्। प्रसूनस्य सर्वे गुणा व्याख्याताः, पर्याप्तः समुद्देशश्च निरूपितः। तथाप्यपरि[illegible]ष्ट एव द[illegible]निकाः। उपेक्षित एव विषयः कश्चन विज्ञानेन। प्रयोजनी[illegible]यता[illegible]भिः प्रदर्शितस्य गुणानामुपयोगनिचयस्यात्यतिरिक्तः सौन्दर्यबोधरूपः कश्चन विषयः पुष्पेणास्मत्समीपे समुपस्थाप्यते। पुष्पस्थितानां गुणानां सङ्कलनाज्जातं सौन्दर्यं प्रकृतेर[illegible]रहस्यत्वं व्याहन्ति। कुसु-मस्य विभिन्नगुणानां कार्यं सिद्धिपूर्वमेवास्माभिः सम्पादयितुं शक्यते, परं तेषां गुणानां सङ्कलनाज्जातं नराणामानन्दजननं सौन्दर्य-मसम्पादनीयमेव। धर्मसौन्दर्यभेदेनैकस्यैव कुसुमवस्तुनोऽवस्था-द्वयम् अस्माभिरुपलभ्यते। तयोरवस्थयोरेका पारतन्त्र्यात्मिकेतरा चापारतन्त्र्यरूपा। एकस्मिन्नेव वर्णे आकारे शब्दे आस्वादे च प्रयोजनीयतानन्दमूलौ परस्परविरुद्धौ भावौ परिलक्ष्येते। प्रथमोक्त-दृष्ट्या कुसुमं दिदृक्षोर्जनस्य ज्ञानं प्राथमिक[illegible]। ब्रह्म-जिज्ञा[illegible]ना वारुणिभृगुणाऽवस्थाविशेषमिमं समधिगम्य, "अन्ना-द्ध्येव खल्विमानि भूतानि जायन्ते, अन्नेन जातानि जीवन्ति, अन्नं

प्रयन्त्यभिसंविशन्ती"ति—प्रथमं सिद्धान्तितः। दशाथामस्याः अनात्मवादे चरमं नामस्तित्वसमस्यासमाधाने समर्थ इव प्रतीयते। ततः पूर्णतरां दशां समनुभवन् जनः,—"आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति, आनन्दं प्रयन्त्यभिसंविशन्ती"ति—भृगुवाक्योक्तचरमं सिद्धान्तमेव समुपैति। अत्रैव चरमे सिद्धान्ते स्वच्छन्दं रमते ठाकुरः। एतस्य मतं तस्य सर्वान्तःकरणेन पोषणाद् दर्शनं पिपठिषुभिः स्थाने खलु स ... न्तिक इत्युच्यते।

विश्वस्वीकारे किं बीजमिति प्रश्नस्योत्तरत्वेन वेदान्तेन यदुक्तम् तत्कल्प एव कश्चनाऽऽसीद् भृगोः सिद्धान्तः। मायाविना प्रदर्शिता मायेव विश्वमिति वेदान्तसूत्रैः प्रतिपादितम्। परं कथं स मायावी मायां सृजेदिति प्रश्नः स्वत एव समुद्गच्छति विश्वस्वरूपद्योतकादस्मान्निदर्शनात्। मायाविनः कैवल्यस्य नैर्गुण्यस्य च पूर्वमेव निर्व्यूढं प्रतिपादितत्वान्नैतत् तस्य प्रयोजनीयत्वेन समीहितत्वेन वा व्याख्यातुं शक्यम्। लीलयैव तेनैतत् कृतमित्युत्तरं सूत्रेभ्य एवास्माभिरवाप्यते। यदृच्छया प्रवृत्तेयं मन्ये बुद्धिः। असीमः ससीमे आत्मानं प्रकटयति, यतः स एव तस्य स्वभावः। "दिव्यसमृद्धेश्चिरन्तनविकाशविशेषः खल्विदं जगद्" इत्यध्यापकस्य विपिन्-सेन-महोदयस्य वचनमेवात्र समुद्ध्रियते। ठाकुरमहोदयनये आनन्दादेव खलु जगदिदं प्रकाशितं परमेश्वरेण। एतच्चेद् गृह्येत, तदा परमेश्वरः स्वेच्छयैव समर्यादत्वं स्वीकरोतीत्यत्र विस्मयावकाशो नैवावतिष्ठेत। ईश्वरश्चेदात्मनि नैव निदध्यात् समर्यादत्वम्, तदा कथं तस्य शक्तिप्रयोगयोग्यता जायेत? स्वेच्छया क्रीडानियमैरात्मनः सावधिकत्वं परिकल्प्य क्रीडापकरणैः सुसम्बद्धश्चतुर-क्रीडानिपुणः किं नानुभवति स्वशक्तिसम्पादितम् आनन्दम्? न च स्वेच्छया परिचालने तस्य शक्तेरभावो विद्यते, परं तथा कृते

क्रीडैव न स्यात्। स्वीक्रियेत चेत् परमेश्वरस्य सर्वशक्तिमत्त्वं, तदा तस्य सृष्टेरवसानं जायेत, तदीया शक्तिश्च निरर्थकत्वं गाहेत। स्वप्रकाशनायान्यसापेक्ष[illegible] एव स इयत्ताविधायकं कश्चिन्नियमः। गायकस्याऽऽनन्दो गानरूपेणाऽऽत्मानं व्यक्तीकरोति। गीतस्य व्यवच्छेदे कृते तस्य स्वरादिरूपावधियुक्तत्वं स्फुटतां लभते। तेषां पुनरवधीनां विरहात् सङ्गीतस्य सङ्गीतत्वमेव व्याहतं भवति। सर्वेषु निर्धार[illegible]योग्येष्ववधिषु महत्तमः खलु केवलः परमेश्वरः। परम् इयत्तादिकं यदि नैवास्थास्यत्, तदा केवलस्य परमेश्वरस्य पूर्णत्वञ्च कथमपि नाभविष्यत्। एकतो विस्तरणशीलं हि ब्रह्म, अपरतश्च तत् पूर्णम्। एकत्र तद् मूलम्, अपरत्र चावभासविशेष एव। गानस्य गीयमानवस्तुनश्च तत् खलु समाहारः। एतस्या-स्वीकारेण गायकविषयकज्ञानस्याप्यस्वीकारो जायेत; प्रचलति गानम्, परं नास्ति किञ्चिद् गीतवस्त्विति वाक्यमिवैतत् तदा प्रति-भायाच्च। सत्यं सप[illegible] पद्यतेऽस्माकं गानव्यापार[illegible]व बोधः, न तु कदाचित् साकल्येन गीतवस्तुनो ज्ञानम्, तथापि गायकस्य मनसि पूर्णतयैव विराजते तद् गीतवस्त्वित्यत्र किं सर्वदैव वयं न सचेतनाः?

येन कविना [illegible] पाठकानां कृते विरचितानि काव्यानि, तस्य कवेः प्रेरणालाभस्थानं सर्वै रेव [illegible]तव्यमिति दुष्परिहरणीयोऽयं विषयः। किं कविनोरीकृताः सर्व एव भावा भारतीयाः, अथवा भारतीय-वैदेशिकयोर्भावयोर्मिलनादेव ते भावाः समुद्गताः? रवीन्द्र-नाथस्य काव्ये जन्मान्तरवादस्यावस्थितिं स्वीकृत्यापि जन्मान्तर-वाद-कर्मवादादिषु हिन्दुमतस्य वैशिष्ट्येषु नाऽऽसीत्तस्य विश्वास [illegible]ध्यापकन "इ जे टम्सन्" महोदयेन प्रतिपादितम्। अध्यापकस्य टम्सन्-मह[illegible]यस्य वचनं सन्देहभाजनमिति मया ससाहसं तद् विचार्यते। सहजोपलब्धभाव[illegible]तया विशुद्धहि[illegible] भावोऽयं

...नायस्य मनस्यभवति ... इत्यत्र तदीयं काव्यजातं प्रमाणम्। गभीरं विचलिते तस्मिन् भावोऽयं तन्मनसि पदं रचयति। प्रथमं प्रामं दृष्ट्वा यो हि नाम भावस्तदीये चेतसि विरराज, तं स वक्ष्यमाण-प्रकारेण निवेशितवान् कस्मिंश्चित् स्वरचिते काव्ये। "जन्मान्तरस्य मित्रमिव ...थास्तट मह्यं स्वागतम् उदीरयाम्बभूव"। त्रिनव-त्यधिकाष्टादशशततमख्रृ... मे-मासस्य षोडशदिवसीया लिपिः स्वीये ...न्तरविषये तदीयं भयप्रत्याशाद्... तेन लिखिता। प्रियेषु बहुष्वहं यदि पुनर्न जायेय, जायेय च यदि विश्रान्तिवर्जिते का... युरोपदेशे, तदा कथं ...न्तिमवा-प्नुयामित्यसकृदेव तेन चिन्तितम्।

खृष्टीयधर्मात् तेन लब्धा प्रेरणेति कैश्चित् सनिश्चयमुद्घोषि। अध्यापकेन चस् राधाकृष्णेन तस्य सविशेषं प्रतिवादः कृतः। साहित्यविषयिण्या घोशक्त्या अन्यस्माद् गृहीताया नीतेरपि भार-तीयत्वं युरोपदेशे प्रदर्शितं ठाकुरेणेति चतुर्दशाधिकोनाव...शत-तमखृष्टाब्दस्य फेब्रुयारीमासस्य चतुर्दशदिवसीयायाः "स्पेक्टेटर्" पत्रिकायाः समुद्धृतोऽध्यापकेन तेन कश्चनांशविशेषः। भवतु न भवतु वा क्राइष्ट् एव परमेश्वरस्तथापि तत्सदृश एवाऽऽस्ते कश्चन परमेश्वर इति खृष्टधर्मप्रचारकस्य भाषितस्यानु... । एतेषां निर्णयानां मूलभूतस्य सत्यस्यासत्यस्य वा निरपेक्षेण सारवत् ...ऽध्यापकेन राधाकृष्णेन प्रदर्शितम्—विश्वस्यांश-विशेषेण परमेश्वरस्य तादात्म्यं सञ्चिन्त्य सदसतोरेकतरेण तस्य संयोगमपरेण च विप्रयोगं परिकल्पयतः स... भेदस्य ग्रहणं ठाकुरेण ...तमित्यचिन्तनीयोऽयं विषय इति। वेदान्तम... तस्य सदसद्विषयकं मतं स्वर्गतस्याध्यापकस्य वि-एन् सेन-महो-दयस्य मतस्या... , केवलं तत्र भाषागतो भेदो विलसति। ने... इत्यनयोऽस... । असीमस्य ससीमत्वेन

प्रकाश इति तत्कृते । ... ने गृहीते, तथावभासा ... दृश्यानाम् असतो वा विद्यमानता स्वीक...यैव । कथमसद् विद्यते इति नायं ... विषयः, परम् विचारणीयं खल्वसति परम-स... त्वमस्ति वा नवेति । अस्य प्रश्नस्य निषेधमुखेनैव निःशङ्कं परिकल्पित... तम् अध्यापक-सेन—डक्टर्-रवीन्द्रनाथठा...भ्याम् । तटभूमिरेव नद्याः सीमा । एवमपि नद्याः पर... त्वेन किं कैश्चित् तट...मिर्निर्दिश्यते ? परं नदीवेगस्य किं सा सीमैव न कारणम् ? जगतोऽपि स्रोतसोऽस्त्येव काचित् सीमा । तथाऽसति विश्वस्य स्थितिरेव न सम्भवति । न च विश्वस्य सीमाभिः, परं पूर्णताधिगमनाय तस्य प्रधावनेनैव तदीयं स...द्रश्यमस्माभिर्निरूपयि... शक्यते । आत्मबोधानन्दमनुभवितुम्, नैतिकजगत्सत्तया ...कारजगति क्लेशरूपेण धीजगति भ्रमत्वेनेत्यवस्थाभेदैर्विभिन्नान् आकारान् विभर्तुश्चानन्तेनैतासामियत्तानां पारतन्त्र्यं समनुभूयते । एतद्दृष्ट्या समवलोकितास्वेतास्वियत्तासु स्थितमचिरस्थायित्व... अनायासेनैवावगन्तुं शक्येत । शङ्करेण त्वेतासाम् इयत्तानाम् आपेक्षिकसत्यत्वं प्रतिपादितम् । वि...नस्य समुन्नतेरितिवृत्तस्याऽऽलोचनं नाम विभिन्नसमये विज्ञानेन प्रवर्तितानां भ्रमात्मकविषयाणामध्ययनम् । तथापि भ्रान्तविषया...ं प्रचारणं हि विज्ञानस्य समु...श्यम् इति न कोऽपि वि...वसिति । सत्यस्यावधारणो क्रमोन्नतिलाभ एव विज्ञानस्येतिहासे द्रष्टव्यो न तु तत्रत्यो भ्रमः । स्वभावेनास्थिरा हि भ्रान्तिः । सत्येनैतस्याः सामानाधिकरण्यम् असम्भवमेव । छिन्नः परिच्छद इवो...भ्यासि...नन्तरमेव ...मस्त्यज्यत । असत्य...त्य सत्यज्ञानसम्पादनमेव बुद्धेः कार्यम् । भ्रमध्वंसपूर्वकं सत्याविष्करणं हि ज्ञानम् । एवं रीत्या अस्माकं बुद्ध्या चारित्रेण च पूर्णतावाप्तयेऽसत्यपातनं कर्तव्यम् ।

पञ्चचत्वारिंश...धिकाष्टा...दशशततमे खृष्टाब्दे महर्षिदेवेन्द्रनाथ-

ठाकुरेण प्रत्याख्यातं वेदस्याप्रमादित्वम्। सानुगेन तेन ब्रह्मस्य सम्प्रदायम् अवधूय ब्राह्म-समाजे विचार...शकोविवेकस्य च परम-प्रामाण्यं निर्व्यूढं संस्थापितम्। वेदानां ये ताव...शास्त्रेषां मतस्यानु-कूलास्ते तेन परि...हीताः। रवीन्द्रनाथस्य सकाशे तदन्तःस्थितं ज्ञानमेव परमं वस्तु। अ...स्य परमेश्वरस्य ज्ञानं न अपेक्षते प्रमाणं वितर्कं वा, परं स्वत एव तज्ज्ञायते। अ... तथा प्रताय...नानि वस्तूनि पूर्णस्यैव प्रका...नानीत्यप्यनयैव रीत्या अनो बुध्यते। विवृण्वता तेन पुनरपि गान-गायकयोरुपन्यासः कृतः। गानस्य चतुरस्रताम् अनुभवन् विशिष्टः श्रोता तत्त्वतः स्वरपरम्परा-मेव शृणोति। आनन्द एव सङ्गीतस्य कारणम्। स्वरपरम्परया सङ्गीतमात्मानं प्रकाशयति। अपूर्णानां स्वराणां सङ्कलनेन जातं सङ्गीतं साकल्येन गृहीतं सत् पूर्णत्वमेव प्रयाति।

वस्तुव्यवस्थायामस्ति किं स्वाधीनेच्छायाः किञ्चन स्थानम्? अथवा ससीमेऽसीमस्य प्रकाशात्मकं हीदं जगदित्यतः किं नराणां कठोरनियमाधीनत्वं नाऽऽयाति? केवलः परमेश्वर आत्मबोधाय स्वेच्छया समर्यादत्वं स्वीकृत्य मर्यादापारतन्त्र्यं भजते। अपि-नामेयत्तानां स्वरूपमतिकठोर...? किं दुर्लङ्घ्यानां नियमानां क्रीड-नकमात्रं नरः? ...रीरिकमानसिकरचनायां प्रकृत्या सह सम्बद्धः स तथैवेति मन्यते ठाकुरः। आत्मविषये तु स कथमपि न तादृशः। नहि नराणामात्मा इच्छायाम् इच्छायाः प्रक...ातिरिक्तः कश्चन पदार्थः। नरा...मात्मविषय एव विप्लवः सर्वैरेव...यते। नय...मिच्छारूपयाऽऽत्मानं प्रकाशयन्तीच्छा यद्यभविष्यत् परतन्त्रा, तदा ...धीनताया असद्भावाद् आनन्दो नैवावर्तिष्यत। प्रकृते-...पा ईश्वरस्य सशक्ता योद्धारो नय...मात्मनाऽध्यासितायाः कक्षाया बहिरेव तिष्ठन्ति; प्रेम्णो दूतं सौन्दर्यमेव केवलं तत्र प्रवेशं लभते। स्वाधीनता चेत् सत्या, तया विना बन्धन...।

नैवाजनिष्यत, तदेश्वरस्य नराणामात्मना सम्बन्धः प्रेममूलो न तु प्रभुत्वमूलक एवाभविष्यत्। नत्वीश्वरशक्त्या बलान्नियोजितः सन्, परं स्वेच्छयैवास्माकमात्मा सम्प्रणयमीश्वरेण मिलति। ठाकुरबुद्धेरनुगुणत्वात् तैत्तिरीयश्रुतेरयमुपदेशः प्रमाणम् इति स पुनरप्यस्माभिरत्रावतार्यते। "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति।"

* * * *

भारतीयानां सविधे तेषां धर्मशास्त्रस्यास्त्येव सुमहद् गौरवम्। प्रतीच्यदेशीया जिज्ञासवोऽपि विद्याया आवरणे निहिताया नराणामुच्चाशायाश्चिन्तायाश्च प्रतीकमिदं धर्मशास्त्रं जनानां प्रदर्शनार्थम् आधारविशेषे संरक्षितं मृतशरीरमिव केवलं तत्त्वपक्षपातित्वेन यथार्थवस्तुशास्त्रविषयकपक्षपातित्वेन वा न गृह्णीयुरिति बोधयत्यस्मान् असम्पूर्णोऽपि, स्वोपस्थापितमतस्य स्वरूपं पाठकान् बोधयितुमसमर्थोऽप्युल्लिखितः संक्षेपः। प्रतीच्यदेशजानां कठोरसमालोचकोचितं व्यवच्छेदनियुक्तं चेतो वेदान्तस्यावलम्बं तर्कशास्त्रकङ्कालं प्रसह्य ग्रहीतुम्, वेदान्तमतस्य प्राणदं शोणितभूतं विश्वासं प्रेरणाञ्च प्रत्याख्यातुम् अत्यर्थं समुत्सुकमेव। एकमेवाद्वितीयं ब्रह्मेति वेदान्तस्य मूलतत्त्वं सूक्ष्मं विचार्य तस्माद् मनःकल्पितम् अवास्तवं हि किञ्चन वैदान्तिकस्येश्वर इति सिद्धान्तोन्नयनं नैव दुष्करं बोधकौशलसापेक्षोऽयं विषयः। उल्लिखितेन लक्षणेन ज्ञेयवस्तूनां सत्ताया अस्वीकाराज् ज्ञानस्याप्यस्वीकार आयात एव, ज्ञेयवस्तुविरहाज् ज्ञानस्यैव प्रसङ्गाभावाद् इति। युज्यत एव तस्य वचनम्। ज्ञातृज्ञेयात्मकत्वात् तस्य ब्रह्मणो विशुद्धज्ञानमयत्वमेव प्रतिपाद्यते। न हि ब्रह्म ज्ञातृ न वा तज्ज्ञातं परं तद्धि ज्ञानम्। अपरथा चेदुच्यते तदा न हि ब्रह्म बुद्धिमत् किञ्चन सत्त्वम्, परं

केवल ... इव । ... कमानन्दपदमप्यतनताऽतिरिक्तं किमपि प्रकटयितुं नैव शक्नोति, यत आनन्दानुभवकारिण आनन्दोत्पादकस्य वस्तुनश्च सद्भावादेवाऽऽनन्दस्यानुभवः सम्भवति। सूत्रगतान् पन्नान् अवलम्ब्य "जेकर" इव सोऽपि यथार्थतया परमपुरुषं निराकारत्वेन, जगताऽसम्बद्धत्वेन, अस्माकं स्वस्य च विद्यमानताविषयेऽचेतनत्वेन निर्गुणत्वेन च वर्णयितुं शक्नोति। तस्यैव लेखकस्य वचनमनुसृत्य तथाकथितः साकारः परमेश्वरो निराकारस्य प्रथमः प्रकाश इति काल्पनिकोऽयं विषय इति; ईश्वरो वा, स्रष्टा वा, परमपुरुषो वा, पिता वा, विचारको वा, कश्चनान्यो वा नास्त्यस्मदतिरिक्तो वस्तुविशेषो यः किल शङ्कनीयः पूजनीयोऽनुरञ्जनीयो वेति च वक्तुं तेन लभ्यत एवावसरः। जगद्रूपे रङ्गे वयं तु नटा एव।

पञ्चदशोल्लासे सप्तदशोल्लासे चाद्वैतवादिनो वेदान्तिका एतत्सिद्धान्तसमाश्रयिण इति मयोक्तमेव। एभिः सिद्धान्तैर्न ते विचाल्यन्त इति तु साम्प्रतं वयं ब्रूमः। ब्रह्मणा जीवात्मनस्ता... बोधः ... सत्यवस्थाया अनुगुणत्वेन गृह्यते। वेदान्तिकस्य प्रतीच्यदेशज-... च पुरत एतेषां शब्दानाम् अर्थतोऽपि भेदो जायते। द्वितीयाध्यायीय-तृतीयपादस्याष्टादश... व्याख्याना-सरे शङ्करेण सुषुप्तिमधिकृत्य वक्ष्यमाणं वचनं जगदे—"यत्तु सुप्तादयो न चेतयन्त इति तस्य श्रुत्यैव परिहारोऽभिहितः, सुषुप्तं प्रकृत्य 'यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत् पश्येत् (बृ० ४।३।२३) इत्यादिना। एतदुक्तं भवति, विषयाभावा... यमचेतयमानता, न चैतन्याभावादिति। यथा वियदाश्रयस्य प्रकाशस्य प्रकाश्याभावादनभिव्यक्तिर्न स्वरूपाभावा..., तद्वद् वैशेषिका... तर्कश्च श्रुतिविरोध आभासीभवति।" विज्ञा... त्मकं

हि भवेति सिद्धान्तोऽपि गृह्यत एव। "चैतन्यमेव त्वस्याऽऽत्मनः स्वरूपम्।.........तस्मान्निरस्ताशेषप्रपञ्चेन प्रसन्नेनाव्यपदेश्येन बोधात्मनाऽभिनिष्पद्यते।"

न चैते विषया मनुष्यवाचा लक्षयितुं शक्यन्ते। "वाचो यत्र निवर्तन्ते अप्राप्य मनसा सह" इत्यादिकं वचनम् एतानेवोद्दिश्य प्रत्नैर्ऋषिभिरपि समुदीरितम्। मानुष-बुद्धिसाध्यैरसमग्रैः समर्यादैस्तर्कैस्तथैव ज्ञातव्यम्, तदापि वेदान्तिक एव स्वगुणागुणेभ्यः [illegible] तर्कमवतारयितुमलम्। जातिधर्मनिर्विशेषेण जनाः परमलक्ष्यत्वेन याममिलक्ष्य प्रधावन्ति, किं नहि सा पूर्णता? यदि तस्य स्फुटतया तादृशो विश्वासोऽजनिष्यत तदा गुणागुणानां तर्काश्रितः स पूर्णताया अद्वितीयत्वं नूनं प्रत्यपत्स्यत। यत्र यत्र द्वैतभावो दृश्यते, तत्र तत्रैव भेदो वरीवर्तत इति, यत्र यत्र च भेदो विद्यते, तत्र तत्रैव विराजेते गुरुत्वलघुत्वे इति, यत्र यत्र च पुनर्लघुताऽवतिष्ठते, तत्र तत्र च पूर्णताया विरह एवास्माभिः प्रतीयत इति च तर्कशास्त्रैणैव प्रतिपाद्यन्ते।

वेदान्तस्य गूढरहस्यं जिज्ञासुना जनेन श्रद्धालुना भक्तिमता ज्ञानिना च भवितव्यम्, अन्यथा शास्त्राणामेतं शास्त्रं ध्रुवं तस्य व्यामोहायैव जायेत।

उपसंहारः

ग्रन्थेऽस्मिन् प्रागेव मया प्रयत्नो विहितः साम्प्रतिकस्य भारतवर्षस्य [illegible] उपव[illegible]यितुं प्रकटीकर्तुञ्च परिवर्तनविधायिनीः कारणपरम्पराः। यद् यल्लिखितम् तस्य सर्वस्यायमेव सिद्धान्तो भवेत्, यद् भारतवर्षस्यायतिस्थिरीकरणाय द्वयोरेव प्रधानशक्त्योः संघर्षो वर्तत इति। कुलक्रमागता प्रवृत्तिरधिगतश्च गुणविशेषः, इत्येव तच्छक्तिद्वयम्। व्यतीतेऽभ्युदयात्मके युगे जाताः केचित् पुरुषा अनयोरेकतरस्याः शक्तेरधीनाः, केचिच्च शक्त्यन्तरपरतन्त्राः। [illegible]ताभ्यां प्रतीच्यभावापन्ने भारतवर्षे विशेषतः पाश्चात्यशिक्षाप्राप्तानाम् उत्तरकालीनवङ्गवासिनां बहुषु पुरुषेषु संलक्ष्यते यत् कौलिकगुणा अधिगतगुणैर्दूरीकृता इति। अस्य विपरीतं येनाधिगतगुणाः [illegible]लक्रमागतप्रवृत्तिभिः पराजिताः, तदपि साम्प्रतिके काले लक्ष्यत एव। अस्य प्रकृष्टम् उदाहरणं "[illegible]करमचांद गान्धी"। यदि नामानयोः कश्चिन्मध्यवर्ती पन्था विद्येत, स हि शक्तिद्वयस्य शोभनस[illegible]तिकरणादेव विधीयेत।

न हीदृक् सङ्गतिकरणं भारतवर्षस्य धीशक्तेरभूमिः, यतस्तत्रत्या एवर्षयो मध्यपथाश्रयणस्य माहात्म्यं प्रचारितवन्तः। [illegible]वीणावादनरतं कञ्चिद् भगवान् बुद्धः पप्रच्छ "किं ते मतम्? यद्येषा वीणा तन्त्रीभिः सुदृढं बद्धा भवेत्, तदा किमेषा सुस्वरा वा[illegible]नथान्या च भवेत्? अथवा यद्येषा शिथिलं बद्धा भवेत्, तदापि किमेषा सुस्वरा वा[illegible]नथान्या च भवेदिति?" अस्योत्तरं लब्ध्वा पुनर-

प्याह—"किन्तु यद्येषा न वा सुदृढं नापि वा शिथिलं बद्धा भवेत्, तदा किमेषा सुस्वरा [illegible] च भवेत् ?" अथ किमित्य-वोचद् [illegible] प्राप—तथैवात्यर्थं प्रयुक्त उत्साहोऽ-[illegible] जनयति, [illegible]शैथिल्यं चौदासीन्यं घटयति। अतस्त्वं [illegible]जातेष्वपि मध्यपथं प्रतिपद्यस्वेति।

किन्तु भारतवासिनं प्रति [illegible] कथञ्चिद् वर्जनेना-नात्मीयस्य भाव[illegible]स्य च कथञ्चिद् ग्रहणेन मध्यपथाश्रयस्य उप-देशदानकालेऽस्माकमपि स्मरणीयम् यद् भारतवासी कुम्भकारहस्ते अचेतनं मृत्पिण्डमिव न हि यथा तथा कल्पयितुं शक्यते। स हि सुस्पष्टस्वातन्त्र्य[illegible]कः प्राणमयो गूढभावश्च पुरुषः। भारतवर्षीयाणा-[illegible]जातविद्यार्थिनां बहुदर्शिना केनचिच्छिक्षाव्यवसायिनोक्तम्, यद् [illegible] छात्रस्य मनसो भारतीयच्छात्रस्य मनः प्रायेण विपरीतभावप्रव[illegible]मिति। प्राचीनभारतेतिहासपाठानन्तरं भार-तीयस्य छात्रस्य मनो यथैवापेक्ष्यते तथैव—नितरां कल्पनाशील[illegible], सूक्ष्मतत्त्वानुसन्धाने प्रमुदितम्, प्रतीच्यविद्यार्थिभिर्दुरधिगमानां तत्त्वा[illegible] आभ्यन्तरीणाञ्चेति प्रकटीकृतं तेन शिक्षाव्यवसायिना। तस्य परिचिता भारतवर्षीयाश्[illegible] निगूढतत्त्वेषु श्रद्धावन्त-स्त[illegible]बाधायैव तथ्यप्रणयिनश्चेति तस्य [illegible]स्पष्टतरमभिमतम्। एवं प्रदर्शितस्य विभेदस्य गुरुत्वं गभीरत्वं च मत्वा तेन महा-भागेन मन्यते यद् भारतवर्षस्यैवान्तेवासिनामुपयोगी शिक्षा-संस्कारोऽपेक्ष्यत इति। "पाश्चात्त्यरीतेर्यद् यत् प्रकृष्टतमं फलोप-धायकं [illegible]र्थ्यं च, तत्तत् सर्वथा प्राच्यदेशेऽङ्गीक्रियताम्, किन्तु सर्वमेतत् केवलं सहायभूतत्वेन ग्रहणीयम्; भारत-शिक्षापद्धतेः सारभूतोऽपेक्षणीयश्चांशः सर्वथा भारतीयभावानुप्राणित-स्त[illegible]श्यच्छात्राणां ग्रहण[illegible] भवेत्। अतस्त्रिंशत्तमे वर्षे भारतवर्षेण प्राधान्येन तथैव भवितव्यम्, यथाऽद्यतना [illegible]रतवर्षीया-

स्कान्यास्तद्देशं विदध्युः। अत्रान्तरे ...। शासनेऽवस्थितानाञ्च परस्परं सद्भावो हि सुतरामपेक्ष्यते। अस्य सद्भावस्य परा कोटिरधिगम्या भारते वर्षे ... सम्यक् संवर्धनेन, न तु भारतीयचित्तस्योपरि केवलं पारदेशिकमनोव्यापारस्य समारोपणेन। अनुसरणीयमवलम्बनीयञ्चेदं भारतीयविद्यालयसंस्कारे, पठनीयविषयनिर्धारणे शिक्षासरणिकल्पनाव्यापारे च।

'रेभारेण्ड्-डि-भ्याण्डार्-सुयेरेन्'-महाभागेन प्रदर्शितैषा पद्धतिरधुना बोल्पुरे श्रीरवीन्द्रनाथठाकुर-महोदयेनानुष्ठियत एव। विंशतितमे परिच्छेदे मयाऽस्या अभिनवशिक्षाव्यवस्थायाः सारांशोऽभिहितः। विंशत्यधिकोनविंशतिशततमे खृष्टाब्दे मम शान्तिनिकेतनगमनात् प्रागेवास्या मौलव्यवस्थाया विस्तारः परिकल्पितः। ततो विद्यालयेनानेन विश्वविद्यालयेन भवितव्यम्। न हि तत्र केवलं तानि विद्याविषयाणि समाहर्तव्यानि, यानि स्वशक्त्योत्पादयितुं शक्नुयात एव यावत्कामं भारतभूमिर्भवेत्। परमनेन शिक्षाप्रतिष्ठानेन सजीवजन्तुनेव जन्मभूमिसकाशात् प्राणशक्तिमापादयता वर्तितव्यम्। परिहर्तव्यं तु भारतेन तज्जाड्यम्, येनास्य जीवनशक्तिस्तिरोहिता, जाता च परेषामनुकरणमात्रेणैव अस्माकं सन्तोषलाभप्रवृत्तिः। तस्याप्यस्ति किमपि देयं विश्वसमुन्नतिव्यापारे। ततः प्राक् तु तेनोद्धारयितव्यं तद्धनम्, यत्तस्य नष्टमिव प्रतिभाति। अस्य प्रथमारम्भे भारतप्रसूतानां तत्त्वत एव सम्पदां सम्यगवबोधो नाम कर्तव्यः। "पित्र्यरिक्थस्य प्रत्यक्षीकरणात् परम् अन्यैः सह तस्य संविभागोऽस्माकं कर्तव्यतापथमवतरति"। प्रतिष्ठापकमनसि लब्धजन्मनाऽनेन विश्वविद्यालयेन युगपद् अतीतानुसन्धाने विश्वभारतीप्रदेयज्ञानभाण्डारावतरणे च प्रवर्तितव्यमर्थिभ्यः। भारतीयसभ्यतायाः पुनरुद्धार एवास्य प्रधानतः सम्पादनीयं कार्यम्; तत्तु कृपणचेतसा न करिष्यते, यतोऽस्यां

विश्वभारत्यां सर्वथा मनुष्यजातेरुच्चा शिक्षा प्रदेया न त्वनुदारया।

अतीतानुसन्धानं तु तदैव प्रावर्तिष्टैव। ग्रन्थालये दृष्टो मया कश्चित् पण्डितो व्यापृतः प्रमाणीकर्तुं श्रीशङ्कराचार्यस्याद्वैतवादो बौद्धशास्त्रादुद्गत एवेति। ततः परं धूलिधूसराणां हस्तलिखितप्राचीनपालिग्रन्थानामध्ययने निरतं कश्चिद् बौद्धस्थविरमहमपश्यम्। विद्यार्थिनां चित्रकर्माणि च दृष्टानि, कस्यचित् सङ्गीतज्ञस्य गानक्रिया च श्रुता। आसीच्च तत्र केषाञ्चिच्छात्राणां पितृमतानुसारेण कलिकाताविश्वविद्यालय-'प्रवेशिका'-परीक्षार्थिनां कृत आयोजनविशेषः। परं प्रवेशिकाश्रेण्यां लब्धप्रवेशस्य बालकस्य चित्र-सङ्गीतकर्मणोरुत्साहः क्षतिमात्रे पर्यवस्यति, यतस्तयोर्विषययोः परीक्षायां कृतित्वार्जने शक्तिर्नास्त्येव।

विंशत्यधिकोनविंशतिशततमे खृष्टाब्दे तत्र मम गमनात् परमत्रान्तरे विश्वभारत्या महान् अभ्युदयः समापन्नः। प्रवेशिकापरीक्षार्थम् आयोजनप्रपञ्चः परित्यक्तः स्थापितश्च रवीन्द्रनाथकल्पिता विश्वभारती नाम विश्वविद्यालयः पण्डितवर्याणां श्रीविधुशेखरशास्त्रिणाम् अध्यक्षत्वेन। प्राच्यतत्त्वानुशीलनरतैर्बहुभिरेव पाश्चात्त्यपण्डितैः प्राप्तं स्वीकृतं चाऽऽह्वानं प्रतिष्ठापकात्तत्राऽऽतिथ्यग्रहणाय। तेषां मध्ये अध्यापक'सिल्भान् लेभि'—थम् वेनयट्—'डक्टर्' ष्टेला क्राम्रिश्—य्याडामयसिल् व कार्पेल्लेज्—'डक्टर्'-विण्टारनिज्-महोदयानां नामानि विशेषतो ग्रहणीयानि।

न केवलं शिक्षाक्षेत्र एवास्माभिर्भारतवर्षे तन्त्रवापे पाश्चात्त्यतन्तुभिः पटो निर्मितः। तत्रापि यदि भारतीयोपकरणैः केवलं यथाप्रयोजनं प्रतीच्यतन्तुभिर्निर्माणम् अभविष्यत्तदा सर्वं चतुरस्रशोभि समपत्स्यत। किं बहुना, अस्माकं भारतवर्षीयकृत्यजातस्य निर्वाहव्यापारे भाविकालीनैरैतिहासिकैरेव यमव वक्ष्यते यद्-

स्माकं [illegible] व्यापारिता इति। '[illegible]'-महाभाग इंग्लण्डीयजनानां शक्त्यहंकारदृढसङ्कल्पगुणानुरागा आसीदेव। अमोघविचारेण तु तेनैव प्रदर्शिताः केचन दोषाः, ये नाम तेषां गुणानां परिणामविशेषाः। यथा इंग्लण्डीयजनानामात्मशक्त्यां स्वजातेः कर्मकुशलतायां च विश्वासातिशय्येन जायतेऽन्येषां शक्तिकीर्ति[illegible]ने विरक्तिकरः कश्चिदनुत्साहः। प्रदर्शितं मयाऽन्यत्र यदस्माभिर्विहिते स्वायत्त-शासन-व्यवस्था-पद्धतेः प्रकर्षविषयेऽस्माकं श्रद्धातिशयेन न चिन्तिताऽस्माभिर्भारतीयानां प्रियतरा वर्तते न वाऽन्या काचित् पद्धतिरिति। आत्मशक्त्यां स्वल्पतरविश्वासा अन्ये शासकवर्गा अवश्यमेव पश्येयुर्यद् भारतभूमौ दृढसंसक्ता बहुयुगस्थायिनी भारतीयानाम् बुद्धिकल्पिताऽस्ति काचित् सरणिरिति। किमनेन न प्रमाणितम्, यत् प्राच्य-पाश्चात्त्य-सम्मेलनचेष्टायां भारतेंलण्डसमानयनकर्मणि, राज्यशासनावसरे वा जीवनयापनविधिप्रदर्शने वा अस्माभिः पाश्चात्त्योपकरणान्येव बहुलतराणि व्यवहृतानीति ?

अधुनैव विधीयतेऽस्माभिर्महान् प्रयत्नो यथा [illegible]मस्माकमेव राज्यशासनव्यवस्थानुकरणेन नूतनं भारत-शासनयन्त्रं परिकल्पयितुम्। किमत्र सन्देहस्यावसरो नास्ति यदस्माकम् अभ्युदयस्वजातशासनयन्त्रमेव भारतीयानां योग्यतममिति। सन्ति तावत् केचन भारतीया विभिन्नमतावलम्बिनः परमस्मिन् विषये सुतरां सन्दिग्धबुद्धयः। ते हि न मन्यन्ते यत् पाश्चात्त्यप्रतिभासृष्टं प्रजातन्त्रमेव [illegible] प्रकृष्टतममिति। अस्मिन् प्रस्तावे प्रत्यासन्नामापदं प्रबोधयतः श्रीविपिनचन्द्रपालमहोदयस्य पञ्चविंशतिवर्षाण्यतीतानि। सुदृढं सनिर्बन्धं च तेनाभिहितम्, यद् राज्यशासने वा समाजसंस्कारे वा लोकानां विशेषधर्माणाम् अनङ्गीकरणेन परिवृत्तिचेष्टाः सुतरां निष्फला नैराश्यानुबन्धिन्यो विपद्ावहाश्च

भवेयुः। अधिकञ्च तेनोक्तम्, यद् देशीयपद्धतिम-नुसृत्य संस्कार-प्रवर्तनेन लोकानामात्मोन्नतये स्वकीयमतिप्रकर्षोऽप्यभ्युपगम्येत च सम्मान्येत च। ततः परम् इ-ान्तिनेऽपि काले सि-आर-दाश-महोदयेन मतमिदमभिव्यक्तं यद् गणतन्त्रघटितं केन्द्रीभूतं शासन-यन्त्रं भारतस्य धर्मार्थसमाजव्यवस्थापनबुद्धेर्विपरीतमेवेति। तेन तावत् केवलमिदमेवोक्तं, यत् प्रादेशिकस्वाधीनताया वा केन्द्रीय-दायित्वस्य वाऽपेक्षया ग्रामसंरक्षाव्यवस्था अपि लजनपदाना-स्वातन्त्र्यविधानं समधिकमपेक्ष्येते। तथा च इ-मदास्माकं सर्वथा लक्ष्यं भवेत्, यद् विभिन्नप्रदेशशासने वा समग्रभारतशासने वा केन्द्रगतायाः प्रभुशक्तेः केवलम् उपदेशदानं प्रयोजनीयविषये च विहितनियमानुसारेणैवाधिकारप्रयोगः कर्तव्य इति तेन दाश-महाशयेनोक्तं; अतोऽधिकं तु तेन किमपि नाभिहितम्, येन तस्याभीष्टशासनतन्त्रस्य स्वरूपनिर्णयो भवेत्।

अचिन्तितपूर्वात् कस्माचिद् दिग्भागादुपलब्धो भारतशासन-संस्कारपथे स्पष्टार्थः कश्चित् कर्तव्यनिर्देशः। द्वाविंशत्यधिकोन-विंशतिशततमे खृष्टाब्दे शरत्काले प्रचारिता काचिद् विघोषणा महामान्यस्य तत्रभवतो महीशूरमहाराजस्याऽऽज्ञाक्रमेण। उक्तं च तस्याम्—यद् महाराजस्य राज्यशासनतन्त्रस्यापेक्षणीयाविस्तार-हेतोः काचिद् मन्त्रणासभा व्यापारिता। वङ्गीयविद्वद्ग्रगण्यस्य महीशूरविश्वविद्यालयाध्यक्षस्य मान्यस्य डक्टर्-व्रजेन्द्रनाथ-शील-महोदयस्य समापतित्वेनाधिष्ठितयाऽनया मन्त्रणासभया तस्याः सिद्धान्तजातं प्राकाम्यं नीतं त्रयोविंशत्यधिकोनविंशतिशततमे खृष्टाब्दे 'मार्च'—मासि। मन्त्रणासभाया इदमेवैकं लक्ष्यम्, यत् शासनतन्त्रं या जगतः साम्प्रतिकभावानुप्राणितेनापि स्वादेशिकधर्मा-कान्तेन भावितव्यं, न तु पारदेशिकधर्मस्पृष्टेन। यदा नाम वयमपि सम्पूर्णस्य भारतवर्षस्य कृते नूतनशासनयन्त्रव्यवस्थापने

नियताः स्मः, येनैतावत्कालपर्यन्तमस्माभिर्धृतं शासनभार-स्तद्देशजनेभ्यः शनैः समर्पयिष्यते, तदा तस्या मन्त्रणासभायाः सिद्धान्तजातं अस्मास्वपि गुर्वर्थं प्रतिभाति। अतोऽस्य सारांशो मया ग्रन्थस्यैतस्य अन्यतमक्रोडपत्ररूपेण तत्प्रार्थिनां कृते विनि-वेशितः।

नेदं मे मतम्, यत् अनुपार्थमाणस्य महीशूरराज्यस्य कुलक्रमागत-स्वातन्त्र्यावलम्बिराजाधिष्ठितस्य शासनव्यवस्था इंग्लण्डाधिराजा-धिष्ठितस्य निखिलभारतवर्षस्यापि सुयोग्या भवेत् सर्वेषु विषयेषु। किन्तु ते नाम सिद्धान्ताः सर्वत्र व्यवहारयोग्यलक्षणाक्रान्ताः। विधिनिषेधप्रवर्तनं तथा [illegible] च तत्[illegible]पाया-मपि व्यवस्थापनम्—सर्वमेतद् महीशूरराज्यादन्यधर्माक्रान्तेष्वपि राज्येष्वनुकरणयोग्यम्। अतस्तस्या मन्त्रणासभायाः सिद्धान्त-सारोऽधुना न हि निरर्थकः।

राज्ये विधिनिषेधप्रवर्तनं त्र्यवयवमिति तस्याः सभाया मतम्। तत्र प्रथमतोऽपेक्षणीयविधिनिषेधानां प्रयोजनस्पष्टो-ल्लेखेन प्रार्थनाविशेषः। सा च प्रार्थना प्रजाभिरेव क्रियते, प्रजा-मतनिर्धारणार्थं च 'प्रजाप्रतिनिधीभूता परिषत्' विधास्यते। अस्याः सदस्याः प्रजानां मनोगतान् निर्व्याजम् अभिलाषान् उच्चारयेयुः। द्वितीयावयवस्तु विशेषज्ञानसापेक्षः। तत्र, धर्मसभायाम् उप-स्थापनात् प्राक् ते नाम प्रजाभिलाषाः सविशेषं विचारणीयाः। तदर्थं विशेषज्ञानविदां राजकुले प्रजापरिषदि चोपदेशदानयोग्यानां कतिचित् प्रतिष्ठानानि भवेयुः। विधिनिषेधप्रवर्तनव्यापारेऽन्तिमो भागः [illegible] करणीयः 'प्रतिनिधीभूत-परिषद्' व्यपेक्षया [illegible]वयवथा न केवलं प्रजाप्रतिनिधीभूतया अपि तु ज्ञानधर्मदर्शनसमृद्धयाऽन्यया परिषदा।

प्रतिनिधीभूतां परिषदं जातेः सारत्वेन परिग्रहमर्हितुं परिगृहीता

उपाया अवधानविशेषमेव ेन्ति। राष्ट्रियप्रतिनिधिनिर्वाचिका मण्डली अन्तर्राष्ट्रियप्रतिनिधिनिर्वाचनस्य सौकर्याय कल्पेत। व्यक्तिविशेषस्य दैवाधीनं देशविशेषवासव्यापारं वर्जयित्वाऽपि सन्त्येवात्र बहवोऽन्ये विचारणीया विषयाः। असंशयं प्रतिवेशित्वं खल्वावश्यकं बन्धनम्।...राष्ट्रियनिर्वाचनाधिकारः प्रतिनिधिप्रेरणस्य भित्तिभूतः।...साधारणस्य स्वार्थस्य साधारणस्य कार्यस्य च ग्रन्थिः प्रतिवेशित्वग्रन्थिनिरपेक्षोऽपि जनान् दलैः समाजैश्च बद्ध्वा जीवितस्य समाजस्य च जटिलतरे प्रसारणे सुमहदुपकरोति।...स्थानविशेषे निवास एव न कस्यचित् पौरतासम्पादने हेतुः, परं तस्य कार्यजातं नागरिकसमाजैः स्वार्थसम्बन्धश्च। अतः प्रतिनिधिनिर्वाचकानां प्रदेशविशेषाधिवासित्वं व्यवसायश्च सममेव समपेक्षणीये। द्विसहस्रवर्षेभ्यः पूर्वं गङ्गोपत्यकायां रचितनिवासानामार्याणां सामाजिकव्यवस्थाभिज्ञो जनः साम्प्रतं दृश्यमानं कार्यकरसभानागरिकसमाजगृहादिकम् आर्याणां वैशिष्ट्यस्यैवानुकरणमात्रमिति नियतं विजानीयात्। भारतीयानां राजनीतिकबुद्धिप्रसूतानां पुरातनसंस्कृतग्रन्थानां मतं सर्वथैवानुसृत्य निर्मितेयं सभेति सभयैवानया सन्दुधुष्यते।

राज्यशासकेन स्वप्रतिनिधीभूताः कार्यनिर्वाहका उपदेशदातारो मन्त्रिणः स्वयमेव निरूप्यन्ते, अतो व्यवस्थापकसभया न हि ते दूरीकरणीयाः, न वा तत्कृते ते प्रष्टव्याः। एतद्विषये महीशूराणां नवीना राजनीतिर्मूलतो राजतन्त्रात्मिका। प्रतिनिधिपरिचालितं तद्राजतन्त्रं यां पद्धतिमवलम्ब्य प्रवर्तते, तया तु कदापि न राज्ञः स्वैरशासनं सम्भाव्यत। महीशूरस्य प्रतिनिधिभूतायाः परिषदोऽनुगुणा सभैव शासकशासितयोर्मध्ये भावस्याऽऽदानप्रदानपूर्वकमैक्यसंस्थापनस्य यथार्थः फलप्रदश्चोपायः। अतः खलु प्रतिनिधिनिर्वाचनविषये प्रजानां मतामतमपि मौलिकम् एव।

एतेन प्रजानां प्राधान्यमपि दृढीभवति। एवंविधास्ववस्थासु कुलक्रमागतनायकस्य राज्यस्य साधयितुं नैव शक्यते। राजतन्त्रविवर्जिते राज्ये तन्नायकपदं निर्वाचितेन केनापि जनेन पूरयितुं पार्यते। बृटीशभारतान्तर्गतेषु प्रदेशेषु सम्राजः प्रतिनिधिनाऽपि तस्य पदस्य पूरणं सम्भवति। वस्तुतस्तु विश्रुतस्य भारतीयनीतिज्ञस्य मान्यवरस्य "आगाखान्" महोदयस्य समितिसंस्थापनात् पूर्वं महीशूराणां राज्यपरिपालनविधीनां केचन विधयो बृटीशभारतस्यापि कृते गृहीताः सञ्जाताः। तदीयेषु लिखितेषु, ऊनविंशत्यधिकानविंशतिशततमखृष्टाब्दस्य संस्कारकविधेर्विधिवद्व्यवस्थापनाय विहितायाम् इंलण्डीयमहासभासम्बन्धिन्यां समित्यां तत्समुपस्थापितेषु प्रमाणेषु च सुस्पष्टं प्रतिपादितं तेन—व्यवस्थापकसभयाऽनपनेयानां प्रजाभिरेव निर्वाचितानां केवलञ्च कार्यनिर्वाहकाणाम् एवाऽऽस्ते प्रयोजनं भारते, न तु बृटीशानामादर्शस्येति। साम्राज्यस्यान्तः स्थित्वापि स्वायत्तशासनसुखमनुभवितुमेवैच्छन् भारतीयाः, न तु बृटीशादर्शेन महासभादिकं स्थापयितुमिति तेन सनिश्चयमभाषि। "गोखेल"मतात् समारभ्य "जातीयमहासभायाः" "मोस्लेम् सङ्घस्य"च सम्मिलितावेदनं यावत् परिदृष्टासु सर्वासु भारतीयनिर्मित-शासन-पद्धतिषु कार्यनिर्वाहकाणामेव विधिव्यवस्थापने पूर्णा प्रष्टव्यतेति मतं परिदृश्यत इत्यपि तेनैव प्रकटीकृतम्। विश्रुतायाम् इंलण्डीयमहासभायाः संस्कारघोषणायां "रेस्पन्सिबल्" (प्रष्टव्यः) इति पदं राजनीतिविषयके पारिभाषिकेऽर्थ एव प्रयुक्तं सत् तन्मते दुर्भाग्यविशेषस्यैव भाजनं जातम्। प्रकृतिनिर्वाचिता परिषदेव शासनविधेः स्थितौ प्रष्टव्या। विधीनां परिपालनेनापि प्रष्टा अधिकारपदमात्रसंश्लिष्टा मन्त्रिणश्च शासकमवलम्ब्यैव सम्राजोऽनुयोगाधीनत्वं गाहन्ते। इंलण्डदेशस्य सङ्घीयं राज्यतन्त्रं यदि प्रसह्य भारतं विशेत्,

तदा भारतस्य व्यसनायैव तत् कल्पेत। एतैर्वचनैर्वृटीशानां मनसि निबद्धं ... शासनम् आदर्शो नैव विचचाल। पुनरपि ... महासभया "इमारसन्"महोदयकृतवृटीशजातिसमालोचनस्य ... मिथ्यात्वं प्रमाणितम्।

* * * * *

... राजनयस्य, निदर्शनीभूत-"विश्वभारती" समाख्यस्य ... स्य, बङ्किमचन्द्रचट्टोपाध्याय-... -सीतादेवीप्रमुखाणामाधुनिककवीनां कृतिभ्यः साहित्यस्य, भारतीयसभ्यतानुगुणाया भारतभूमौ जातसंवर्धिताभ्यः ... तायाः प्रतीच्यसंस्पर्शात् कथञ्चित् परिवर्तितायाः सञ्जीवीकृतायाश्च कलायाः स्थितेश्च प्रमाणानि साम्प्रतिकभारतीयजीवितस्य विभिन्नावस्थाभ्यो मया समुद्धृतानि। अपि नामैतैर्विषयैर्योत्स्यते काचित् ... र्यथा वस्तुतः परस्परविभिन्नानामुपलक्षकानां यान्त्रिकेण ... संयोगेनैव यथा तेभ्यो ... भिन्नोत्पत्तिः साध्यते, तथैव ... भिन्नान्येतानि फलानि? ... जातेर्धी ... कया अवस्थया जातेर्धीशक्तेः (पालमहोदयमते ...) एतस्मात् गाढतरः सम्बन्धो नैव सम्भवतीति के ... न्त। ... यात्मावगाहिनी हि बुद्धिरिति सि आर् दास-महोदयेनोद्घुष्यते। एकजातीये वस्तुन्यपरजातीयस्य वस्तुनो बीजं यदि निहितं न स्यात्, तदा तस्यापरजातीयत्वलाभोऽसम्भव एव। यथा विभिन्नस्य पार्थिववस्तुद्वयस्य संलग्नीकरणेनैव किञ्चिच्चिरन्तनम् ऐक्यं सञ्जायते, तथैव विजातीयानां विविधा भावा अस्माकं जातीयेन चरित्रेण धीशक्त्या वा नैव क्रममपि संयोजयितुं शक्यन्त इत्यपि स्वमतं ... वक्ता तेनाभाणि।

न मया ... आदर्शम् ... रः प्रजा अत्र ... करिष्यन्ते, ... अधिगतत्वादि ... पि न

समासादितः। न च तस्यास्ति प्रयोजनम्। यं कञ्चिदपि शिक्षितस्य भारतीयस्य द्विविधकमवेक्ष्यं प्रतीच्यचिन्ताकारे ...वर्षाणि यावत् संयोगमेत्य परिवर्तितं जातमित्यत्र नास्ति कस्यापि विप्रतिपत्तिः। भारतीयमनीषा... प्रसवो हि रवीन्द्रनाथठाकुरः। विश्वसाहित्ये वरणीयं स्थानं समधिगतवतो रवीन्द्रनाथठाकुरस्य चिन्तापद्धतिर्भारतेन युरोपस्य संस्पर्शेन... मथास्यास्त्यादि... पि वक्तुं मन्ये नास्ति ... विश्वपरीक्षोत्तीर्णानामध्ययनाय कलिकाताविश्वविद्यालये ... विभागविशेषं प्रतिष्ठापितवता स्वर्गतेनाऽऽशुतोष... महोदयेनास्याः समस्यायाः सत्यता ... ता। स्वकीयाध्यवसायाश्रयिणीं श्रद्धाम् आशा... धिकृत्य भाषमाणेन तेन कथितम्—न हि सर्वमेव विदेशीयं वस्तु निन्दनीयमिति शिक्षालेशाद् दूरीकरणीयमस्माभिर्न च पुनः सर्वमेव भारतीयं वस्तु श्रेष्ठत्वेनास्माभिर्... , यतस्तेनास्माकं मूर्खताऽतिविश्वासश्च प्रतिपादितौ स्याताम् इति। वक्ष्यमाणप्रकारेण सिद्धान्तितं तेन स्वं मतम्। "शिक्षाविषये सार्वभौ... प्रयोजनीयतापेक्षि... विषया एव समधिकं गौरवं ...न्ते। वास्तवं प्रतिरूपं गतः सार्वभौम... यथास्माभिः पूर्णत्वेन बुध्यते। अतः प्रतीच्यसंस्कृतेः श्रेष्ठो विषयोऽस्माभिः ग्रहणीयः, रक्षणीये वर्धनीये च जातीयशिष्टिसंस्कृती।

साम्प्रतं भारतेनो... पाद्यन्त एव बहवो वैज्ञानिकाः। ज्ञानवृक्षस्येयं शाखा प्रतीच्येनैव भारताय प्रदत्ता। सार् जे सि बसुस्तेषामेकः, सार् पि सि-रायश्चापरः। एतौ यतौ ... वि विषयेऽभारतीया... ति स्वप्नेऽपि चिन्तितुं नालम्। एतयोश्चक्षोकेन ... साम्प्रतं आर्तीभ... लोकनेन समग्रात्मा दृढं संयोजितः। अर्वाचीनेषु वैज्ञानिकेषु साधारणैर्जनैरपरिज्ञातोऽपि भौतिकरसायनविषयकसार... भिधानाभिः प्रतीच्यजन... परिचितो हि ...

जे सि घोष-महोदयः। एतेषां जनानां चिन्तापद्धत्या निवेदितो जातीयचिन्ताया आकारो ग्रेट्ब्रिटेनेन समं भारतस्य संस्पर्शाज्-जातस्य परिवर्तस्यैव फलम्। किमेतस्मादेव कारणात् ते जातीय-बुद्धिसंस्कृतिचेतनाः समूलमुन्मूलिता जाताः? ध्रुवं नैतज्जातम्।

सत्यं प्रतीच्यस्य विज्ञानेन भारतस्य विच्छेदमभीप्सुरस्त्येव कश्चन सम्प्रदायः। टलष्टय्-महोदयेन प्रभावितस्य एम्. के गान्धि-महोदयस्योपदेश एव तेन सम्प्रदायेनोररीक्रियते। वाष्पीयशकटं निन्दता वक्ष्यमाणं वचनं गान्धिमहोदयेनोक्तम्—नराणां दूरगमनं सावधिकं विधातुकामेनैव परमेश्वरेण मानवशरीरमेवं प्रकारेण विनिर्मितम्; परमेतदसहमाना मानवा अवधेरतिक्रमणस्योपायान् व्यचिन्तयन्। एतत्प्रसङ्गेनैव पुनरपि तेनाभाणि, स्वज्ञानं नराणां जायतामितीश्वरेण तेभ्यः समुपायनीकृता बुद्धिः, परं तस्या अप-व्यवहारेणैतैः स्वज्ञष्टैव विस्मर्यते। वाष्पेषु प्रच्छन्नं स्थितया शक्त्या वाष्पीयशकटनिर्माणस्य बुद्धिरपि तेनैव परमेश्वरेण दत्ता इति त्वकठोरः स्वमताभिमानो जनो मन्यते।

समुन्नतिसाधनविषये एष एव यदि भावो भारतस्य धीशक्ते-रादर्शभूतस्तदा तस्यानागतः समयो नूनं तमसाच्छन्न एव। भाग्यादपवादभूतो न त्वादर्शभूतोऽयं भावः। वङ्गानां विद्यालयानां महाविद्यालयानाञ्च परिदर्शनावसरे, साम्प्रतिके काले जाता जडविज्ञानस्य रसतन्त्रस्य चोपदेशविषयिणी प्रार्थना सुदृढमेव मे मनसि पदं निदधे। कलिकातायां यस्य प्रतिष्ठानस्य प्रतिष्ठापनेन सार् जगदीश-वसुर्भारतीयेषु प्रतिष्ठां लेभे, तस्य प्रतिष्ठानस्य प्रतिष्ठापनसमये यो हि नाम समुत्साहो मया समवलोकितः, स कथं सहसा विस्मर्येत। डा. सर्गात्मकाभिभाषणप्रसङ्गेन तेना-भिहितम्—चिरमन्विष्यमाणैः सृष्टिरहस्यैर्येन वयं परिव्याप्यामहे, यः स्वस्याकारस्य गहनतायां विश्वस्य सर्वं रहस्यमाच्छादयति,

...लिकधास्वरूपे सूक्ष्मे जगति यो हि नाम विस्मयो ... ...मास्ते, स ... मध्ये जिज्ञासनस्य बोधस्य चेच्छां निदधातीति विस्मर्यतेऽस्माभिरिति। अयमेव तावत् क... ...स्य गहन-तया विस्मृतात्मानं मध्यपथाश्रयिण... जनमन्तरा वर्तमानो भेदः। ... किञ्चन विद्यते। विजातीयानां विशिष्टा भावा भारतीयानां बुद्ध्या चारित्रेण च योजयितुं शक्यन्त इति सि आर्, दाश-महोदयेन प्रत्याख्यातं वचनं जे सि-वसुमहोदये सत्यतयैव प्रतिभाति। जे सि वसु-महोदयेन ...स्यजगतोऽनुभूति-...लविज्ञानस्यापादानपरीक्षणपद्धतिराश्रिता। प्रतीच्यस्य सर्वान् एव वैज्ञा...निकविषया... अधिगत्यापि मूलतः स भारतीय-धीशक्तेरेव फलतया चकास्ति। हिन्दूनां "वि...ष्वजगा...पथक-बोधत्वेन" यत् ... वर्णितम्, तस्मादेव तेन लब्धा प्रेरणा। "प्राचीनहिन्दुजातेरिव नवीनहि...जातेरपि स हि ताव...पथको भावो भित्तिपा...यमानः।" विश्वस्य परि...मानव...स्यान्तः सर्वगतमस्त्येव किञ्चनैक्यम्। लिखितैर्भाषितैश्च भूयो भूयस्तेनायं प्रकाशितो भावः, वि...नजगति प्रतीच्यस्य सर्वातिशायित्वम्, विज्ञानस्य बहुत्वं नास्ति, एकमेव तत् (विज्ञानं) सर्वं वैज्ञानिकमतं क्रोडीकरोतीति मौलिकं सत्यमप्यस्माकं नेत्रपथाद्...वापनया...। अ... ...न उपरि शक्तेः क्रियाविषयकविमर्शो कथितं तेन—...: सीमारेखा दृष्ट्वा चेतनाचेतनयोर्मध्ये आविर्भवतः संस्पर्शबिन्दूंश्चाऽऽ-विष्कृत्य विस्मित एवाहमभवम्। न तु केवल...तः, परं नानारूपधरस्याव्यामोहोत्पादकस्य विश्वस्यान्तः स्थितमैक्यं चाक्षुष-प्रमाणेन प्रतिपादयितुं क्रमात् कस्माच्चन सुमहतः सिद्धान्तात् महत्तरं सिद्धान्तं विज्ञानजगति चिन्तयि...मपि सोऽसमर्थ...एव। समु-च्चरति तदा हृदयस्यान्तःस्थलात् कश्चिद् उत्क्रोशः—अपिनाम भारतं तद्...मधिगच्छे... इति। स्वजीवितस्य कार्यजातैः

सुवर्णेन वर्त्मना यस्य प्रतिष्ठानस्य कर्मकलापः प्रचलति, तस्मिन् कलिकातास्थिते प्रतिष्ठाने स्थितः सोऽवोचत्—"... भवत्वं हि ... यत्र सम्मिलेत्। अत्रैव भारतस्य धीशक्तिः पूर्णं विकाशं समधिगमिष्यति।"

... पूर्वं यस्य भवनस्य ... कर्मणि वयं ...कृता अभवाम, तस्य भवनस्यैव परिसरे भारतपरित्यागात् पूर्वं लब्धं मया तस्य (जे सि वसु-महोदयस्य) पाश्चात्यसंदर्शनम्। न च तद्भवनं ..., परं देवायतनमेव तत्। अतनुभिः, विचित्रैः, प्रतिनिमेषमेकाङ्गुलस्य (इञ्च्) सार्धकोटिभागानामेकभागपरिमितम् अङ्कुराणां वर्धनमपि विभावयितुं क्षमैः, विश्ववैज्ञानिकानां विस्मापकैर्यन्त्रैर्वसुमहोदयनयेनैव तत्र गवेषणादिकं प्रचलतीति कृत्वा तद् रसक्रियास्थानमेव। विज्ञानस्य ...दमतमेऽपि यन्त्रैर्वेद्यानां समग्रेणैव जीवितेन न तु कतिपयैर्वर्षैः परीक्षितया श्रद्धयैव वेद्यानां सत्यानां स्थित्या भवनस्य तस्य देवायतनस्य ... जायते। श्रेष्ठस्य कस्यचिद्रूपकमयस्य चित्रस्याधस्तात् ... स दण्डायमानः। चित्रे ...तद्द्वयमासीद् विलिखितम्। ... कृपाणेनोपलक्षितो बुद्धिपुरुषोऽज्ञानताया गभीरमन्धकारं शातयन् प्रसरति, कल्पना तस्य पत्नी च मधुरेण वंशीध्वनिना तस्य ... साहं वर्धयन्ती तिष्ठति। यस्य भारतीयचित्रकला... यस्य वर्णनं मया प्रागेव दत्तम् तत् ... नन्दलालवसुमहोदयस्य कार्यं हि तच्चित्रम्। प्रतिष्ठानस्य कार्यजातानां वर्णयितासीत् स वैज्ञानिकः। भविष्यत्समयस्य ... विषये किञ्चिद् वक्तुं स प्रावर्तत। ... तस्य वदनं बभासे। ऋषीणां स्वरो भावश्च तस्मिन् व्यलसताम्। ईश्वरप्रेरितां वार्तां विज्ञापयन्निव स स्थितः। नास्त्यत्र ... यत् स ... भारतीय...लिखितं न केवलं

यथावद् प्रदर्शितवान्, परं तद् विपर्ययात्मक एव। प्रत्यक्षमाना-श्रयिण्या प्रतीच्यविद्यया अतीन्द्रियज्ञानमूलायाः प्राच्यविद्यायाः सम्मेलनेन च तयोरन्योन्यावलम्बित्वमेव तेन सम्पादितम्। परं स एवात्र ब्रवीतु। चेतनाचेतनयोर्मध्ये सूक्ष्मतया समवस्थितस्य भेदस्याऽऽविष्कारविषयं जगति प्रचारयता तेनाभिहितम्—"आलोक-तरङ्गे परिदृश्यमानासु कम्पमानासु रेणुषु, संजीवनोत्पादनक्षमेषु च ऐहिकेषु जीवितेषु, स्वकया मरीचिमालयाऽस्माकं संप्रकाशके सूर्ये, चेत्येवमादिषु सर्वेष्वेव विषयेषु सर्वव्यापकमेकत्वं समवलोकयतो मे मनसि त्रिसहस्रवर्षेभ्यः पूर्वं गङ्गातीरनिवासिभिर्नः पूर्वैः समुदीरिता वाणी भृशं विललास—

एकत्वं येऽनुपश्यन्ति विश्वेऽस्मिन् बहुधा स्थिते।
ते विदुः शाश्वतं तत्त्वं नेतरे खलु नेतरे॥